तेषामनुपयोगित्वकथनम्	८०
*ग्रहचरस्य परोच्चफलनिर्णयः	८१
मन्दोच्चानां स्फुटत्वं गतिसाधनञ्च	८४
*बुधशीघ्रगतेः स्फुटत्वम्	८७
मन्दपरिधिसाधनम्	८९
श्रीभास्करोक्त-रविचन्द्रमन्दपरिधि-साधनम्	९१

विषयाः	श्लोकाङ्काः
*दृक्सिद्धमन्दपरिधिसाधनम्	१०३
*शीघ्रपरिधिकथनं तत्साधनञ्च	१०६
*कुजादीनां मन्दपरिधिकथनम्	१०७
*कुजबुधगुरुमन्दपरिधिविशेषः	१०९
सौरोक्तमान्द्यशैघ्र्यफलानयनम्	११९
शैघ्र्यमान्द्यफलसंस्कारक्रमः	१२१
*कुजबुधयोः संस्कारविशेषः	१२४
ग्रहाणां गतिस्फुटीकरणम्	१३२
कुजशनिगतिसाधनविशेषः	१५१
कुजादीनां वक्रावक्रकेन्द्रांशकथनम्	१५९
कुजादीनामुदयास्तमयकेन्द्रांश-कथनम्	१६१
स्फुटग्रहान्मध्यानयनम्	१६६
सुखबोधाय खण्डफलकथनं तदानयनञ्च	१६७
*रविचन्द्रकुजमान्द्यफलविशेषः	१७८
*कुजस्य स्थिरफलखण्डसत्त्वम्	१७९
खण्डफलानुसारेण गतिसाधनम्	१८०
तत्र ऋजुवक्रत्वनिर्णयः	१८७
*नष्टफलानयनम्	१८८
स्फुटोदयास्तमयभागतः कालानयनम्	१८९
रवेः स्थूलसूक्ष्ममान्द्यखण्डफल-विन्यासः चन्द्रस्य मान्द्यखण्डफलविन्यासः कुजबुधशनीनां परोच्चखण्डफल-विन्यासः	१९९

विषयाः	श्लोकाङ्काः
ताराग्रहाणां मान्दशैघ्र्यखण्डफलविन्यासः	१९९
खण्डमध्ये गतिफलचलकर्णानयनम्	
स्फुटीकरणकालनियमः	
चलनकालनिर्णयः	
चतुर्थकेन्द्रगतिनिर्णयः	
तदनुसाराद्वक्रादिकालानयनम्	

विषयाः	श्लोकाङ्काः
तिथ्यादिभोगकलानिर्णयः	२००
स्थूलतिथ्यादिसाधनक्रमः	२११
शुद्धिचयनिर्णयः	
अधिमासचयमाननिर्णयः	
स्थूलपञ्जिकाग्राह्यत्वकथनम्	
जगन्नाथस्तुतिः	२२१

अथ षष्ठप्रकाशे

विषयाः	श्लोकाङ्काः
विवाहादिषु सूक्ष्मपञ्जिकोपादेयत्वकथनम्	१
सूक्ष्मपञ्जिकासाधनप्रतिज्ञा	३
प्रथमचन्द्रबिम्बादिसिद्धिः	५
*तुङ्गान्तरपाक्षिकदिगंशफलैः सूक्ष्मचन्द्रानयनम्	६
भुजान्तरफलस्य नियमः	१६
चन्द्रस्य सूक्ष्मगत्यानयनम्	१७
पक्षस्य पूर्वार्द्धपरार्द्धनिर्णयः पादनिर्णयश्च	२३
ग्रहणकालार्थं चन्द्रसूक्ष्मगत्यानयनम्	२४
तुङ्गान्तरादीनां बीजत्वकथनम्	२७
स्थूलसूक्ष्मसारग्रहणम्	३१
दृक्कर्मणो ग्राह्यत्वाग्राह्यत्वनियमः	३३
वृद्धसंहितादिवाक्यैः सूक्ष्ममतस्य ग्राह्यत्वम्	३४
भविष्यत्काले चन्द्रबीजानयनोपायः	४७

विषयाः	श्लोकाङ्काः
पूर्वाचार्याणां स्थूलमताश्रयहेतुकथनम्	५७
अष्टाविंशतिसूक्ष्मनक्षत्रकथनं तदानयनञ्च	५८
ग्रहाणां संक्रान्तिकालनिर्णयः	६१
तिथ्यादीनां सन्धिकालकथनम्	६९
प्रतिमण्डलापमण्डलविमण्डलनिर्णयः	७३
*क्रान्तिपातभगणकथनं तदानयनञ्च	७५
ततोऽयनांशानयनम्	७९
दिवागतिकथनम्	८१
करणाब्दादिध्रुवकथनम्	८२
चलांशानां धनर्णत्वकथनम्	८३
तदुपयोगित्वकथनम्	८४
छायार्कस्फुटार्कान्तरादयनांशपरीक्षा	८८
*अयनांशपरीक्षान्तरम्	९१
क्रान्तिनिर्णयः	९२
*तत्र पक्षान्तरम्	९६
द्युज्यानिर्णयः	९७

विषयाः	श्लोकाङ्का.
*क्रान्तिगतिनिर्णयः	९८
सौम्ययाम्यगोलनिर्णयः	९९
क्षितिज्यानिर्णयः	१००
चरप्राणानयनम्	१०२
दिनरात्रिप्रमाणम्	१०३
विक्षेपहेतुकस्फुटक्रान्तिकथनम्	१०५
व्यवहाराय स्थूलचरकथनम्	१०६
सूर्योदयान्तरकथनम्	११३
तत्फलस्य धनर्णत्वकथनम्	११५
ग्रहाणां स्वाहोरात्रप्राणकथनम्	११९
स्थूलसावनदिनकथनम्	१२०
स्थूलसूक्ष्मदिनयोर्लग्नेतिकर्तव्यता	१२१
निरक्षदेशलग्नानयनक्रमः	१२२
चरसंस्कारेण स्वदेशलग्नानयनक्रमः	१२३
दशमलग्नकथनम्	१२४
होरादिविभागः	१२५
इष्टकाले लग्नस्फुटीकरणम्	१२६
स्फुटलग्नादिष्टकालानयनम्	१४१

विषयाः	श्लोकाङ्काः
मध्यलग्नानयनम्	१४२
अयनांशानुसारेण लग्नमाननिर्णय.	१५२
ग्रन्थारम्भकाले तत्तत्प्रमाणानि	१५२
गर्गाद्युक्तसूक्ष्मनक्षत्रक्रान्तिपात-राश्यादिलिखनप्रतिज्ञा	१५७
क्रान्तिपातस्य दिनगतिः	१५८
कारणाब्दध्रुव.	१५८
*पक्षान्तरेणायनांशानयनम्	१५९
क्रान्त्यादिलिखनप्रतिज्ञा	१६०
स्थूलनक्षत्रकलाविन्यासः	
सूक्ष्मनक्षत्रराश्यादिविन्यासः	
सध्रुवक्रान्तिपातपदकविन्यासः	
साधनार्कभुजखण्डानुसारेण क्रान्तिकलादिषड्विधन्यास.	
श्रीपुरुषोत्तमे पलप्रभादिदश-विधन्यासः	
जगन्नाथस्तुतिः	१६१

अथ त्रिप्रश्नाधिकारे सप्तमप्रकाशे

विषयाः	श्लोकाङ्का
उपकरणप्रशंसा	१-५
भूसमीकरणम्	
समवृत्तलिखनम्	
शङ्कुस्थापनम्	
छायाप्रवेशनिर्गमस्थाननिर्णयः	
मत्स्यरेखाभिर्दिक्साधनम्	

विषयाः	श्लोकाङ्काः
शङ्कुच्छायाकर्णनिर्णय.	१०
भुजकोटिकर्णकथनम्	
वर्गमूलानयनम्	
मूलावशेषप्रकारः	
रूपकलादिनिर्णयः	

विषयाः	श्लोकाङ्काः
शङ्कुस्वरूपकथनम्	१४
तदङ्गुलादेर्निर्णयः	
*नराग्रशङ्कुनिर्णयः	
स्थितिखण्डच्छायानिर्णयः	
*छायावृद्धिनिर्णयः	
शङ्क्वादिसंज्ञा	
आकाशे सममण्डलकथनम्	२२
विषुवन्मण्डलकथनम्	
तस्य नाडीवृत्तत्वम्	
उन्मण्डलकथनम्	
धुरात्रवृत्तकथनम्	
अग्रानिर्णयः	
अक्षांशलम्बांशनिर्णयः	
भुवोन्नतिनिर्णयः	
अक्षप्रभाकथनम्	
अक्षलम्बांशसाधनक्रमः	२४
स्वदेशविषुवच्छायानयनम्	
छायाकर्णानयनम्	
छायाकर्णान्मध्याकर्णानयनम्	
दिनार्धच्छायाकर्णानयनम्	
उन्मण्डलशङ्कुनिर्णयः	४१
यष्टिनिर्णयः	
दिनार्धशङ्कुनिर्णयः	
दृग्ज्याशङ्कुज्यानिर्णयः	
दिनार्धाभीष्टकालिकछायानिर्णयः	
भुजानिर्णयः	४६

विषयाः	श्लो
सममण्डलच्छायादिकथनम्	
सममण्डलकर्णनिर्णयः	
सममण्डलशङ्कुच्छायानिर्णयः	
भुजकेन्द्राच्छायार्कस्फुटानयनम्	
अग्रज्याकथनम्	
अग्राङ्गुलादिकथनम्	
कोणशङ्कुकोणच्छायाकथनम्	
कोणशङ्कुच्छायाकर्णमतानयनम्	५
करणीसाधनम्	
करणीनिर्णयः	
अक्षफलनिर्णयः	
कोणशङ्कुनिर्णयः	
दृग्ज्यानिर्णयः	
कोणशङ्कुच्छायाकर्णनिर्णयः	
उदयज्यानयनम्	
सूर्यस्य कोणोदयास्तमयनिर्णयः	
क्रान्त्यादीनामसकृत्कर्मकथनम्	
अभीष्टकालच्छायानयनम्	
छायातः कालानयनम्	
तदुपयोगिनतोत्क्रमज्याकथनम्	
अन्त्यानिर्णयः	
उन्नतज्यानिर्णयः	
छेदनिर्णयः	
शङ्क्वानयनम्	
नतप्राणनिर्णयः	
*पश्चात्तरैव नतासुनयनम्	
सूक्ष्मप्राणानयनम्	

विषयाः	श्लोकाङ्काः
*छायार्कसाधनानन्तरम् सममण्डलशङ्कुनिर्णयः *वक्ष्यमाणध्रुवानुसारेण राशिदृक्काणनयनम्	८५
गगनाङ्गसाराब्दे द्वाविंशत्ययनांश-सिद्धत्वप्रयुक्तपक्षकथनम् ग्रन्थगौरवाच्छ्लोकविस्तारत्यागः	९३
जगन्नाथस्तुतिः	९४

अथाष्टमप्रकाशे

विषयाः	श्लोकाङ्काः
चन्द्रसूर्यग्रहणप्रतिज्ञा ग्रहणसम्भवः	५
*विशेषकल्पना समपर्व्वकालनिर्णयः *रविचन्द्रयोः समकलीकरणम् *रविचन्द्रयोर्बिम्बव्यासयोजन-प्रमाणम्	१२
मध्यमार्गकर्णस्फुटमार्गकर्ण-योजनप्रमाणम् *बिम्बमानकलानयनम्	१५
*मन्दकर्णानयनम् स्फुटकर्णानयनम् *पक्षान्तरे बिम्बमानानयनम्	२०—२१
*भूच्छायादैर्घ्यानयनम्	२५
*तमोमाननिर्णयः	२७
ग्रहणतत्त्वनिर्णयः वेदपुराणमतसमाधानम् ग्रहणदिङ्निर्णयः *चन्द्रपाते दिगंशफलसंस्कारः	३१

विषयाः	श्लोकाङ्काः
*चन्द्रविक्षेपानयनम् शरस्य दिङ्निर्णयः	३५
विक्षेपखण्डविन्यासः *पक्षान्तरेण शरानयनम् ग्राससम्भवकथनम् सर्व्वग्रासनिर्णयः	४०
निमीलनोन्मीलनविमर्द्दकथनम् ग्रहणमध्यकालकथनम् मध्यात्स्थित्यर्द्धकालानयनम् विमर्द्दार्द्धकालानयनम् स्पर्शनिमीलनोन्मीलनमोक्ष-कालानयनम् स्पर्शादीनामसकृत्कर्मकथनम् *विशेषतः सकृत्कर्मणा स्फुटपर्व्व-शरग्रासादिकथनम्	४५
*दृक्सिद्धतमोमानप्रतिज्ञा इष्टकालात् ग्रासानयनम् तत्र भुजकोटिकर्णविचारः	५१
इष्टग्रासात्कालनिर्णयः आयनवलनानयनम्	५७

विषयाः	श्लोकाङ्काः
आद्यवलनानयनम्	६०—६४
स्फुटदिग्वलनानयनम्	
चन्द्रोदयास्तमयनिर्णयः	
*चन्द्रदिनमानकथनम्	६९
याम्यसौम्यकदम्बनिर्णयः	
कदम्बावलननिर्णयः	
मतान्तरकथनम्	
*वृत्तद्वयावलनोपपत्तिः	
तत्र क्रान्तिज्याचरज्याविचारः	७८
*अवतमसनिर्णयः	

विषयाः	श्लोकाङ्काः
ततस्तमोमानानयनम्	८४
*तमसो दृक्सिद्धिकथनम्	
*तत्र युक्तिकथनम्	
तत्र गणितक्रमः	
*अन्धतमसनिर्णयः	
ग्रहणवर्णभेदनिर्णयः	८६
ग्रस्तचन्द्रसूर्य्ययोः शृङ्गोत्पत्तिकथनम्	
जगन्नाथस्तुतिः	८७

अथ नवमप्रकाशे

विषयाः	श्लोकाङ्काः
सूर्य्यग्रहणोपयोगिलम्बनादिकथनप्रतिज्ञा	४
लम्बनोपपत्तिः	
समपर्व्वकालकथनम्	
नतिलम्बनाभावस्थानविशेषकथनम्	
समपर्व्वलग्नानयनम्	११
वित्रिभलग्नानयनम्	
तत्क्रान्तेरक्षांशैः संस्कारः	
नतोन्नतसाधनम्	
दृग्गतिनिर्णयः	
परमनतिपरज्यानयनम्	
*पक्षान्तरेण धरानयनम्	१५
लम्बनज्याधनुरानयनम्	
तस्य धनर्णत्वकथनम्	

विषयाः	श्लोकाङ्काः
असकृत्कर्म्मणा स्फुटलम्बनानयनम्	१५
सकृत्कर्म्मणा सूक्ष्मलम्बनानयनम्	२०
*लम्बने संस्कारविशेषः	
स्फुटपर्व्वकालानयनम्	
ततः समपर्व्वकालसिद्धिश्च	२५
स्फुटपर्व्वकालिकचन्द्रपातशरानयनम्	
स्फुटपर्व्वलग्नत्रिभोनलग्नक्रान्त्यानयनम्	
शरादिनिर्णयः	३०
मध्योदयज्यानयनम्	
दृक्क्षेपानयनम्	
*सूक्ष्मदृक्क्षेपानयनम्	

विषयाः	श्लोकाङ्काः
*स्थूलसूक्ष्मदृक्क्षेपयोः स्फुटीकरणम्	३४
अवनत्यानयनम्	
*प्रकारान्तरकथनम्	
*स्फुटदिक्शरानयनम्	
*देशविशेषेषु दृक्क्षेपकथनम्	४१
*तत्सीमानार्थं मन्दकर्णानयनम्	
*शङ्कुदृग्ज्यानतिभिस्तमकर्णानयनम्	४५
*स्फुटतमसाधनम्	
*प्रकारान्तराभ्यां तत्साधनम्	
*कालहारानयनम्	४९
*देशविशेषेषु पृथक्साधनोपदेशः	
स्पर्शमोक्षस्थित्यर्धानयनम्	५४

विषयाः	श्लोकाङ्काः
स्पर्शादिलम्बनसाधनम्	६१
शरकालयोरसकृत्कर्मणा स्थिरीकरणम्	
स्फुटकालानयनम्	
*तत्र प्रकारान्तरकथनम्	
*वलयग्रासनिर्णयः	
*वलयस्थितिकालानयनम्	६८
*शरविशेषादुदयस्थ्यादिभिः स्फुटग्रासकथनम्	
ग्रहणद्वयस्य ग्राह्यत्वविचारः	७७
*ग्रहणपरमकालकथनम्	
प्रसङ्गात् सूक्ष्मतिथ्यादिपरमक्षयवृद्धिकथनम्	
जगन्नाथस्तुतिः	७८

अथ दशमप्रकाशे

विषयाः	श्लोकाङ्काः
छेद्यकप्रतिज्ञा	५
शङ्कुच्छेदनिर्णयः	
बिम्बशरयोगार्धग्रासाङ्गुलानयनम्	
खवृत्तसमासवृत्तग्राह्यबिम्बलेखनम्	११
दिक्साधनम्	
वलनन्यासः	
तस्य दिग्विवेकः	
शरप्रसारणम्	
स्पर्शमोक्षस्थाननिर्णयः	१४
मध्यग्रहणपरिलेखः	

विषयाः	श्लोकाङ्काः
ग्राहकमार्गकथनम्	२१
तद्विभागैर्निमीलनोन्मीलनज्ञानम्	
*इष्टकालिकग्रहणप्रत्यक्षीकरणम्	
*शलाकाप्रसारणाद्युपायः	२३
*वलनचालनप्रकारः	
*सूर्यग्रहे मासविशेषफलके प्रतिरूपदर्शनम्	२५
अनुपयोगाद्भूतवर्जनम्	२६
जगन्नाथस्तुतिः	२७

अथैकादशप्रकाशे

विषयाः	श्लोकाङ्काः
ग्रहयुतिप्रतिज्ञा युद्धसमागमनिर्णयः ग्रहयोः शीघ्रमन्दगतिभेदेन ऋजुवक्रगतिभेदेन गतैष्ययुतिव्यवस्था	५
ग्रहयोः समलिप्तीकरणम् दिनादिफलैः पुनःस्थिरीकरणम् कुजादिपातानां तृतीयफलसंस्कारः	९
बुधशुक्रपातयोर्मान्द्यफलसंस्कारः स्थूलविक्षेपानयनम् सूक्ष्मविक्षेपार्थं बुधशुक्रयोः शरशीघ्रनिर्णयः कुजगुरुशनीनां मन्दस्पष्टत्वनिर्णयः	१६
पातोनग्रहकथनम् क्षेपकर्णान्तरसाधनम् शरश्रुतिसाधनम्	२४
सूक्ष्मविक्षेपानयनम् आयनदृक्कर्मानयनम् पुनः समकलीकरणम् ध्रुवसूत्रसमीकरणम्	३१
स्फुटक्रान्तिकथनम् चरानयनम् नतोन्नतकालानयनम् तयोर्ज्यासाधनम् धनर्णत्वक्रमेण गतैष्यकालानयनम् आक्षदृक्कर्मणा ग्रहस्थिरीकरणम्	३७

विषयाः	श्लोकाङ्काः
*ताराग्रहाणां पञ्चविधबिम्बकथनम् *व्यासयोजनकथनम्	४१
*योजनानां कलीकरणम् मध्यबिम्बानां मानविकलाकथनम् *उत्क्रमज्यादिभिर्गुणकानयनम् स्फुटबिम्बानयनम्	५०
*बुधशुक्रयोः सूर्यबिम्बे दृश्यतानिर्णयः *स्फुटभास्करबिम्बानां दृग्बिम्बत्वनिर्णयः *भानां दृग्बिम्बकथनम्	५५
उल्लेखाख्ययुद्धकथनम् भेदाख्ययुद्धकथनम् अंशुविमर्दाख्ययुद्धकथनम् अपसव्ययुद्धकथनम् *युद्धसमागमव्यवस्था कूटयुद्धनिर्णयः जयपराजयनिर्णयः	६९
भौमादीनां नतिलम्बननिर्णयः	७१
ग्रहतारायुतिनिर्णयः युतिकालनिर्णयः बुधशुक्रयोः सूर्यमण्डलभेदे कालनिर्णयः	७५
ताराग्रहाणां चन्द्रसमागमनिर्णयः चन्द्रताराग्रहयोर्लम्बनावनतिभ्यां समीकरणम्	८४

विषयाः	श्लोकाङ्काः
शराद्यादिना दिक्शरनिर्णयः	९०
भग्रहयुतिनिर्णयः	
तत्र छेदकनिर्णयः	१०१
ग्रहच्छायाकथनम्	
वर्णादिनिर्णयः	

विषयाः	श्लोकाङ्काः
नलकस्थापनम्	११०
शङ्कुशिखयोर्ग्रहद्वयदर्शनम्	
बिम्बप्रभेदव्यवस्था	
शुक्रग्रस्तसूर्यग्रहणकथनम्	
सूर्य्यात् तारकाणां भूमेस्ताराग्रहाणां दूरत्वनिर्णयः	
जगन्नाथस्तुतिः	१११

अथ द्वादशप्रकाशे

विषयाः	श्लोकाङ्काः
भग्रहयोगाय भानां ध्रुवादिप्रतिज्ञा	६
भध्रुवांशकथनम्	
भानां विक्षेपकथनम्	१४
तारासंख्याकथनम्	
भानामाकृतिकथनम्	१८
योगतारास्थितिकथनम्	२२
*तासां मानविकलाकथनम्	३४
लुब्धकादीनां ध्रुवांशादिकथनम्	
*अगस्त्यस्य ध्रुवादिविशेषः	४०
*सप्तर्षीणां व्यवस्था	५९
ध्रुवव्यवस्था	६२
मासांशकालांशक्षेपांशनिर्णयः	७०

विषयाः	श्लोकाङ्काः
ध्रुवभ्रमणनिर्णयः	७७
अंशानामल्पत्वबहुत्वनिर्णयः	
भध्रुवांशानां दृक्कर्मस्फुटविक्षेपकथनम्	
कदम्बध्रुवाभिमुखशरकथनम्	
नक्षत्रचलनक्रान्तिभेदकथनम्	८०
तेषां दिनरात्रिभेदः	
सार्व्वकालिकदृश्यादृश्यकथनम्	
ग्रहभयुतिसाधनम्	
*बिम्बभेदयोग्यनक्षत्रकथनम्	८६
*तद्योग्यनक्षत्रकथनम्	
रोहिणीशकटभेदकथनम्	
*छायापथस्थितिनिर्णयः	९२
*यन्त्रकरणकदृष्टिविशेषकथनम्	
जगन्नाथस्तुतिः	९३

अथ त्रयोदशप्रकाशे

विषयाः	श्लोकाङ्काः
ग्रहनक्षत्राणां सूक्ष्मोदयास्तमनप्रतिज्ञा तत्र नित्यनैमित्तिकत्वनिर्णयः उदयास्तमयदिङ्निर्णयः उदयास्तकालिकग्रहदृक्कर्मकथनम्	७
आद्यदृक्कर्मणि विशेषकथनम् विक्षेपहेतुकधनर्णत्वकथनम् कालांशलग्नान्तरनिर्णयः	१०
चन्द्रस्य विशेषः भानां दिनमानकथनम् तेषां दिङ्नियमः	१५
उदयास्तमयवर्ज्जितनक्षत्रकथनम् मानविकलानुसारादुदयास्तमयांशनिर्णयः	२४
शुक्रादीनामंशविशेषकथनम् उदयास्तमयगतैष्यत्वनिर्णयः तत्र गतगम्यकालनिर्णयः	३४
स्फुटास्फुटक्रान्तिक्रमाद्दृक्कर्मध्रुवकथनम् कालांशानां क्षेत्रांशत्वकथनम् योगताराणामुदयास्तमयध्रुवकथनम्	४१

विषयाः	श्लोकाङ्काः
*ग्रहर्क्षाणामस्तमयकारणकथनम् *दृङ्मण्डलांशसंस्कारनिर्णयः *देशविशेषे साधनाभावकथनम् *गतैष्यस्थूलकालकथनम्	५०
*अर्कबाहुफलकथनम् *चतुर्थकेन्द्रे धनर्णत्वकथनम् *स्फुटकेन्द्रनिर्णयः *कालांशार्द्धसंस्कारः *प्राक्प्रत्यक्स्थितिव्यवस्था *नतोन्नतांशकथनम् *उन्नतांशसंस्कारः *उन्नतज्यया उदयास्तमयध्रुवकथनम्	५७
*सायनार्कस्य मेषादिराशिस्थितौ शुक्रादीनामुत्कलदेशे क्षेत्रांशादिकथनम्	६८
*अन्यदेशे स्वोन्नतज्याक्रमाद्दृक्: *ग्रहसूर्यान्तरात् कालस्थिरीकरणम्	७२
*दृक्कर्मभ्यां स्फुटोदयास्तमयकालानयनम् *स्फुटचक्रचक्रार्द्धकालनिर्णयः *ततः पुनरुदयास्तकालनिर्णयः	८१
*एकांशोनत्वकथनम् उदयास्तमयोपपत्तिः *रविचन्द्रशुक्राणां प्रकाशांशकथनम्	८४
जगन्नाथस्तुतिः	८५

अथ चतुर्द्दशप्रकाशे

विषयाः	श्लोकाङ्काः
चन्द्रशृङ्गोन्नतिप्रतिज्ञा	६
दृक्कर्म्मसंस्कृतस्पष्टचन्द्रार्कयोर्मिथोदयास्तमयसाधनम्	
लघ्वन्तरप्राणैः सायनतदुभयोः कालांशानयनम्	
चलकर्म्मणा स्थिरीकरणम्	
सावनलनाशत्वनिरूपणम्	१०
दृक्चन्द्रसाधनोपायः	
चान्द्रसावनदिनानयनम्	
शृङ्गोन्नतिकालविवेकः	२५
चन्द्रस्थितेर्वक्रत्वोपपत्तिः सरलत्वोपपत्तिश्च	
आयनाक्षवैक्षेपवलनत्रयानयनम्	३०
चन्द्रार्कान्तराङ्गुलकोटिकर्णानयनम्	
वलनकलानामङ्गुलीकरणम्	
खवृत्तलेखनम्	
तत्र चन्द्रबिम्बन्यासः	३४
कपालद्वये न्यासव्यवस्था	
सूर्य्यबिन्दुन्यासः	
ज्योत्स्नोत्पत्तिचयनिर्णयः	
शुक्लाङ्गुलनिर्णयः	४०
बिन्दुत्रयन्यासः	
तत्त्रयान्तस्थवृत्तन्यासः	
किरणव्याप्तिनिर्णयः	
छेदके शृङ्गोन्नतिदर्शनम्	४५
*अनुभूतियुक्तिभ्यां सूक्ष्मत्ववर्णनम्	
*चन्द्रे कलायोगवियोगनिर्णयः	
*व्यर्कचन्द्रोत्क्रमज्यया शुक्लाङ्गुलादिकथनम्	५१
*छेदकन्यासव्यवस्था	
*रेखाचतुष्टयन्यासः	५५
*सूर्य्यस्थितिकल्पना	
*भूबिन्दुकल्पना	
*ऊर्द्ध्वाकाशकल्पना	
*कर्णसूत्रेण सितासितस्थितिदर्शनम्	६१
*पूर्व्वसिद्धान्तस्वकल्पनयोरन्तरग्रहणम्	
*यन्त्रद्वारा बुधशुक्रयोः शृङ्गोन्नतिदर्शनम्	६७
*शृङ्गोन्नतौ युक्तिविशेषः	
दृक्सिद्धौ परमतखण्डनम्	
तिथिभेदेषु दृश्यभागकथनम्	
जगन्नाथस्तुतिः	६८

अथ पञ्चदशप्रकाशे

विषयाः	श्लोकाङ्काः
महापातप्रतिज्ञा	५
वैधृतिव्यतिपातकथनम्	
चन्द्रार्कगोलायनसन्धिकथनम्	
क्रान्तिसाम्यकथनम्	
व्यतिपातवैधृतिसम्भवकालः	
तत्स्वरूपकथनम्	१२
विक्षेपहेतोर्भावाभावकथनम्	
तत्साधननिर्णयः	
योगपादविशेषे तन्मध्यकालनिर्णयः	२०
चक्रचक्रार्द्धकालसमीकरणम्	
शुभकर्म्मादिनिषेधः	
गतगम्यकालनिर्णयः	२५
समकलीकरणम्	
रवीन्दुक्रान्त्यन्तरानयनम्	
क्रान्तिगतिसाधनम्	३३
कालगतिक्रान्त्योरसकृत्कर्म्मकथनम्	
स्पर्शमोक्षप्रतिज्ञा	४२
रवीन्दुमानयोगार्द्धानयनम्	
मध्यस्थित्यर्द्धकथनम्	
स्थित्यर्द्धयोः स्थिरीकरणम्	
मध्यकालस्य दारुणत्वकथनम्	५०
स्नानादौ पुण्यदत्वकथनम्	
तत्कालज्ञानफलकथनम्	
स्थितिकालस्यावधिनिर्णयः	

विषयाः	श्लोकाङ्काः
सन्निध्यौ द्विवारसम्भवनिर्णयः	५०
गोलायनभेदयोः ग्राह्याग्राह्यत्वोपपत्तिः	
विचित्रस्य क्रान्तिसाम्यस्यावश्यकत्वम्	५८
वैधृतिव्यतिपातयोगकथनम्	
भसन्धिगण्डान्तकथनम्	
दुष्टलग्नवांशादेस्त्याज्यत्वकथनम्	
स्वाभीष्टविषयाविष्कारः	६०
सृष्टिकालकथनम्	
सृष्ट्यब्दकथनम्	
सृष्ट्यादौ सर्व्वारम्भकथनम्	
कल्पादौ युगादिप्रवृत्तिकथनम्	
पात्रकमेघाढकादीनां कादाचित्कतया कथनाभावः	६५
रविचन्द्रयोर्द्वापरान्तध्रुवाभावकथनम्	
करणाब्दानां कुजवारारम्भकथनम्	
तत्पूर्व्वदिनस्य ग्रहध्रुवयोग्यताकथनम्	
मध्यमचैत्रादितिथेर्वारादित्वप्रतिपादनम्	
कल्यब्दतः शोध्यवर्षैर्विक्रमाब्दकथनम्	६८
सिद्धान्ततन्त्रकरणकथनम्	
एतच्छास्त्रस्य सर्व्वाधारत्वकथनम्	

विषयाः	श्लोकाङ्काः
सिद्धान्तिप्रभृतीनां दर्शनफलकथनम्	६९
मत्सरसूचिनो दोषकथनम्	
भास्कराद्युक्तभभुवाधिक्यवर्णनम्	

विषयाः	श्लोकाङ्काः
भचक्रे मेषादिस्थानस्यान्यथाभावे मतान्तरत्यागकथनम्	७०
ब्रह्मायुर्भोगस्य द्वैविध्यकथनम्	
ग्रहगणितस्योपादेयाभ्यर्थनम्	
जगन्नाथस्तुतिः	७१

अथ ग्रहगोलाख्योत्तरार्द्धे गोलाधिकारे षोड़शप्रकाशे

विषयाः	श्लोकाङ्काः
पूर्व्वसिद्धान्तस्थूलत्वप्रतिपादकपरमेश्वरनमस्कारः	५
मध्यस्पष्टसूर्य्यनमस्कारः	
उपकारित्वप्रतिपादकभास्कराचार्य्यनमस्कारः	
जगन्नाथध्यानपूर्व्वकगोलगणितप्रतिज्ञा	
गोलप्रशंसा	११
गोलानभिज्ञनिन्दा	
गोलस्य क्षेत्रविशेषत्वम्	
गोलज्ञानार्थं गणितावश्यकता	
ज्योतिषशास्त्राधिकारिकथनम्	
गुरुशिष्यसंवादव्याजेन शिष्यप्रश्नकथनम्	१६
सन्देहोद्भावनकथनम्	
भूगोलस्वरूपप्रश्नद्वारा मतान्तरोद्भावनम्	
पौराणिकमतप्रकाशः	२४

विषयाः	श्लोकाङ्काः
बौद्धजैनमतप्रकाशः	३७
भूभ्रमणमतप्रकाशः	
पूर्व्वसिद्धान्तमतप्रकाशः	४१
आर्य्यभटमतप्रकाशः	
स्वमतकारणप्रश्नः	
सृष्टिक्रमप्रश्नः	४८
साङ्गोपाङ्गभूस्थितिप्रश्नः	
तद्व्यासपरिधिघनफलादिप्रश्नः	
ऊर्द्ध्वाधरस्थलोकानां प्रश्नः	
पूर्व्वाचार्य्यकृतभगणेभ्यः स्वप्रोक्तभगणानां प्रामाण्यप्रश्नः	
संवत्सरप्रभेदप्रश्नः	५२
पदकप्रश्नः	
ग्रहस्फुटीकरणप्रश्नः	
अतिरिक्तसंस्कारप्रश्नः	
परिधिसम्भवप्रश्नः	
तत्र न्यूनाधिकत्वप्रश्नः	

विषयाः	श्लोकाङ्काः
भुजमतिफलयोर्धनर्णत्वप्रश्नः	५५
क्रान्त्यल्पत्वप्रश्नः	
दिनरात्रिलग्नवैषम्यप्रश्नः	
ऋतुफलप्रश्नः	६०
सूर्यचन्द्रयोर्मानाधिक्यन्यूनताप्रश्नः	
लम्बनावनतिप्रश्नः	
मध्यलग्नवित्रिभलग्नयोः साधुत्वप्रश्नः	
शरान्तप्रश्नः	
तमोवृद्धये शङ्कुकल्पनाप्रश्नः	६६
शरनतनदिग्भेदप्रश्नः	
ग्रहकक्षान्तरप्रश्नः	
मध्यस्फुटशरयोर्न्यूनाधिकत्वप्रश्नः	
तमोऽतिप्रश्नः	
ग्रहाणां किरणव्याप्तिप्रश्नः	७०
दृष्टिसीमाप्रश्नः	
खकक्षाप्रमाणप्रश्नः	
गिरावुदयास्तमयप्रश्नः	
देवानां चन्द्रकलापानप्रश्नः	७५
सौम्यशृङ्गोन्नतिबाहुल्यप्रश्नः	
महापाते रवीन्दुदृष्टिसङ्गतिप्रश्नः	
महरादिलोकभ्रमणप्रश्नः	
दिनाधिपादिक्रमप्रश्नः	
पैत्र्यदैवब्राह्मदिनप्रश्नः	
प्रलयभेदवर्षभेदप्रश्नः	७९
कालयन्त्रमानयन्त्रप्रश्नः	
षड्तुसाम्यवैषम्यप्रश्नः	
भगणोपकारप्रश्नः	
जगद्गमनोत्तरप्रश्नः	
चन्द्राङ्कतत्त्वप्रश्नः	
समाधिरहितानां मोक्षदप्रश्नः	
अनायासपञ्चाङ्गज्ञानप्रश्नः	
जगन्नाथस्तुतिः	८०

अथ सप्तदशप्रकाशे

विषयाः	श्लोकाङ्काः
शिष्यप्रश्नद्वारा मतविशेषदर्शनानन्तरं गुरुवाक्येनोत्तरदानम्	५
प्रमाणत्रयव्यवस्थाभिर्भूग्रहाणां स्थिरचलत्वगोलत्वप्रतिपादनम्	
भूगोलस्थित्या निजसिद्धान्तप्रदर्शनम्	
सूर्यसिद्धान्तसिद्धान्तशिरोमणिवाक्योदाहरणम्	
भूधारकानङ्गीकारः	५
विरोधिप्रत्युत्तरद्वारा स्वमतस्थिरीकरणम्	
कूर्मादीनां धारकत्वसमाधानम्	११
भूकम्पादिसमाधानम्	

विषयाः	श्लोकाङ्काः
भूपतननिवारणम्	१६
विषयारोपादिभिर्भूविस्तारकथासमाधानम्	
चक्राकारदर्शनकारणकथनम्	२०
मुकुरोदराकारनिवारणयुक्तिः	
परिधिशतांशस्य समत्वकथनम्	
देशान्तरकथनेन भूपरिधियुक्तिः	२७
भूसमत्वे रविशशिदर्शनविरोधः	
बहुदृष्टान्तैर्महत्त्वप्रतिपादनम्	
अनन्तेति-वाक्यसमाधानम्	३२
पुराणाद्युक्तग्रहस्थितिसमाधानम्	
ध्रुवमत्स्यदृष्टान्तेन बौद्धमतखण्डनम्	३८
भूभ्रमणप्रतिपादकसूक्ष्ममतखण्डनारम्भः	४०
स्थिरत्वप्रत्यक्षेण चलत्वनिवारणम्	
प्रत्यग्वातदृष्टान्तेन प्राग्भ्रमणनिराकरणम्	४४
प्रवहवायोरस्तित्वकथनम्	
आगमवाक्यद्वारा स्थिराशब्दप्रमाकरणम्	
जगच्छब्दस्य समाधानम्	४७
अनुमानद्वारा भूस्थिरत्वदृढीकरणारम्भः	
रविशक्तिद्वयकरणकभूभ्रमणे केन्द्राभिमुख्यसिद्धेर्दिनरात्रिपरिवर्त्तनाभावप्रतिपत्तिः	५४

विषयाः	श्लोकाङ्काः
परिधिमानात् भूगोलगतिबहुत्वादसङ्गतिकथनम्	५६
क्रान्तिमार्गाभिमुखभ्रमणसिद्धौ चन्द्राङ्कस्थितिदृष्टान्तेन नक्षत्रोदयदिग्भेदापत्तिः	६५
याम्यसौम्यक्रान्तिपथसरलत्वे रविचन्द्रकलङ्कदर्शनविसंवादकथनम्	६८
ईश्वरेच्छाप्रामाण्ये भूस्थिरत्वमननम्	७२
आकर्षणे स्थूलसूक्ष्मपरिहारेण शक्तिमात्रस्वीकारः	
क्षुद्रपरितः स्थूलभ्रान्तावीश्वराधीनत्वस्वीकारः	
इतराचारदर्शनात् स्वस्वभावापरित्यागदृष्टान्तेन सूर्यादिभ्रमणेऽपि भूस्थिरत्वप्रतिपत्तिः	७६
क्षुद्रबिम्बभ्रमणविलम्बात् बृहद्बिम्बभ्रमणवेगादीश्वरदत्तस्वभावस्वीकारः	
बृहद्भ्रमणवेगक्षुद्रभ्रमणविलम्बमनने सूर्यभ्रमणदृष्टान्तेन तदसिद्धिकथनम्	७८
विचित्रवस्तुशक्तिदृष्टान्तेन भूस्थिरत्वस्वीकारः	
नैसर्गिकगुरुत्वलघुत्वदृष्टान्तकथनम्	
ग्रहभगणमूलभावाभावप्रश्नद्वारा शुक्रादिविसंवाददर्शनपूर्व्वकस्फुटार्ककेन्द्रत्वनिवारणम्	८७

विषयाः पृष्ठाङ्काः

मध्यार्कस्य ग्रहकक्षाकेन्द्रत्वस्थापनम्
स्फुटार्कस्य केन्द्रत्वेऽपि क्रान्तिसाम्ये सौमविम्बभ्रान्तिकल्पकभूभ्रान्तौ विदिशि ध्रुवदर्शनापत्तिः
भूमेर्ध्रुवपार्श्वभ्रमणे तदाकृष्टचन्द्रस्य क्रान्तिबाधापत्तिः
उभयथा भूभ्रमणासिद्धिः ९२
भूमेर्बुधादिसाधर्म्येण त्रिमध्यमभ्रान्तिसिद्धौ रवेर्विषुवायनच्छायाद्यसिद्धिः
तत्र भूमेर्बुधादिवैधर्म्यदर्शनान्निश्चलतानिश्चयः १००
सूर्यस्य ग्रहेभ्यो वस्तुभेदहेतुकविभक्तताभावकथनम्
चन्द्रभूवैधर्म्यदर्शनम् १०४
आरकेन्द्रदृष्टान्तस्थिरसूर्यस्य गणितेनास्थिरत्वसिद्धिः १०७
तत्कल्पनया स्थैर्यदर्शनम् १११
पतिताश्मस्य पूर्वगतिनिश्चितभूभ्रमणनिराकरणम् ११५
ग्रहमार्गघनाङ्कभगणकालवर्गानुपातनियमसिद्धभूभ्रमस्य ग्रहान्तरकल्पनया सूर्यस्थभ्रमकालविम्बव्यासपरस्परविरोधरूपकारणसाक्षात्कारेण कार्यरूपान्यग्रहकालमार्गनियमवैयर्थ्यकथनम् १२८

विषयाः पृष्ठाङ्काः

मान्द्यशैघ्र्यफलक्षयवृद्धिदर्शनात् कुजबुधयोर्भूसूर्यानुभ्रमणान्तरेण दृक्फलासिद्धौ रविभुवोश्चलाचलत्वसिद्धिः १३३
भौमयुग्मपदान्तशीघ्रपरिधिभागान्तरदर्शननिश्चितश्रुतिकभचक्रोदयस्थायनान्तोदयकालिकस्थानभेदसिद्धौ तद्दर्शनात् भूस्थिरत्वसिद्धिः १३९
भूभ्रमणतीक्ष्णाचलभचक्रस्य क्रान्तिवृत्तसहितस्थायनांशवत्पृथक्प्राक्पश्चाद्गमनसाक्षात्कारागतग्रहभ्रमणसिद्धौ भूमेः स्थिरत्वसिद्धान्तः १४१
अचलताराणां सूर्यत्वमतेऽप्यसंख्यत्वात् तमोनाशकत्वं तदभावाद्दिव्यज्योतिरभावे भौमज्योतिस्वीकारः
यज्ञाधिकरणकरविलुब्धकसाम्यदर्शने लुब्धकतेजोहानौ कल्पितच्छिमाद्याकर्षणनिराकरणम् १४४
ग्रहतारकयोः स्थिरचलाभ्योदर्शनकल्पितातिदूरत्वच्छिमाद्यसिद्धिपूर्वकज्वलदग्निसाधर्म्यस्वीकारः १४५

विषया: श्लोकाङ्का:
भूकेन्द्रद्वयचिपिटत्वकल्पितधात्रि-भूमध्यान्तिमतपक्षविशेषात्कृते-रीश्वरस्य दृष्टिविरोधी भूभ्रान्ति-कल्पनादूषणम् १४६
भूभ्रमकथनस्य चरासुकरत्वे-दीश्वरशक्तिस्वकथनेन दोषाभाव: १४७
दोषदृष्टान्तेनेश्वरदुर्घटनाकथनम् १४८
क्रीडायां दुर्घटनादोषाभावदृष्टान्त: १४९
भूमेरीश्वरानन्तशक्तित्वादपत-नाध्यस्थितियुक्ति: १५०
विषया: श्लोकाङ्का.
शेषकवितथा भूमेराह्निकवार्षिक-भ्रान्तिरूपविविधगतिप्रत्यादेश: १५१
बहुविधलिङ्गैर्भूस्थिरत्वपुनरुक्ति: १५२
साक्षिसिद्धान्तोदाहरणाधिकार: १५४
स्वसिद्धान्तनिर्णयपूर्वकगणकप्रार्थना १५६
जनस्य दैवाधीनत्वात् दोषाभाव-कथनम् १५७
पुनर्मतान्तरसूचनया स्वमतव्यञ्जनम् १५८
युक्तिविस्तरकारणोक्ति: १५९
रूपकेन स्वसिद्धान्तप्रशंसापूर्वक-अगणकाभ्यनुतिरीक्षा १६०

अथाष्टादशप्रकाशे

विषया: श्लोकाङ्का:
कामानतप्रताभीष्टदेवनमस्कार: १
पूर्वप्रश्नानुवादसृष्टिकथनप्रतिज्ञा २
पौरमतसृष्टिकथनम् १२
सूर्यादिस्वरूपविशेष: १९
चन्द्रकलापरिचयनिर्णय: ३४
कालक्षोपपत्ति: ३७
आप्यतैजसनिर्णय: ४०
भूमेर्जलस्थलविभागकथनम् ४७
द्वीपसागरव्यवस्था ५१
*विस्तृतगीतादिमतयुक्ति: ५३
*तत्र गणितक्रमारम्भ: ५५
शङ्कुकथनम् ५६
उत्क्रमज्याकथनम् ५८
विषया: श्लोकाङ्का.
*दृष्टिसीमानिर्णय: ५९
हिमालयोदाहरणम् ६१
तत्र दृश्यादृश्यविभाग: ७०
सम्प्रत्यक्षतानिर्णय: ७९
*तदुपरिदृक्सीमाकथनम् ८०
विस्तृतगीताद्युक्तसुमेरुयुक्ति-सद्व्यवस्था च ८८
*भारतसंस्थानम् ९०
सागरसंस्थानम् ९१
द्वीपभेदकथनम् ९३
*सद्भावाभावविवेक: ९७
*क्षीरोदादिविवेक ९९
ग्रन्थान्तरालोकनाद्दूषणम् १००

विषयाः श्लोकाङ्काः
गोले देवासुरविभागकथनम् १०४
अक्षांशद्राघिमनिर्णयः १०५
निरक्षनिर्णयः १०६
स्थिरवायुकथनम् १०७
सुमेरुकथनम् १०८
ब्रह्माण्डावरणकथनम् १११
भास्करोक्तगोलादिप्रलयान्तविवरणम् १५२
स्वमतभूव्यासपरिधिकथनम् १५३
पृष्ठफलघनफलकथनम् १५४

विषयाः श्लोकाङ्काः
*जलस्थलयोजननिर्णयः १५५
भास्करोक्तिदर्शनम् १५६
*मतान्तरयुक्तिः १५७
*घनपृष्ठफलोदाहरणम् १६८
मानाङ्गुलादियोजनान्तनिर्णयः १७२
*तद्विवादस्वमतसमाधानम् १७४
*घनफलस्य पञ्चाशत्कोटि-
योजनत्वसिद्धिः १७५
जगन्नाथस्तुतिः १७६

अथोनविंशप्रकाशे

विषयाः श्लोकाङ्काः
त्रिविधसृष्टिः, कारणात्मकमण्डल-
पञ्चककथनम् १
सुमेरुकथनम् २
लोकग्रथनकथनम् २
वायुसप्तककथनम् ३
प्रवहभ्रमणे ग्रहाणां नैसर्गिकगति-
दृष्टान्तः ५
ग्रहाणां नानाविधकक्षाकथनप्रक्रिया ७
*कक्षाणां मध्यशीघ्रत्वनिर्णयः ११
*योजनप्रमाणकथनम् १५
*कक्षातः शीघ्रपरिधिनिर्णयः १६
मध्यस्फुटकर्णनिर्णयः २२
*ग्रहाणां दिनगत्यानयनम् २३
*गतियोजनकथनम् २४
*मते कालात्मकगतिकथनम् २७

विषयाः श्लोकाङ्काः
*भचक्रगतिनिर्णयः ३१
*पूर्वसिद्धान्तोक्तकक्षापरिलेखकथन-
द्वारा फलानां विसंवादोपपत्तिः ३४
वक्रगत्युपपत्तिः ३६
*ग्रहाणां मध्यार्कभ्रमणस्फुटत्वम् ३७
*कुजवक्रगतिसाक्षात्कारसिद्धकक्षा-
महत्त्वात् पूर्वसिद्धान्तकथित-
कक्षाल्पत्वखण्डनम् ४१
*तथा चन्द्रचापवृद्धिविसंवादकथनम् ४५
*उपनिषत्प्रमाणदृक्सिद्धिभ्यां सूर्ये-
न्दूनां बिम्बकक्षापरिधिमान-
व्यासकथनम् ५३
चन्द्रकक्षाबिम्बयोरल्पत्वकथनम् ५५
भूकक्षानिर्णये युक्तिः ५७
*ताराबिम्बोपपत्तिः ६०

विषयाः श्लोकाङ्काः
*ताराबिम्बानयनोपायकथनम् ६९
*अथ प्रसङ्गतः शङ्कुच्छायादिघटनया द्वीपद्रुमपर्व्वतादिमानोन्नतिकथनम् ७७
*एकशङ्कुद्विशङ्कुस्थापनप्रकारः ७८
*पर्व्वतस्य दृश्यादृश्यभागादिनिर्णयः ७९
*रविचन्द्रजन्यच्छायया प्रासादाद्युन्नतिज्ञानम् ८२
तैर्वोन्नतियुक्तिकथनम् ८५
*अथ भूमेर्गोलतापरिचयार्थं शङ्क्वादिविशेषकथनम् ८६
क्षितिजवृत्तनिर्णयः ८७
*दृष्टिसीमानुसारेण पर्व्वतदृश्यादृश्यत्वनिर्णयः ८८
*पर्व्वताग्रे सूर्य्योदयास्तमयदर्शनादिनवृद्धिकथनम् ९०

विषयाः श्लोकाङ्काः
*व्यवहारे तत्त्यागकथनम् ९९
*भूपरिधिहस्तप्रमाणादेकादशविधशङ्कूनां दृष्टिसीमकथनम् १००
*शङ्कोर्दृष्टिसीमानयनम् १०१
*दृष्टिसीम्नः शङ्क्वानयनम् १०२
*एकहस्तशङ्कुदृष्टिसीम्नोऽभीष्टशङ्कुदृक्सीमानयनम् १०२
पूर्व्वसिद्धान्तानुसाराद्दिनाब्दहोरामासाधिपप्रवृत्तिकथनम् १०७
*दिव्यभौमतेजस्तारतम्यानुभवात् सूर्य्यादीनां किरणव्यक्तिदृष्टिसीमाव्यवस्था ११४
*आकाशकक्षाप्रमाणकथनम् ११९
*तत्र युक्तिद्वारा मतान्तरखण्डनम् १२२
वेदपुराणमतसमाधानञ्च १२३
जगन्नाथस्तुतिः १२४

अथ विंशप्रकाशे

विषयाः श्लोकाङ्काः
यन्त्रसंग्रहावश्यकत्वात्तन्निर्म्माणप्रतिज्ञा १
गोलयन्त्रस्य द्वैविध्यकथनम् २
तत्रैकस्य प्राचीनत्वमपरस्य नव्यत्वकथनम् ३
निर्म्माणादौ सूर्य्यादिपूजावश्यकत्वकथनम् ४
भूगोलमेरुदण्डनिर्णयः ७
स्तम्भद्वयस्थापनम् ८

विषयाः श्लोकाङ्काः
आधारकक्षाक्षितिजवृत्तसन्निवेशः ११
नाड़ीवलयध्रुवाक्षवृत्तसम्बन्धनम् १४
फलकद्वयन्यासः १६
अंशांशात्मकवलयन्यासः १८
तेषां दृढ़ीकरणम् अपमण्डलबन्धनञ्च २०
स्वस्तिकनिर्णयः २१
विमण्डलबन्धनम् उन्मण्डलबन्धनञ्च २६
क्षितिजवृत्तस्य सर्व्वाधिकत्वकथनम् २७

विषयाः श्लोकाङ्काः
भूगोलरचनानन्तरं ग्रहदर्शविन्यासः २९
ग्रहचलनप्रत्यक्षगतिनिर्णयः ३०
खड्गास्थितिस्वदेशस्थितिकथनम् ३१
सूत्रषट्केन खगोलरचना ३२
सममण्डले दृङ्मण्डलयोगकथनम् ३३
गोलस्थापनप्रकारः ३४
चक्रांशदर्शननिर्णयः ४१
गोलभ्रमणकथनम् ४१
पूर्व्वसिद्धान्तोक्तानेकचक्रयन्त्रकथनम् ४२
बहुकार्य्यनामकनव्ययन्त्रकथनम् ४३
*ग्रहचलनादिसाधनोपकाराय स्वकल्पित-बहुकार्य्ययन्त्रकथनप्रतिज्ञा ४५
*धनचक्रयुगसन्निवेशः ४६
*एकत्र भूचन्द्रस्थितिः ५०
*अपरत्रान्यग्रहस्थितिः ५१
*रविपरितो ग्रहचक्रचालनकथनम् ५२
*ग्रहकक्षाङ्गुलप्रमाणकथनम् ५७
*ग्रहचक्रयष्टिप्रवेशः ६१
*वलयावकाशतनुबहुत्वकथनम् ६२
*यष्टिचालनकथनम् ६५
विषयाः श्लोकाङ्काः
*प्रकृतभूकक्षायां ग्रहदर्शनप्रकारः ६६
*भूकक्षानिर्म्माणविकल्पः ७१
*ऋजुवक्रतादर्शनं तत्र सावधानता-कथनञ्च ७४
*कालयन्त्रप्रतिज्ञा ७५
*चक्रादिसंज्ञाकथनम् ७७
*गोलार्द्धयन्त्रकथनम् ८०
*लग्नयन्त्रकथनम् ८१
*तत्र ग्रहभान्तरज्ञानम् ८३
*तत्र नैवतस्वस्याकारकथनम् ८६
*तत्र पर्व्वतादिमानानयनकथनम् ९१
*काचपाशादिकथनम् ९३
*कपालयन्त्रकथनम् ९५
*सूर्यवलययन्त्रस्य सन्नमनस्य च निर्णयः १०६
*गोलभ्रमणोपायान्तरकथनम् १०७
यष्ट्यादिगोलज्ञानफलकथनम् ११०
कृतघ्नादिषु रहस्यकथने प्रत्यवाय-कथनम् १११
जगन्नाथस्तुतिः ११२

अथैकविंशप्रकाशे

विषयाः श्लोकाङ्काः
प्रत्युत्तरव्याजाद्वासनादिग्दर्शनम् १
उन्मण्डलकथनम् २
तत्र चरानुसाराद्दिनरात्रिकथनम् ३
गोलानुसारादुदयास्तमयवासना ५
विषयाः श्लोकाङ्काः
दिनरात्रिह्रासवृद्धिवासना ६
देशविशेषाद्दिनरात्रिस्थितिकथनम् ७
देवासुरदिनरात्रिवासना ११
ब्रह्मदिनकथनम् १५

विषयाः	श्लोकाङ्काः
पितृदिनवासना	१६
क्षयाक्षयाहनिर्णयः	१८
क्षयवैषम्यवासना	२१
गोलभ्रमणाद्याधारगतिः	२२
सदा ह्यद्याद्युक्षपदेशकथनम्	२५
*ग्रहयोजनगतिसाम्यनिराकरणम्	२७
*गतितारतम्यव्यवस्था	२९
*शीघ्रफलादिदर्शनात् प्राक्सिद्धान्तमतेऽपि सूर्यस्य ग्रहकक्षाकेन्द्रत्वसिद्धिः	३०
*नैसर्गिकौपाधिकगतिकथनम्	३१
सद्युक्त्या पूर्वसिद्धान्तोक्तरवीन्दुभगणवर्षादिसंख्याभगणाद्यारम्भकथनस्य सत्यतामननम्	३८
युगभगणस्थौल्यकथनम्	३९
कल्पभगणसूक्ष्मताकथनम्	३९
*भास्करोक्तियोग्यतायोग्यताकथनम्	४९
सचीपकारिखननम्	५०
ग्रन्थकर्त्तुर्भगणानयनप्रकारकथनम्	५२
*भविष्यद्विसंवादे भगणसंख्याभेदनिर्णयः	६९
*अयनांशपरीक्षा	७०
*विशेषेण बृहस्पतिभगणागतप्रभवादिवत्सरकथनम्	७५
तद्गणनान्तरानुसारेण पदकादिविन्यासः	७७
*पदकानयनप्रक्रिया	८१
*स्फुटीकरणस्य भूलोकदृक्सिद्धिकथनम्	८४
*टीकान्तरेषु फलवासनातर्ककथनम्	८५
*भास्करोक्त्या फलोपपत्तिकथनम्	८६
*स्फुटीकरणे परिलेखविस्तरनिर्णय.	१०९
प्रतिमण्डलभ्रमणस्य दृष्टान्त.	११०
*रविचन्द्रमन्दकर्णाविशेषकथनम्	११४
*चन्द्रस्य तुङ्गान्तरफलोपलब्धिवासना	११५
*शीघ्रफलदर्शनार्थं छेदकविशेषकथनम्	११९
*अङ्गुलात्मककक्षागतिनिर्णय'	१२९
पूर्वसिद्धान्तोक्तगतिपरीक्षा	१४०
*संस्कारचतुष्टयोपपत्ति.	१४३
*परीक्षादीनां बीजत्वावधारणम्	१४६
*भास्करोक्त्या प्रतिमण्डलबिम्बप्रमाणकथनम्	१५१
*क्रान्त्यल्पत्वकथनम्	१५२
*ग्रहणे लम्बनभावाभावकथनम्	१५३
*दृङ्मण्डलदृक्सूत्रादिना लम्बनावनत्यादिवासना	१७०
*पातकालमानादिकथनम्	१८०
*ग्रहणे दिग्भेदनिर्णयः	१८३
*वलनद्वयोपपत्तिः	१९०
*ध्रुवकदम्बभेदाद्विक्षेपन्यूनाधिक्यकथनम्	१९३
*नीराद्युदयास्तमयनिर्णयः	१९६
*शृङ्गोन्नतिवासना	१९७
*महापातवासना	१९८

विषयाः	श्लोकाङ्काः	विषयाः	श्लोकाङ्काः
*भगणादिकपकारकथनम्	२०६	*घनमूलमूलावशेषकथनम्	२४९
*स्वांशविशेषाहतुनिर्णयः	२१०	*भास्करोक्तघनाङ्कक्रमकथनम्	२४९
*शीतोष्णसममण्डलकथनम्	२२३	गोलबोधफलकथनम्	२५०
*मेघोत्पत्तिवर्षणनिर्णयः	२३०	जगन्नाथस्तुतिः	२५०

अथ कालाधिकारे द्वाविंशप्रकाशे

विषयाः	श्लोकाङ्काः	विषयाः	श्लोकाङ्काः
कालात्मभगवद्वन्दनपूर्व्वकप्रतिज्ञा	१	मासविशेषकार्य्यकथनम्	४३
कालस्य द्वैविध्यकथनम्	२	रवेः षडशीत्यादिनिर्णयः	४८
कालकालाभिधस्य भगवतः स्मरणम्	१२	संक्रान्तिपुण्यकालनिर्णयः	६०
तस्यावयवविभागकथनम्	१४	पञ्चविधवर्षाणां सावनदिनादिकथनम्	७४
सिद्धान्तोक्तसृष्टेर्विरोधपरिहारः	१५	चन्द्रानुसारिजलोल्लासादिविस्तरवर्णनम्	७५
संवत्सरादिशब्दानां व्युत्पत्तिकथनम्	२४	*चन्द्रपृष्ठे दिननिर्णयकथनम्	७६
नवविधकालमानकथनम्	२६	जगन्नाथस्तुतिः	७६
विशेषेण चान्द्रमाननिर्णयः	३३		
नक्षत्रानुसारेण मासकथनम्	३५		

अथ त्रयोविंशप्रकाशे

विषयाः	श्लोकाङ्काः	विषयाः	श्लोकाङ्काः
श्रीजगन्नाथस्तुतिप्रतिज्ञा	१	प्रयोवाद्यश्रवर्णनम्	१३
उत्कलप्रशंसा	२	वटस्तुतिः	१६
तत्र श्रीपुरुषोत्तमक्षेत्रस्तुतिनीलाद्रिस्तवश्च	६	सप्तमूर्त्तिप्रकाशपूर्व्वकअमर्षोषस्तवः	२०
वैजयन्तीस्तवः ध्वजदण्डवर्णनं चक्रस्तुतिश्च	९	श्रीजगन्नाथस्य शेषादिभिः समुद्रसाम्यकथनम्	२१
कलशस्तवः आमलकावलिस्तवश्च	११	ब्रह्माण्डसाम्य-शिवसाम्य-गौरीसाम्य-वाग्देवीसाम्य-गणेशसाम्य-सूर्य्य-साम्य-नवग्रहसाम्यैस्तद्दर्शनम्	२९
घण्टास्तुतिः प्रासादस्तवश्च	१२		

विषयाः	श्लोकाङ्काः
दशावतारस्तुतिः	४०
तस्य विरुद्धधर्म्माश्रयत्वकथनम्	४१

विषयाः	श्लोकाङ्काः
वृत्त्यनुप्रासादिभिर्जगन्नाथस्तवः	५५
अभीष्टप्रार्थनाविष्कारः	५६

अथ चतुर्व्विंशप्रकाशे

विषयाः	श्लोकाङ्काः
उपसंहारप्रतिज्ञा कौतुकपञ्जिकाकथनम्	१८
सूक्ष्मतिथ्यादेः स्थूलीकरणविधिः तत्र नानाविधोपायकथनम्	३२
यष्ट्यानयनकथनम्	५९
चन्द्रमन्दोच्चपातयोरनायासानयनम् कौतुकपञ्जिकोपादेयताकथनम्	६५
यथोद्देशतः प्रतिप्रकाशोक्तविषयकथनम् इत्युपसंहारः	९१
अथान्यदेशेषु पञ्जिकानयनोपयोगितया व्यवहारसिद्धाष्टोत्तरशतस्थानानां देशान्तरपलाक्षकलाकथनम्	१३९
अभीष्टस्थानद्वयान्तरमार्गानयनकथनम्	१४१

विषयाः	श्लोकाङ्काः
सूक्ष्मतमक्रान्त्यादिकथनम्	१४२
स्वस्तिकगतरविक्रान्तेरंशादिनिर्णयकथनम्	१४३
ग्रन्थाविष्कारकारणभगवद्दर्शनम् स्वपूर्व्वपुरुषप्रकाशनम्	१४७
स्वग्रन्थस्य श्रीकृष्णपादार्पणम् ग्रन्थाविष्कारसमयकथनम्	१४९
ग्रन्थग्रहणप्रार्थना नव्यविशेषग्रहणोदाहरणम्	१५०
नीलगणिताख्योत्तरार्द्धसमाप्तिकथनम्	१५१
ग्रन्थसमाप्तिकथनपूर्व्वकाशंसाकालकालशब्दार्थप्रतिपादकभगवद्वर्णनम्	१५२
ग्रन्थाद्यन्तयोः श्रीशब्दप्रयोगावश्यकत्वप्रकाशनम् श्रीजगन्नाथस्तुतिः	१५४

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	श्लोकाङ्कः
कारणाश्वा	कारणाख्या	६६	१५८
क्रियमुखान्	क्रियमुखात्	६७	१६०
कोटिबाहूं, सुधीराः	कोटिबाहू, सुधीरैः	६८	६
-छृतार्क	-हृतार्क-	८३	२७
समांश्यो-	समांशयो-	८७	५९
बलनेन, ब्रलने	वलनेन, वलने	९०	७६
कोटौ	कोटिः	१११	१०४
(९)	(६)	११७	२२
कालमाना, काम्मभागां	कालभागा, कालमानां	१२२	७५
सदाढिपतयो	सदाढपतयो	१४५	९१
क्षितिरति	क्षितिरिति	१७२	१४४

मध्यमप्रकाशस्य त्रिषष्टितमश्लोकात् द्विसप्ततिश्लोकपर्य्यन्तं
मुद्रितान् दश श्लोकान् विहाय एते श्लोकाः
निवेशयितव्याः ।

क्वचिद्ग्रहे दण्डपलप्रभेदमालोक्य यज्विष्णुसुतो जगाद ।
तिथ्यन्तनाडीनतबाहुमौर्व्व्यीत्याद्यं स्वसिद्धान्त उदाजहार ॥ ६३ ॥
यद्भास्करस्तन्मतसिद्धपर्व्व न सर्व्वदा दृक्समतां यदेति ।
ततोऽधिकं कश्चिदहं विशेषं ब्रुवे दुरूहे मिहिरग्रहेऽपि ॥ ६४ ॥
निष्पाद्य सूर्य्यग्रहमुक्तरीत्या स्पर्शान्तमध्यस्फुटसायका ये ।
ते स्वस्वलग्नापमशिञ्जिनीघ्नास्त्रिज्याहृता यदय एव लब्धाः ।६५॥

परीक्कता तद्ग्रहकालहृत्या भक्ताः पलैरेव फलैर्युतोनः ।
लग्नापमेष्वोः पृथगेकदिक्के क्रमात्त्रिधोक्तः समपर्व्वकालः ॥ ६६ ॥
क्रमाल्पकश्चेत् स पुनः पलैस्तैः स्वलम्बनज्यागुणितैः पराशैः ।
युतोनितो वित्रिभलग्नपश्चात् पूर्व्वस्थितेऽर्के न तु वर्द्धमानः ॥६७॥
स्पर्शादिके संस्कृतपर्व्वनाम्ना स्थाप्योऽथ मध्यो निजलम्बनेन ।
सुसंस्कृतः स्याद्ग्रहमध्यकालस्तात्कालिकस्पष्टदिग्गाशुगस्य ॥ ६८ ॥
वर्गात्पदं मध्यमयष्टिवर्गयुक्तात् स्वमध्यस्फुटदिक्शरः स्यात् ।
स्थित्यर्द्धमानीय ततः स्वलग्नद्युज्याहतं व्यासदलोद्धृतं तत् ॥ ६९ ॥
स्पर्शान्तबाणद्वितयैकदिक्के तद्धीनयुक्संस्कृतपर्व्वयुग्मम् ।
स्पर्शान्तजं कार्य्यमथान्यदिक्के स्थित्यर्द्धयोगार्द्धवियुग्युतं तत् ॥७०॥
पर्व्वद्वयं लम्बनसंस्कृतञ्चेत् स्पर्शे विमोक्षे समयः स्फुटः स्यात् ।
स्थित्यर्द्धके तु ग्रहणार्द्धलग्नद्युज्याहते त्रिज्यकया विभक्ते ॥ ७१ ॥
पर्व्वान्तजं लम्बनमर्कतः स्यात् स्थित्यर्द्धयुग्मोनयुते तु दर्शे ।
तात्कालिकेन्द्रोरसकृत् सकृद्वा तल्लम्बने स्पार्शिकमौक्षिके स्तः ॥७२॥

श्रीकृष्णाय नमः ।

अविघ्नमस्तु ।

सिद्धान्तदर्पणः ।

मध्यमाधिकारः ।

प्रथमः प्रकाशः ।

कालवर्णनम् ।

श्रीभूमाधवचक्रचक्रावनिभृद्द्राभिरभ्युज्ज्वलं
श्रीकण्ठप्रमुखाखिलामरशिखाजुष्टाङ्घ्रिपीठोपलम् ।
श्रीनीलाचलमौलिमण्डनमहानीलायमानं महः
श्रीभूमाधरितस्मरं भवतु नः प्रत्यूहहत्युद्यतम् ॥ १ ॥
गाङ्गेयद्युतिभङ्गदाङ्गलतया श्रीराधयालिङ्गितं
विद्युत्सङ्गिघनाघनापघनरुक् प्रेमामृतैकाश्रयम् ।
सत्संवित्सुखमक्षरक्षरपरं पूर्णातिपूर्णोत्तमं
श्रीकृष्णाख्यमुपास्महे सुरुचिरं वेदान्तवेद्यं महः ॥ २ ॥

जयति जगतीभर्त्तुर्धामाद्भुतं परमाणुतां
ययुरपि जगत्कोषा यल्लोमजालविलावली ।
यदनिलजलज्योतिःक्षौणीपराणुगृहोदर-
स्फुरदपि सुरागण्यैः क्रीड़न्निजैरवतारकैः ॥ ३ ॥

श्रीभास्करप्रभृतिखेचरचक्रवालं
नत्वा गुरुं स्वपितरौ तदनुग्रहाढ्यः ।

मूढोऽप्यगाढगणकप्रतिपत्तयेऽहं
सिद्धान्तदर्पण इति प्रथयामि शास्त्रम् ॥ ४ ॥

ग्रन्थेऽस्मिन्नधिकारपञ्चकमहं वक्ष्यामि मध्यस्फुट-
त्रिप्रश्नाततिगोलकालसहितं साङ्गं स्ववक्रोन्नतैः ।
वाक्यैः क्वापि दिवाकरांशगदितैर्ग्रन्थान्तरोत्थापितै-
रैकार्थ्यात् क्वचिदन्विते सुवितते बोधाय बालावलेः ॥ ५ ॥

नास्ते कालावयवकलना यत्र दृक्शास्त्रसिद्धा
श्रौतस्मार्त्तव्यवहृतिरपि च्छिद्यते तत्र धर्म्या ।
तस्मादेषा कृतिरनृतवागस्तु वा प्रस्तुतार्था
ग्राह्या दक्षैर्ग्रहगणभगणाद्यत्र संलक्ष्य साक्षात् ॥ ६ ॥

प्राक्सिद्धान्तप्रसिद्धा रविशशिभगणा घस्रमासाब्दसंख्या-
भूगोलव्यासजीवोपकरणसहिताः सर्व्वदा सन्ति सत्याः ।
किन्त्वन्येषां ग्रहाणामिह भगणगणस्योच्चपातेषु कक्षा-
बिम्बादीनां विसंवादत इतरजनैः कल्प्यते ग्रन्थजातम् ॥ ७ ॥

तत्तद्ग्रन्थेषु यस्मिन्न भवति सुमहत्तारतम्यं ग्रहादे-
र्दृक्संवादात् सतथ्यो बहुतरतमतः कथ्यतेऽसावतथ्यः ।
पूर्व्वाचार्य्यैस्तदस्मद्ग्रथनमपि चिरस्थायि दृक्सिद्धभावा-
दव्यर्थं भव्यमेवं भवतु हि भविनो भाविभूतानभिज्ञाः ॥ ८ ॥

यदैव दृग्गोचरतां यदेति तदा तदेवाद्रियते हि शास्त्रम् ।
सद्वासनावार्त्तिक एवमाह पश्यन् जनानल्पमतीन् नृसिंहः ॥ ९ ॥

शास्त्रे कृते यदि जगद्व्यवहारहेतौ
गम्भीरता भवति तन्निखिलप्रवृत्तिः ।
न स्यादतोऽत्र गणिते सुगमाभिधेये
शब्दस्य पाटवमनादरणीयमेव ॥ १० ॥

स्कन्धत्रयस्य मध्ये गणितस्कन्धो विचिन्त्य एवादौ ।
होराजातकवेदी यतते कृत्येषु संशिते ॥ ११ ॥
श्रीभास्करोक्तपाटी विमलास्ते तन्मयापि सा नोक्ता ।
ग्रहगणितारम्भोऽयं भूयाद्भव्याय भूतानाम् ॥ १२ ॥
सिद्धान्तदर्पणेऽस्मिन् सलोचनानां प्रतर्पणे निपुणाः ।
क्वापि क्वापि विशेषं पश्यत गणितागमग्रामात् ॥ १३ ॥

श्रुतिर्यज्ञकर्म्मप्रवृत्तैव यज्ञ-
क्रियाः कालमासाद्य वैशद्यमापुः ।
इतः शास्त्रतः कालबोधो यतोऽङ्गं
श्रुतेर्ज्योतिषं प्रोक्तमस्मान्मुनीन्द्रैः ॥ १४ ॥

आम्नायाख्यस्य पुंसः समजनि नयनं ज्योतिषं शब्दशास्त्रं
वक्त्रं श्रोत्रं निरुक्तं क्रमत इह भुजानासिके कल्पशिक्षे ।
छन्दः पद्वन्द्वमस्माद्गुरुतरमखिलादङ्गतो वेदचक्षु-
र्ज्योतिःशास्त्रं समस्ताङ्गभृदपि न यतः कर्म्मठो नष्टदृष्टिः ॥ १५ ॥
ज्योतिःसन्दर्भसर्व्वङ्कषविशदमतिर्जातकप्रश्नयात्रा-
तत्त्वज्ञः प्राज्ञगोष्ठीप्रकटगुणघटोऽप्यस्तु लोकस्तुताज्ञः ।
अद्धा सिद्धान्तबोद्धा न यदि स पुरुषः शोभते नो भतेजः-
पुञ्जव्याप्तापि लुप्तामृतकिरणरुचिर्दर्शजातेव रात्रिः ॥ १६ ॥
यत्र त्रुट्यादिकालः प्रलयचरमकः खेचराणां प्रचारः
प्रश्नाश्चैवोत्तराणि द्विविधगणितमप्युद्भवो भूतराशेः ।
स्थानं भूभग्रहादेर्ग्रहणखगयुतिज्याधनुष्कर्म्मयन्त्र-
क्षेत्राद्यं गद्यते सद्गणकगणवरैरेष सिद्धान्त उक्तः ॥ १७ ॥
श्रेष्ठं सर्व्वश्रुतानां श्रुतमिति कृतिभिर्ज्योतिषं तत्र सारः
सिद्धान्तस्तत्र गोलस्तदवगतिकृती वर्त्तते यत्र मर्त्त्यः ।

विद्वत्पूज्यः स देशः सकलकलुषहृद्धर्मशर्माश्रयः स्याद्-
यत्रास्ते नैष तस्मिन् पशुचरितपरे पापजापप्रतापः ॥ १८ ॥
यश्चतुर्वर्गफलप्रदं श्रुतं पवित्रमेतत्पठनीयमेव तत् ।
अहर्पतिः प्राह रहस्यमित्यतः प्रदेयमेतत्प्रवणाय साधवे ॥ १९ ॥
पूर्वार्द्धे कालमाहर्गणभगणखगज्यादिविस्पष्टतेषु-
त्रिप्रश्नप्रग्रहोडुग्रहसमिदुदयास्तेन्दुशृङ्गातिपातान् ।
अन्ये भागेऽनुयोगोत्तरविविधमतव्यक्तिसद्व्यक्तगोल-
च्छाकच्छायन्त्रवर्षाच्युतनुतिकुतुकान्यत्र पश्यन्तु सन्तः ॥ २० ॥
यत्तेजः क्षुब्धमायाजनितमहदहङ्कारतन्मात्रभूतोद्-
भूताण्डाधीशनाभ्युद्भवभुवनमयाम्भोजगर्भात्स्वयम्भूः ।
भूत्वा भूतैर्भृतानि त्रिभुवनभवनान्यारचय्य स्वधाम्नि
ध्यायं ध्यायं यमास्ते स जयति परमब्रह्मधामादिदेवः ॥ २१ ॥
स्रष्ट्रा सृष्ट्वा भचक्रं ध्रुवयुगलयुतं सग्रहं सभियुक्तं
नित्यभ्रान्तावनन्तोऽङ्गवि भ्रविकविकर्म्माद्यभिव्यक्तिहेतोः ।
भ्रान्ते भानां गणे तत्प्रभृति चलतरे पश्चिमाशाभिमुख्यं
प्राचीं नीचोच्चवृत्तैर्व्रजति खगततिः स्वल्पगत्यैव तस्मात् ॥ २२ ॥
कालाख्यस्य विभोरिदं भगवतो नित्यस्य रूपान्तरं
ज्योतिश्चक्रमिति ब्रुवन्त्यवयवास्त्रुट्यादयोऽस्येत्यपि ।
विद्वांसोऽद्य मया तदाद्यविहितिस्तेनात्र सम्पा[illegible]
पद्यैर्हृद्यतरैरवद्यरहितैः सद्योऽभिवेद्यार्थकैः ॥ २३ ॥
यो भूतसंहारक एष कालः कालोऽपरः स्यात्कलनात्मकश्च ।
स स्थूलभावादथ सूक्ष्मभावान्मूर्त्तोऽप्यमूर्त्तो द्विविधः प्रदिष्टः ॥२४॥
प्राणादिकोऽसौ व्यवहारयोग्यो मूर्त्तोऽथ तद्योग्यतया स्थितो यः ।
त्रुट्यादिकोऽमूर्त्त इतीरितोऽयं शीघ्रेरितात्यल्पमितायसूच्या ॥२५॥

स्याद्यावतोऽम्बलिनीदलस्य भेदस्त्रुटिः सैव शतेन१०० तासाम्।
एको लवस्तत्परनामकोऽसौ त्रिंश३०ल्लवैरेकनिमेष उक्तः ॥ २६ ॥
तैर्व्यक्तैरष्टादशभिश्च१८ काष्ठा
साऽर्काग्निता२७ स्याद्गुरुवर्णकालः।
तैः खेन्दुभिः१० प्राण उदीरितस्तद्-
युग्मं२ कला तत्त्रितयं३ विनाड़ी ॥ २७ ॥
पलश्च सा दिग्गुणिता१० क्षणः स्यात्
तैः षड्भि६रेका घटिका च नाड़ी।
दण्डश्च सा तद्द्वितयं२ मुहूर्त्तो-
ऽहोरात्र आद्यैः खगुणै३०र्मुहूर्त्तैः ॥ २८ ॥
अह्नश्च रात्रेश्च शरेन्दु१५भागः सूक्ष्मो मुहूर्त्तः सदसत्फलार्हः।
स्थूलस्त्वहोरात्रखराम३०भाग ऋक्षभ्रमोत्थं दिनमार्क्षमाहुः ॥२९॥
तैरार्क्षमासः खगुणैः३० खरांशु-
प्रश्वाद्भ्रमैः सावनमास उक्तः।
तद्वत् खरामै३०स्तिथिभिस्तु चान्द्रः
सौरो रवेः संक्रमणप्रमेयः ॥ ३० ॥
तद्विस्तरोऽप्युत्तरभाग एव वाच्योऽर्क१२संख्यैस्तपनस्य मासैः।
स्यात्सौरसंवत्सर एष दिव्यं दिनं तथा दानुजमित्यवेतः ॥ ३१ ॥
देवासुराणां दिनरात्रिभोगो विपर्य्ययेणार्कगतिप्रभेदात्।
तेषान्तु षष्ट्युत्तरया त्रिशत्या३६० दिव्यं भवेदासुरमेव वर्षम् ॥३२॥
एतैर्युगं द्वादशभिः सहस्रै१२०००-
श्चतुर्युगञ्चेत्यपि तन्निरुक्तम्।
तदेव खाभ्राभ्रखदन्तवेदै४३२००००-
र्दिवाकराब्दैर्युगमस्य पादाः ॥ ३३ ॥

स्वयम्भुवा सार्द्धमदर्शनं भुवो भवेदितीदं न विचारचारु मे ।
भुवां समं प्राकृतिके लये क्षयो मयोच्यते भग्रहलीकरक्षिणाम् ॥ ५० ॥
इदं महायासविसृष्टमन्यथा कथं दिनान्ते विनिहन्तुमुद्यतः ।
विधिर्ग्रहर्क्षाद्यमणोर्भुवः स्थितौ किमस्ति मानं हि बृहद्भसंहतौ ॥ ५१
यथा तथा वा भवतु प्रयोजनं न तद्विरोधाद्गदितं प्रसङ्गतः ।
अमुष्य कल्पस्य दिनैर्ग्रहादिकं महात्मभिः साधयितुं हि युज्यते ॥ ५२

प्रकृतमनुसरामः सामरस्याच्युतस्य
भ्रमति सततमश्विन्यादिपौष्णान्तवर्गे ।
य इह खचरभोगः पूर्ण आलोक्यतेऽसौ
भगण इति निरुक्तः पर्य्ययश्चक्रसंज्ञः ॥ ५३ ॥

अर्कां१२शो भगणस्य राशिगृहभदोक्षेत्रनामास्य तु
त्रिंशां३०शोऽपि लवांशभाग उदितस्तत्षष्टि६०भागः कला ।
लिप्ता तत्खरसांश६०कस्तु विकला तत्तत्खषड्भाग६०कै-
र्गत्यर्थं कथिताः पराद्यवयवाः प्राक्सूरिभिर्भूरिशः ॥ ५४ ॥

यः पूर्वत्र परार्द्धके स्म वसति श्रीमाधवाख्यां दध-
द्रुमः कूर्ममहेन्द्रनीलतनुरुड्डीलाचलाग्रस्थले ।
द्वैतीयीकपरार्द्धकेऽधमजनानुद्धर्त्तुकामः स्फुटं
धत्ते दारवधाम मामवतु माकान्तः स सन्तापतः ॥ ५५ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
शुद्धोऽगमत्समयभाक् प्रथमः प्रकाशः ॥ ५६ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे मध्यमाधिकारे कालवर्णनं नाम प्रथमः प्रकाशः ।

द्वितीयः प्रकाशः ।

भगणादिवर्णनम् ।

सूर्य्यज्ञास्फुजितां पुरोमतिमतां
कोटिघ्नदन्ताब्धयः४३२०००००००
कल्पे स्युर्भगणाः शनीज्यकुभुवां
ते चैव शीघ्रोच्चजाः ।
खाभ्राभ्राङ्गसुराग्निमार्गणगिरि-
शावेषवः५७७५३३३६००० शीतगो-
रादित्यक्षितिभूनगाष्टरसगो-
दृग्बाहवो२२९६८७१११२ भूभुवः ॥ १ ॥
क्षिन्द्राद्र्यङ्गनवाङ्गरामनववा-
ज्यब्जा१७९३६९६७१४१ ज्ञशीघ्रोच्चजा
वाणाभ्रेक्षणवाणवाणधरणी-
वेदर्त्तुरामा३६४१५५२०५ गुरोः ।
षष्ट्यष्टाद्रिशराक्षिदृग्भुजनभः-
शैला७०२२२५७८६० भृगोः शीघ्रजा
भूपाद्र्यङ्ककृताङ्गषट्कमनवः
१४६६४९७१६ सौरेर्म्मिताः पर्य्ययाः ॥ २ ॥

सूर्य्यात् पूर्व्वगमन्दतुङ्गभगणाः पाथोधिरामाग्नयः३३४
शून्याम्भोधिनवाद्रिरुद्रभुजगस्तम्बेरमाम्भोधयः४८८११७९४० ।
पूर्णेन्दुज्वलनाः३१० खचन्द्रनिगमाः४१० वाणाभ्रनागाः८०५ कुभृत्-
पञ्चेषुप्रमिताः५५७ खसमय७० इति ज्ञेयाः पदच्छेदतः ॥ ३ ॥
चन्द्रात्पश्चिमगामिपातभगणा रामाग्निशून्याष्टगो-
चक्षुःपञ्चगुणेक्षणानि२३२२९८०३३ फणभृन्नन्देक्षणानि२९८क्रमा

पक्षाक्षाक्षमिता:५५२ खचन्द्रवसुधा११०बाणाब्धिनन्दा:९४५ शराकूपारेषव५४५ ईरिता न तु रवेः पातः कदाचिद्भवेत् ॥ ४ ॥

भचक्रपक्षाङ्कमसम्मितार्क-
घस्रा विधातुर्दिवसे भवन्ति ।
खशून्यशून्याष्टभुजाष्टशैल-
रामाक्षिपक्षाष्टशरेन्दुसङ्ख्या:१५८२२३७८२८००० ॥ ५ ॥

विवर्जिता यद्भगणैर्भवेयुस्ते तद्ग्रहक्षौणिदिनानि* तानि ।
दिवाकरीयैर्भगणैर्विहीनाश्चान्द्रा† भवन्त्योषधिनाथमासाः ॥ ६ ॥
सूर्यस्य मासैः परिवर्जितास्ते कल्पेऽधिमासाः स्युरथेन्दुमासाः ।
खराम३०निघ्ना विधुवासरास्ते तिथिक्षयाः सावनवासरोनाः ॥७॥

मासा रवेः कोटिहताः कृताष्ट-
चन्द्रेषवः५१८४००००००० कैरवबान्धवस्य ।
खखाभ्रषड्वह्निगुणाग्निराम-
पाथोधिरामेन्द्रिय५३४३३३६०००सम्मिताः स्युः ॥ ८ ॥

पूर्णपूर्णगगनाङ्गनिर्जर-
ज्वराङ्कबाणविधवो१५९३३३६०००ऽधिमासकाः ।
खाभ्रखाभ्रखखखाभ्रदृक्शरा-
ऐन्द्रियेन्दव१५५५२०००००००० इहार्कवासराः ॥ ९ ॥

दन्त्यनन्तखखखाग्निखाष्टयो
वासराः शशभृतोऽयुताहताः१६०३००००८०००० ।
शून्यशून्यगगनाष्टदृग्द्विपा-
द्रीन्दुगोनगनगाशुगेन्दवः१५७७९१९८२८००० ॥ १० ॥

---

* सावनदिनानि इत्यर्थः ।

† चन्द्रभगणाः ।

भानुपक्षिसपरिभ्रमोन्मिताः
सावनाः कुदिवसा अमी मताः ।
अम्बराम्बरखदृक्शराकृति-
व्यालखेन्द्रिययमा२५०८२२५२०००स्तिथिक्षयाः ॥ ११ ॥
तुङ्गखेटभगणान्तरैर्मता मन्दकेन्द्रचलकेन्द्रपर्य्ययाः ।
पूर्त्तिमेति न युगे यतोऽखिलः पर्य्ययस्तदिह कल्प ईरितः ॥ १२ ॥
द्राक्चलाशुचपलादिनामभिः शीघ्रतुङ्ग उदितो महात्मभिः ।
उच्चमन्दमृदुनामभिस्तथा वर्त्ततेऽत्र मृदुतुङ्गकप्रथा ॥ १३ ॥
पूर्णपूर्णरसचन्द्रबाहव२१६००-
स्तर्कवाजिनवचन्द्रबाहवः२१९७६ ।
शून्यबाहुगुणचन्द्रबाहवो२१३२०
रन्ध्रपञ्चरसचन्द्रबाहवः२१६५९ ॥ १४ ॥
भार्कचन्द्रकुदिनासवः क्रमादेत एव हि भवन्ति मध्यमाः ।
किन्तु षष्टिघटिकात्मसावनैर्वासरैर्व्यवहरन्ति जन्तवः ॥ १५ ॥
स्वस्वपर्य्ययकलाः कुवासरैर्भाजिताः स्वगतयः कलादयः ।
एवमात्मभगणाप्तघस्रतः स्वस्वपर्य्ययदिनादयः फलम् ॥ १६ ॥
स्वस्वषष्टिलवकैः समन्विताः सूरिभिर्दिनघटीपलादयः ।
कल्पिताः समयसूक्ष्मताप्तये राशिभागकलिकादिवद्बहु ॥ १७ ॥
सूर्य्यपर्य्ययदिनादयः क्रमा-
न्मार्गणाङ्गदहनाः३६५ शरेन्दवः१५ ।
भूगुणाः३१ क्षितिगुणा३१श्चतुर्भुजाः२४
सङ्क्रमार्थमनुवर्षमीरिताः ॥ १८ ॥
राशिभुक्तिदिवसादयो गुरो-
र्मध्यमस्य कुरसाग्नयः३६१ शराः५ ।

भानि२७ भानि२७ गुणभूमि१३सम्मिता
जैववत्सरकृते मयोदिताः ॥ १९ ॥

लिख्यन्ते क्षितिसावनैकदिवसे तद्भुक्तयो मध्यमा
लिप्ताद्या दशधा यदाहतदिनैरायान्ति मध्यग्रहाः ।
भानोरङ्कशरा५९गजा८दश१०दिशः१० जिनाः२४ सहस्रांशव१२-
स्त्रिंशद्३०वारिधयो४वियद्विधुमिता१०रत्नाकराः४ कीर्त्तिताः॥२०॥
चन्द्रस्याभ्रनवाद्रयः७९० कृतगुणा३४द्व्यर्था५२स्त्रयो३ऽङ्काब्धयो४९
नागा८ द्वौ२ रसभूमयश्च१६ हरित१०चन्द्रेन्दुसङ्ख्याः११ क्रमात् ॥
भौमस्येन्दुगुणा३१ रसेक्षणमिता२६स्त्रिंशद्३०षड्६द्र्यब्धयः४७
श्रुत्यम्भोनिधयो४४रदा३२नवकृता४९रामाः३ समुद्रा४मताः॥२१॥
ज्ञस्यार्थाब्धिभुजा२४५रदा३२रसभुवो१६ऽश्वाः७सप्तचन्द्रा१७घना१७
गोऽर्था५९ वह्निकृता४३ दृगम्बुनिधयो४२ वेदाब्धयो४४ ज्ञागतिः ।
वेदा४नन्दशराः५९ शराः५ स्वरगुणाः३७ खं० षड्गुणाः३६काब्धयः४१
क्ष्माभृत्क्ष्मा१७ वसुधा१ सुधांशुविशिखा५१वाचस्पतिप्राग्गतिः॥२२॥
शौक्री षण्णवतिः९६ हयाः७ स्वरगुणाः३७ सप्ताब्धयो४७ऽश्वेषवः५७
खार्था५०नन्दगुणा३९रदा३२विधुगुणा३१बाणाग्नयो३५ ह्यागतिः ।
मन्दस्य द्वय२मभ्र०मङ्गनयना२६न्यर्थेषव५५श्चक्षुषी२
रामार्थाः५३ क्षितिबाहवश्च२१ नयने२ वेदाः४ समुद्रेषवः५४॥२३॥
चन्द्रोच्चस्य रसाः६ खवार्द्धय४० उदध्यर्थाः५४ कुरामा३१ नभो०
वेदाम्भोनिधयः४४ शरा५भुजशराः५२ पञ्चाब्धयो४५ऽङ्काग्नयः३९ ।
तत्पातस्य गुणा३ दिशः१० स्वरकृताः४७ पूर्णाब्धयो४०ऽभ्राब्धयः४०
षट्पक्षा२६ गिरिशाश्च११मार्गणदृशो२५विश्वे१३खरामा३०इति॥२४॥

भ्राम्यद्भाति यदीयभास्वरवपुर्बिम्बाङ्कचक्रप्रभा
भिन्दद्भीमतमः सुदर्शनमिति ख्यातं जयात्तं क्षितौ ।

भक्तानां भवभीतिसम्भवभिदे भूभारभूतच्छिदे
धाम्ने श्यामधराधराधिपतये कस्मैचिदस्मै नमः ॥ २५ ॥

स्तुत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
यातो द्वितीय इह सङ्गणः प्रकाशः ॥ २६ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे मध्यमाधिकारे
भगणादिवर्णनो नाम द्वितीयः प्रकाशः ।

तृतीयः प्रकाशः ।

ग्रहानयनवर्णनम् ।

अथाभिवाञ्छिते वर्षे मासे पक्षे तिथावपि ।
तापनैन्दवमानोत्थसावनाहर्गणक्रमात् ॥ १ ॥
मध्यग्रहाद्यमानेतुं स्थापयेत्कल्पवत्ततः ।
अतीतानां षण्मनूनां सन्धिसप्तकसंयुतान् ॥ २ ॥
अब्दान् वैवस्वतमनोः शैलबाहु२७मितैर्युगैः ।
कृताद्यङ्घ्रित्रययुतैः कल्यतीताब्दकैः समम् ॥ ३ ॥
सर्व्वमेकत्र संयोज्य सृष्टिकालं त्यजेत्ततः ।
खाभ्रखाम्बुधिषट्पूर्णशैलेन्दु१७०६४०००प्रमिताब्दकम् ॥ ४ ॥
ततः शेषान् गताकाब्दान् हत्वा द्वादशभिः पुनः ।
चैत्रशुक्लादिभिर्यातैर्मासैः संयोज्य तान् पृथक् ॥ ५ ॥
निवेश्य गुणयित्वाधः पङ्क्तिकल्पाधिमासकैः* ।
विभज्य कल्पसप्ताश्वमासै† र्लब्धाधिमासकान् ॥ ६ ॥

---

* १५९३३३६००० ।   † ५१८४००००००० ।

ऊर्द्धं संयोजयेदेवं चान्द्रमासा भवन्ति ते ।
त्रिंशद्३०घ्ना गततिथ्याढ्या द्विष्ठाः कल्पतिथिक्षयैः* ॥ ७ ॥
हताः कल्पेन्दुघस्राप्ता† लब्धावमविवर्ज्जिताः ।
भवन्ति रविवारादिरविमध्यमसावनाः ॥ ८ ॥
वासराः कुदिनाख्यास्ते गता लङ्कार्द्धरात्रतः ।
अत्राधिमासावमयो शेषद्युघटिकादिकम् ॥ ९ ॥
न गृह्यतेऽधिमासस्तु शुद्धेः पूर्व्वं गतो यदि ।
तदा शेषाङ्कभूयस्त्वादेकं लब्धेषु योजयेत् ॥ १० ॥
शुद्धौ सत्यां यदा गामी शेषाल्पत्वात्ततस्त्यजेत् ।
तथाह्नां वारवैषम्ये सैकव्येकत्वमिष्यते ॥ ११ ॥
रवीन्दुस्पष्टमानेन ग्राह्ययोस्तिथिमासयोः ।
स्यात्सिद्धौ मध्यमानेन क्वचिदेकाधिकोनता ॥ १२ ॥
अथानीतैर्दिनैः साध्या दिनमासाब्दपालकाः ।
निर्गतोऽहर्गणः सैकः सप्तभक्तोऽवशेषकः ॥ १३ ॥
वासराधिपतिः सूर्य्यान्निःशेषत्वे तु सप्तमः ।
खाग्न्याप्तो३० द्युगणो लब्धं द्विनिघ्नं रूप१संयुतम् ॥ १४ ॥
सप्तभिः क्षयितं शेषो मासेशोऽवर्त्तिमानकः ।
खराम३०शेषास्तद्युक्तघस्रा भोग्यास्ततोऽपरे ॥ १५ ॥
दिनौघः खरसाग्न्याप्त३६०स्त्रिघ्नश्चन्द्र१युतो नगैः७ ।
हृतः शेषः स्ववर्षेशो गतैष्याहानि पूर्व्ववत् ॥ १६ ॥
प्रत्यब्दप्रतिमासञ्च स्ववारे तत्प्रवर्त्तनम् ।
शतानन्दादिभिः प्रोक्तो भिन्नो यः पालकाधिपः ॥ १७ ॥

---

* २५०८२२५२००० ।

† १६०३००००८००० ।

स सौराब्दाधिपो ज्ञेयो मेषसंक्रान्तिवारपात् ।
वारप्रवृत्तिसमयादिष्टात् संक्रान्तिनाड़िकाः ॥ १८ ॥
प्रोज्झ्य शेषः कृतगुणस्त्रिधाधोऽधोऽधरक्रमात् ।
सप्ताप्त्या१७प्तयुतोऽष्टाप्तसंयुक्तस्तद्दिनादिकम् ॥ १९ ॥
स पालयति मेषादेस्ततस्तत्परखेचरः ।
स्वार्थां५शोनेन्दुशैलाब्धि*दिनानि प्रतिपालकः ॥ २० ॥
अतीतोऽहर्गणः स्वस्वभगणैर्गुणितो हृतः ।
कल्पभूदिवसै†र्मध्यो भगणादिर्ग्रहो भवेत् ॥ २१ ॥
शेषाः सूर्यैः१२ खरामैश्च३० षष्ट्या६० षष्ट्या६० पुनः पुनः ।
गुणिताः कुदिनाप्ताः स्युर्भांशलिप्ता विलिप्तिकाः ॥ २२ ॥

सूर्यसिद्धान्ते —

एवं स्वशीघ्रमन्दोच्चा ये प्रोक्ताः पूर्व्वयायिनः ।
विलोमगतयः पातास्तद्वच्चक्राद्विशोधिताः । इति ॥ २३ ॥
गुरोस्तु भगणा यातास्त्रियुता द्वादशाहताः ।
गतराशियुतास्तत्र राशिद्वययुताः पुनः ॥ २४ ॥
षष्ट्या हृताश्च शेषाब्दा गताः स्युः प्रभवादयः ।
सैकाश्चेद्वर्त्तमानाब्दो गतैष्यांशादयस्ततः ॥ २५ ॥
अर्क१२घ्नाः साभ्रदेवांशा३३० भुक्तभोग्यदिनादयः ।
एवं सृष्ट्यादितः सिद्धाः सर्व्वे लङ्कार्द्धरात्रिकाः ॥ २६ ॥
चैत्रशुक्लादिचान्द्राब्दो मध्यमस्य बृहस्पतेः ।
संक्रान्त्या वर्ज्जितः प्रोक्तः स्मृतिज्ञैरधिवत्सरः ॥ २७ ॥
स्फुटार्कभगणस्यान्तः संक्रमौ तस्य चेद्गुरोः ।
लुप्तसंवत्सरः सोऽयं चाब्दस्तु गर्हितः स्मृतः ॥ २८ ॥

---

* २७०७४८ ।

† १५७७९१७८२८००० ।

स्फुटोऽतिचारवान् जीवो नैष्यति प्राग्गृहं यदा ।
महातिचारस्तन्नाम्ना लुप्तसंवत्सरोपमः ॥ २९ ॥
युगानि द्वादशात्र स्युः षष्ट्यब्दैः पञ्चभाजितैः ।
लब्धैः सैकैरब्धुतादैर्मितानि हतशेषकाः ॥ ३० ॥
वत्सरा सम्परीदान्वितपूर्व्वा चाङ्गिरसाः स्मृताः ।
वह्न्यर्कचन्द्रलोकेशव्योमकेशाधिदैवताः ॥ ३१ ॥
निष्यन्तेऽथ गुरोर्मध्यराशिभोगेन लक्षिताः ।
नामानुरूपफलदाः पूर्व्वाचार्य्यैश्च वत्सराः ॥ ३२ ॥
प्रभवो(१) विभवः(२) शुक्लः(३) प्रमोदो(४)ऽथ प्रजापतिः(५) ।
आद्ये विष्णुयुगे पञ्च सर्व्वे शुभफलप्रदाः ॥ ३३ ॥
अङ्गिरा(६) श्रीमुखो(७)भाव(८)युवा(९) धाता(१०) द्वितीयके ।
युगे बृहस्पतेर्मध्यो न शुभोऽप्यपरे शुभाः ॥ ३४ ॥
ईश्वरो(११)बहुधान्यश्च(१२) प्रमादी(१३)विक्रमो(१४)वृषः(१५) ।
शाक्रे युगे तृतीये च त्रितुर्यौ न शोभनौ ॥ ३५ ॥
चित्रभानुः(१६) सुभानुश्च(१७)तारणः(१८)पार्थिवो(१९)ऽव्ययः(२०)।
चतुर्थं पावकीये च युगे सर्व्वे न शोभनाः ॥ ३६ ॥
सर्व्वजित्(२१) सर्व्वधारी(२२)च विरोधी(२३)विकृतिः(२४)खरः(२५)।
पञ्चमेऽपि युगे त्वाष्ट्रे प्रथमौ द्वौ सुशोभनौ ॥ ३७ ॥
नन्दनो(२६) विजय(२७)श्चैव जयो(२८) मन्मथ(२९)दुर्मुखौ(३०)।
चाहिर्बुध्न्ययुगे षष्ठे चान्तिमौ द्वौ न शोभनौ ॥ ३८ ॥
हेमलम्बो(३१)विलम्बो(३२)च विकारी(३३)शार्वरिः(३४)प्लवः(३५)।
चादिमौ द्वौ शुभौ ख्यातौ सप्तमे पैतृके युगे ॥ ३९ ॥
शोभकृत्(३६)शुभकृत्(३७)क्रोधी(३८)विश्वावसु(३९)पराभवौ(४०)।
अष्टमे तु युगे वैश्वे प्रथमौ द्वौ शुभप्रदौ ॥ ४० ॥

प्लवङ्गः(४१)कीलकः(४२)सौम्यः(४३)साधारणो(४४)विरोधकृत्(४५)।
चान्द्रे युगे च नवमे त्रिचतुर्थौ शुभप्रदौ ॥ ४१ ॥
परिधावी(४६)प्रमाथी(४७)च आनन्दो(४८)राक्षसो(४९)ऽनलः(५०)।
ऐन्द्रानलयुगेऽन्त्यौ च दशमे दुःखदायकौ ॥ ४२ ॥
कपिलः(५१)काल(५२)सिद्धार्थौ(५३)ततोरौद्रो(५४)ऽथ दुर्म्मतिः(५५)।
एकादशाश्विनयुगे मध्य एव शुभप्रदः ॥ ४३ ॥
दुन्दुभी(५६)रुधिरोद्गारी(५७) रक्ताक्षः(५८)क्रोधनः(५९)क्षयः(६०) ।
कष्टात्कष्टप्रदाः सर्व्वे भाग्ये द्वादशके युगे ॥ ४४ ॥
विष्णु(१)र्बृहस्पतिः(२) शक्रो(३) वह्नि(४)स्त्वष्टा(५) ततः परम् ।
अहिर्बुध्न्य(६)श्च पितरो(७) विश्वेदेवा(८) निशापतिः(९) ॥ ४५ ॥
इन्द्राग्नी(१०) चाश्विनीपुत्रौ(११) भग(१२)श्चेति युगाधिपाः ।
स्वकालाचारसिद्ध्यैवत्सरा लिखिता अनु ॥ ४६ ॥
युगे युगाङ्कौ पूर्णत्वादर्केन्दुभगणावलेः ।
युगतत्पाददिवसैस्तत्साधनमपीष्यते ॥ ४७ ॥

भङ्ग्यन्तरेण पुनरानयनं दिनानां
कुर्व्वे यथावगतिरश्रममस्य नुः स्यात् ।
गृह्णन्तु नात्र सुधियः पुनरुक्तिदोषं
श्रीहर्षमुख्यकविदर्शित एष पन्थाः ॥ ४८ ॥
शकाब्दा रवि१२ताड़िता मधुसिता-
द्यातीतमासान्विता
द्विष्ठाः कोटिहताः कृताभ्रकुशरे-
ष्वग्नीषुदन्तो३२५३५५१०४द्धृताः ।
लब्धाढ्याः खगुणा३०हतास्तिथियुता
द्वेधाभ्र१०००००००००निघ्नाहृता

नागेष्वभ्रशराग्निपर्व्वतनवा-
श्वाङ्काग्निषड्भिः६३९०९७३५०५८ फलैः ॥ ४९ ॥
ऊना मध्यमसावना दिनगणा लङ्कार्द्धरात्राद्गता
भास्वद्वारमुखाः स्युरस्य यदि वा साध्याः कलेर्वक्रतः ।
कार्य्यौ तत् खचतुष्कहीनगुणकौ हारौ कृताशाशरै५१०४-
रूनौ दक्षिणतोऽष्टबाणखशरै५०५८र्वाराश्च शुक्रादितः ॥ ५० ॥
स्वीयस्वीयनिरुक्तकल्पभगणा रुद्राष्टचन्द्राहृताः१८११
खाभ्राभ्राब्धि४०००हृताः फलं भगणतः स्युर्द्दोपरान्ता ध्रुवाः ।
तद्युक्ताः कलियातसावनदिनैरानीतमध्यग्रहाः
पूर्व्वोक्तक्रमतो भवन्त्वभिमते काले ग्रहांशादयः ॥ ५१ ॥

कुजादिखगपञ्चकार्कमुखमन्दचन्द्रादिमा-
तजध्रुवविलिप्तिकाः कलिमुखार्द्धरात्रे यथा ।
गजाङ्कतिथिवेददृक्-
शशधराः१२४१५९८(म) कृताब्धिस्वर-
त्रिचन्द्रशशिनः११३७२४(बुशी) खदृग्-
रसभुजाभुजङ्गाः८२६२०(गु) क्रमात् ॥ ५२ ॥
खवेदखमरुद्गुरो१४९०४०(शुशी)-
ऽब्धिभुजदिङ्नवेशाश्च११९१०२४(श) षड्
घनाग्निगजबाहवः२८३१७६(रमन्द)
खनृपवेदरामाब्धयः४३४१६०(चमन्द) ।
खवेदवसुषट्शरा-
म्बुनिधयः४५६८४०(ममन्द) खवेदेक्षण-
त्रिचन्द्रभुजगाः८१३२४०(बुमन्द) खदृग्
गगनचन्द्रशून्यर्त्तवः६०१०१०(गुमन्द) ॥ ५३ ॥

गजाब्धिशरतत्त्वभै२३५५४८(शुमन्द)
खवसुवार्धिनगाङ्कद्विपा८९७४८०(शमन्द)
द्विपाष्टगशराक्षिगा२२५७८८(चपात)
वसुदन्ताब्धिपूर्णेन्दवः१०४३२८(मपात) ।
द्वि[illegible]खवसुन्धराः१०६२७२(बुपात)
खरसगोऽर्थ[illegible]२५५९६०(गुपात)स्त्वथो
नखाभ्ररसगोभुवो१९६०२०(शुपात)
नखरसेषुदस्रा३२५६२०(शपात) इति ॥ ५४ ॥

किंवैवंकरणाब्दजाः खनगगोवेदो४९७०नकस्त्वब्दतो
घस्राः स्युर्विधुवारतो रवि१२मितैः खैर्वा तदब्दायुताः ।
व्यार्थेन्द्विष्विभसप्तसप्तगुणभै२७३७७८५१५१भक्ताः फलं वासरा
मेषार्कक्रमणद्वितीयदिनतस्तत्संक्रमान्तागताः ॥ ५५ ॥

संक्रान्तेः सविता तृतीयदिवसे मध्योऽभ्युपैति क्रियं
प्रायेणैतदहस्तत· कृतिमतं पञ्चाङ्गपञ्जीमुखम् ।
तत्पूर्व्वाह्नि यातवासरगणैरानीय मध्यग्रहा·
नेकद्व्यादिषु पञ्जिकादिनगणेष्वाद्याः स्वभुक्तीः क्रियात् ॥ ५६ ॥

केचित्प्रस्फुटमेषसंक्रमदिनं चैत्रादिमन्ये तिथिं
मन्यन्तेऽब्दमुखञ्च देशवशतो भेदेऽपि वर्षेऽत्र हि ।
ग्लौवारे प्रतिपत्प्रगे गतनिशाशेषे तु मेषेऽविशत्
सूक्ष्मोऽर्कस्तदिह ध्रुवोऽरचि दिने मध्यार्कवर्षान्तजे ॥ ५७ ॥

कथ्यन्ते करणाब्दपूर्व्वदिवसे वारे विधोः साधिता
लङ्कार्कोदयकालिका द्विविधदां येषांशकादिध्रुवाः ।
भूयोऽपि प्रतिपत्तये तनुधियां प्रत्यब्दशुद्धिस्तथा
सूर्य्यारादिकमन्दतुङ्गनिचयस्यारादिपातावलेः ॥ ५८ ॥

रवेः शिवा११ दन्तिभुजाः२८ शरेन्दवो१५
नभोभुजा२०स्तर्कसमुद्रसम्मिताः४६ ।
विधोरनन्तं ज्वलनाः३ खबाहवो२०
नवाक्षिसंख्या२९ हुतभुक्शरा५३ मताः ॥ ५९ ॥
कुजस्य बाणा५ विधु१रब्धिबाहवो२४
गिरीन्दवः१७ सायकलोचनानि२५ च ।
ज्ञशीघ्रतुङ्गस्य दिशो१० गजेन्दवः१८
कृतेन्दवो१४ नन्दभुवः१९ कुबाहवः२१ ॥ ६० ॥
बृहस्पतेर्विष्णुपद०श्च वह्नयः३
शराब्धयः४५ शीतकरः१ कुबाहवः२१ ।
सिताशुतुङ्गस्य भवा११ गुणेन्दवः१३
कुसागरा४१ बाहुकृता४२ भुजेन्दवः१२ ॥ ६१ ॥
शनेस्तुरङ्गा७ धृतयः१८ प्रभाकरा१२
नगेन्दवो१७ वेदविलोचनानि२४ च ।
ग्रहे ग्रहादेर्विकलात्ममागते
परादिभेदोऽपि बुधैर्न गण्यते ॥ ६२ ॥
रवेर्मृदूच्चस्य भुजौ२ गजेन्दवो१८
नगाब्धयो४७ वेदशरा५४ नभो० भुवः१
सितांशुमन्दस्य दिशो१० द्विबाहवः२२
कृताग्नयो३४ नन्दशराः५९ पयोधयः४ ॥ ६३ ॥
महीजमन्दस्य कृता४ हया७ विधु१-
र्भुजाब्धयः४२ पावकशीतभानवः१३ ।
मृदोर्विदः स्युर्गिरयो७ऽङ्कभूमयः१६
पयोधयः४ पूर्णविधू१० रसेन्दवः१६ ॥ ६४ ॥

सुरेज्यमन्दस्य शरा५ नगेन्दवो१७
नगेन्दवो१९ विष्णुपदं० शरेन्दव:१५ ।
भृगोर्मृदूच्चस्य भुजौ२ शिलीमुखा५
नवाश्वय:२९ सर्पगुणाश्च३८ गोभुजा:२९ ॥ ६५ ॥
शनेर्मृदूच्चस्य मता मतङ्गजा८
नवा९ङ्कचन्द्रा१९श्चतुरब्धयो४४ दिश:१० ।
सुधाकरादेरथ पातजध्रुवा
भचक्रशुद्धा: करणाब्दवक्रजा: ॥ ६६ ॥
हिमांशुपातस्य गुणा३ महीभुजा२१
नवेन्दवो१९ नागभुवो१८ऽष्टबाहव:२८ ।
कुजस्य पातस्य ख०मष्टबाहव:२८
सितांशुबाणा५१स्त्रिभुजा:२३ कुसिन्धव:४१ ॥ ६७ ॥
बुधस्य पातस्य ख०मङ्कबाहवो२९
नगेन्दवो१७ नागभुजा२८ गजेषव:५८ ।
बृहस्पतेस्तद्ध्रुव ईक्षणे२ शिवा११
गुणा:३ पृषत्केन्दुमिता१५ नवेषव:५९ ॥ ६८ ॥
सितस्य पातस्य धरा१ब्धिबाहवो२४
गुणा३ निशानाथगुणाश्च३१ पुष्करम्० ।
शनेर्गुणा:३ ख० त्रिभुवो१३ऽद्रिबाहव:२७
कृतेक्षणानि२४ ध्रुव एष पातज: ॥ ६९ ॥

इतीरिता: खेटतदुच्चपातजध्रुवा: कृतैतद्भगणानुपातजा: ।
सुधांशुपात: स्फुटराहुरुच्यते तदीयभार्धे किल केतुरादिभि: ॥७०॥
मन्दोच्चपातानयनं दिनेभ्य: पुरोदितं तद्वदिदं समाभ्य: ।
अब्दास्तु तत्तद्भगणैर्विनिघ्ना लब्धदयाप्ता: फलमत्र लिप्ता: ॥ ७१ ॥

ध्रुवेषु युक्ता वियुता: क्रमेण स्फुटा ग्रहांशादय एव ते स्युः ।
किंवा सुखार्थं हरणै: स्वकीयैरानेतुमर्हा मृदुतुङ्गपाता: ॥ ७२ ॥

मृदूच्चपातपर्य्ययै: खखाभ्रखाभ्रपक्षका:२००००० ।
हता: फलानि हारका: स्वका: स्वका: क्रमात्मका: ॥ ७३ ॥
तदुद्धृताब्दवृन्दत: कलादिभि: फलैर्ध्रुवा: ।
युतोनिता: स्फुटा: क्रमान्मृदूच्चपातभादय: ॥ ७४ ॥

सूराराद्युच्चहारा नवनवकशरा५९९
बाणवेदर्त्तवो६४५ष्टा-
ष्टाम्नाया४८८ नागसिद्धा२४८ नवशराश्विन:२५९
सप्तपञ्चाष्टपक्षा:२८५७ ।
चारादे: पातहारा: क्षितिनगर्त्तव:६७१
पञ्चषड्वीतिहोत्रा३६२
धृत्यष्टक्ष्माश्च१८१८ पञ्चक्षितिनयनमिता:२१२
सप्तषड्वह्नय:३६७ स्यु: ॥ ७५ ॥

प्राचीप्रतीच्यो: कुजसौम्यमन्दमन्दोच्चसञ्चार इहेष्यते यत् ।
तथा च शीघ्रोच्चगतिश्च कार्य्या तत्संस्कृति: स्पष्टखगाधिकारे ॥ ७६ ॥

प्राच्यां काञ्चनभूधरात् सुरपुरीसम्पृक्तसूत्राच्चतु-
र्दन्तिक्ष्मा१८४मितयोजनान्तमिलिते व्यक्तोत्तरस्थामपि ।
अब्धे रोधसि सिन्धुसिन्धुरभुजै२८४र्यो योजनै राजते
नित्यं श्रित्वनीधरेन्द्रशिखरे तस्मै परस्मै नम: ॥ ७७ ॥ *

---

* प्राच्यामित्यादिपद्यस्य भङ्ग्यन्तरं यथा—

प्राच्यां काञ्चनभूधरात् सुरपुरीसम्पृक्तसूत्राच्चतु-
र्दन्तिक्ष्मा१८४मितयोजनान्तरगतैर्व्योमोत्तरस्थाम् ततात् ।
वेदाहीन२८४योजनान्तगयती देशस्य सिन्धोर्दिशि
भ्राजिष्णुर्विभुरप्यधिष्ठितजनुषो भीमस्नमस्कृतम् ॥

इत्युत्कलोद्भवनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृते ग्रथितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
मानस्तृतीय इह मध्यखगः प्रकाशः ॥ ७८ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे मध्यमाधिकारे
ग्रहभगणवर्णनो नाम तृतीयः प्रकाशः ।

चतुर्थः प्रकाशः ।

नानाविधसंस्कारवर्णनम् ।

अथोच्यते स्वदेशादिसंस्कारार्थं समासतः ।
भूमानमुत्तरे भागे विस्तराद्वक्ष्यते पुनः ॥ १ ॥
मध्यव्यासो भुवः खाभ्रभूप१६००योजनसम्मितः ।
भचक्रकलिकार्द्ध१०८००घ्नस्त्रिज्या३४३८हृतः परिधिर्भवेत् ॥ २ ॥
षष्ठांशाभ्यधिकाङ्काश्विगगनाशुग५०२६।१०योजनम् ।
भूमध्यवेष्टनं स्वीयलम्बज्याघ्नं त्रिजीवया३४३८ ॥ ३ ॥
हृतं स्वदेशवसुधापरिधिः स्फुट उच्यते ।
किंवार्क१२घ्नः स परिधिर्विषुवत्कर्णभाजितः ॥ ४ ॥
लङ्कारोहीतकावन्तीकुरुक्षेत्रादिनोद्गतः ।
स्पृष्ट्वा मेरुगतं सूत्रं मध्यरेखोच्यते भुवः ॥ ५ ॥
स्वीयदेशसमानाक्षो रेखायां विषयोऽस्ति यः ।
तन्निजस्थानयोर्मध्यमानं देशान्तरं मतम् ॥ ६ ॥
तद्भूयोजनैः षष्टि६०घ्नैः स्फुटभूवेष्टनोद्धृतैः ।
अथवा विषुवत्कर्णलिप्तिकाभिश्च ताडितैः ॥ ७ ॥

मनुरामाभ्रषड्६०३१४भक्तैः स्वदेशान्तरनाड़िकाः ।
रेखायाः पूर्व्वदेशेषु निशार्द्धोपरि योजिताः ॥ ८ ॥
पश्चिमेषूनिता वारमासाब्देशप्रवृत्तयः ।
लङ्कार्द्धरात्रतो यत्तत्प्रवृत्तिः सर्व्वदेशके ॥ ९ ॥
वदन्ति केचिदाचार्य्या लङ्कार्कोदयकालतः ।
वारप्रवृत्तिमत्रेयं व्यवस्था क्रियते मया ॥ १० ॥
वारे यस्मिन्नुदेत्यर्कः स्वदेशे समयात्ततः ।
तदीशितुरहोरात्रे बलाधिक्यं प्रवर्त्तते ॥ ११ ॥
दिवारात्रौ यथाभागं यामयामार्द्धजं बलम् ।
गृह्यते क्वापि देशेषु न तत्सिद्धान्तसम्मतम् ॥ १२ ॥
यदाह भास्करः सर्व्वारम्भो लङ्कोदयादिति ।
तदुक्ताहर्गणानां हि संख्या सिद्धान्ततः पृथक् ॥ १३ ॥
भिन्नत्वेऽपि यदीदानीं तदानीतार्य्यमादयः ।
दृक्समा अभविष्यंस्तदग्रहीष्यत तन्मतम् ॥ १४ ॥
ग्रहाणां स्वस्वगतयो देशान्तरघटीहताः ।
षष्ट्याप्तास्तत्फलम्प्राच्यामृणं पश्चाद्धनं ग्रहे ॥ १५ ॥
किंवा तद्गतयः क्षुण्णाः स्वदेशान्तरयोजनैः ।
स्फुटभूमिपरिध्याप्ताः संस्कार्य्या मध्यमेषु ताः ॥ १६ ॥
समये सम्भवेद्यत्र सर्व्वग्रस्तविधुग्रहः ।
तदा संसाधिते तस्मिन्मध्यरेखासमधिष्ठिते ॥ १७ ॥
स्वसमानाक्षके देशे तदुन्मीलनकालतः ।
एष्यद्गतं समालोक्य स्वदेशोन्मीलनं क्रमात् ॥ १८ ॥
प्राक्पश्चिमगतं बुद्ध्वा स्वस्थानं मध्यसूत्रतः ।
तयोरन्तरनाड़ीभिर्हन्याद्भूपरिधिं स्फुटम् ॥ १९ ॥

षष्ट्या विभज्य लब्धानि योजनान्यग्रगच्छतु ।
किंवा निमीलनाद्यर्थं मानं देशान्तरस्य च ॥ २० ॥

सूर्यसिद्धान्ते—

इष्टनाडीहता भुक्तिः षष्ट्या भक्ता कलादिकम् ।
गते शोध्यं युतं गम्ये कृत्वा तात्कालिको भवेत् । इति ॥ २१ ॥
ग्रहाणां मध्यमा यस्मात् सूर्योदयत इष्यते ।
ततस्तात्कालिकेष्वेषु विधेया चरसंस्कृतिः ॥ २२ ॥
स्फुटार्कापक्रमानीता देशकालोत्थिताः स्वकाः ।
चरनाड्यः स्वभुक्तिघ्नाः षष्टिभक्ताः फलं ग्रहे ॥ २३ ॥
धनर्णं क्रमशो भानौ दक्षिणोत्तरगोलगे ।
अस्तकालिकखेटेषु वैपरीत्येन संस्कृतिः ॥ २४ ॥
गताब्दस्फुटसूर्यस्य यत्रांशे यदभूच्चरम् ।
तत्तच्च वर्त्तमानाब्दे ग्राह्यं मध्यार्यमादिषु ॥ २५ ॥
रविमान्दफलव्यस्तलग्नमानायनांशकैः ।
वक्ष्यमाणैः क्रियामन्यां वच्मि मध्यग्रहोचिताम् ॥ २६ ॥
अर्द्धरात्रान्मध्यभानोः स्फुटार्कस्य निशादलम् ।
भिन्नं यद्दृश्यते तस्मात्सङ्कुजान्तरसंस्कृतिः ॥ २७ ॥
चलांशसंस्कृतादित्यक्रान्तराश्युदयासुभिः ।
निरक्षदेशजैर्निघ्ना रविदोःफललिप्तिकाः ॥ २८ ॥
अष्टादशशतै१८००राप्ताः स्वस्वभुक्तिभिराहताः ।
मध्यार्कसावनदिनप्राणै२१६५९राप्ताः कलादयः ॥ २९ ॥
स्वमृणं सूर्यफलवत् कार्याः सूर्यादिखेचरे ।
शीघ्रेन्दूच्चेषु राशौ तु व्यस्ताः संस्कृतयोऽखिलाः ॥ ३० ॥
अल्पान्तरत्वादथवा रविबाहुफलाहता ।

भुक्तिर्भचक्रकलिका२१६००भक्ता लिप्तादि तत्फलम् ॥ २१ ॥
किंवा भक्ताश्चक्रलिप्ता२१६०० गत्या छेदस्तु तत्फलम् ।
तेनार्कंदोःफलं भक्तं प्राग्वल्लिप्तादिसंस्कृतिः ॥ २२ ॥
भुजान्तराख्यकर्म्मोक्तमुदयान्तरमुच्यते ।
क्रान्तिजार्कक्षहास्पत्वभूमौत्थफलकारणम् ॥ २३ ॥
संस्कृतस्यायनांशाद्यैर्मध्यमस्य विवस्वतः ।
लग्नभुक्तासवोऽतीतमेषादिप्राणसंयुताः ॥ २४ ॥
निरक्षदेशजा ये स्युर्याश्च मध्यमभास्वतः ।
चलांशसंस्कृतस्यैव लिप्तास्तद्विवराहताः ॥ २५ ॥
सूर्य्यादिमध्यचन्द्रोच्चपातशुक्रज्ञशीघ्रजाः ।
गतिलिप्ताहता योऽर्थभूपदृग्भिः२१६५९ कालात्मकम् ॥ २६ ॥
फलं तत्सूर्य्य*युग्मौजपदयोः स्वमृणं क्रमात् ।
कार्य्यं मध्यग्रहाद्येषु किंवा प्रोक्तं चरादिकम् ॥ २७ ॥
संस्कारत्रितयं स्पष्टक्रियानिष्पत्त्यनन्तरम् ।
कर्त्तव्यं कृतिभिः स्वस्वस्फुटभुक्तिभिरेव तत् ॥ ३८ ॥
तदा मध्येषु शीघ्रेषु चन्द्रोच्चेऽपि न तत्क्रिया ।
कार्य्या स्फुटग्रहेष्वेव यत्ते तैः प्राक्परिष्कृताः ॥ ३९ ॥
यद्यर्कंदोःफलं लग्नसंस्कृतं तर्हि मध्यमात् ।
चलांशसंस्कृतात् सूर्य्यात् साध्यं तदुदयान्तरम् ॥ ४० ॥
अन्यथा स्फुटमार्त्तण्डादयनांशपरिष्कृतात् ।
अभुजान्तरसंस्काराद्यत्तत्फलयुगं पृथक् ॥ ४१ ॥
भूगोलमध्यपरिधिः स्वदेशाक्षकलाहतः ।
भचक्रलिप्तिका२१६००प्तः स्याद्रेखाद्युयाम्योत्तरान्तरम् ॥ ४२ ॥

---

* अत्र तत्सूर्य्यपदेनायनांशसंस्कृतसूर्य्यो व्यज्यते ।

प्राज्यक्रमेण यत्कार्य्यां पर्य्ययज्यादिमार्ज्जना ।
कुचनाचार्य्यवत्कुर्य्यां सूर्य्याद्यपदकाद्यतः ॥ ४३ ॥
तत्रादौ मध्यमार्कस्य मेषसंक्रमणादनु ।
एकादिवर्षसंख्योत्थसावनाहर्गणः क्रमात् ॥ ४४ ॥
पङ्क्तिभिर्लेखनीयोऽस्य सञ्चयो वारशोधनात् ।
विषमश्चेन्निरेको वा सैको वा क्रियतामसौ ॥ ४५ ॥
एवमानीय दिवसं पञ्जिकामुखसम्मतम् ।
तत्प्राग्दिने स्वपदकैः कार्य्यो राश्यादिसञ्चयः ॥ ४६ ॥
अत्राधोऽधःस्थराश्यादिपञ्चकाख्याः कुवासराः ।
एकाद्यर्बुदपर्य्यन्ताः स्थाप्यास्तत्पदकान्वतः ॥ ४७ ॥
कल्पादिकरणाब्दादिध्रुवाः खेटोच्चपातजाः ।
द्वेधा लेख्या गतिच्छेदहारदेशजलिप्तिकाः ॥ ४८ ॥
पदकेषु त्रिसप्तत्या७२मूर्द्धस्थैकादिसंख्यया ।
दिनानां स्वस्वराश्याद्या मिश्रिताश्चक्रशेषिताः ॥ ४९ ॥
स्वध्रुवाख्या मध्यशीघ्राश्चन्द्रोच्चसहिता ग्रहाः ।
लङ्कार्द्धरात्रे कल्पादेः करणाब्दा दिनोदये ॥ ५० ॥
भवन्ति चन्द्रपातस्य ध्रुवस्तद्युक्तिवर्ज्जितः ।
योजयेत् तद्ध्रुवे चक्रमधिके फलसञ्चये ॥ ५१ ॥
क्वचित्पदके नष्टे सन्दिग्धाङ्के नभःसदाम् ।
तत्सङ्ख्याहर्गणो भुक्तिगुणितस्तत्पदं भवेत् ॥ ५२ ॥
एवमानीय रव्यादींस्ततो देशादिसंस्कृतिम् ।
कृत्वा खण्डफलैः पश्चात् स्फुटीकरणमाचरेत् ॥ ५३ ॥
लेख्ये स्वस्वप्रकाशेषु निवेश्यं पदकादिकम्* ।

---

* अथ पदकानि परिशिष्टे द्रष्टव्यानि ।

ग्रन्थे यन्त्रालयोत्थे तु सर्व्वाणीतोऽत्र यथाक्रमम् ॥ ५४ ॥
सिद्धान्तक्रमसंसिद्धस्फुटीकरणलेखनात् ।
अनन्तरं फलान्येषां लिखिष्यन्ते यथाक्रमम् ॥ ५५ ॥

इति खगभगणेभ्यः प्राक्फलैः संवदन्तो
ध्रुवगतिपदलेखालेखि सौख्यार्थमेषा ।
खचरविषमभावे दृश्यमाने तु भुक्ति-
ध्रुवपदककृतिस्ताद्दृश्यमानोत्तरार्थे ॥ ५६ ॥

यन्नीशन्ति चिरन्तनाः सभकलां वेदाङ्गुला४।२७अयनांशा
प्राग्देशान्तरसाधितानि विपलान्यब्धिर्मिवेदद्विपान्८४२४ ।
तां तान्यष्टकलोनितां४।१९ फणिगुरुकलाङ्का८९ [illegible]
राजन् राजतु राजराजसुहृदा गेयो गिरीशः समं ॥ ५७ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितैकसिद्धे ॥
सिद्धान्तदर्पण उपाहितबालबोधे
तुर्य्यो ययौ सपदसंस्कृतिमान् प्रकाशः ॥ ५८ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे मध्यमाधिकारे
नानाविधसंस्कारपदकवर्णनो नाम चतुर्थः प्रकाशः ।

स्फुटाधिकारः ।

पञ्चमः प्रकाशः ।

ग्रहस्फुटीकरणम् ।

मध्ये चार्के महीनिष्ठदृष्टितुल्या स्फुटीकृतिः ।
ग्रहाणां पातकद्वात्वं न घटेत यया विना ॥ १ ॥
ग्रहकक्षास्थो मरुद्भूमिं परिक्रामति सर्व्वदा ।
पश्चिमाभिमुखस्तेनाकाशे ज्योतिर्गणोऽन्वहम् ॥ २ ॥
याति यत्पश्चिमामाशामुदिता साङ्गिकी मतिः ।
तां भित्त्वा यद्ग्रहगणः स्वस्वशक्त्यनुसारतः ॥ ३ ॥
स्तोकेन याति पूर्व्वाशां सोक्ता स्वाभाविकी गतिः ।
शीघ्रमन्दवशाद्भिन्ना दृश्यन्ते स्फुटखेचराः ॥ ४ ॥

सूर्य्यसिद्धान्ते —

अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः । इति ॥ ५ ॥
तत्र मध्यममार्त्तण्डः परितो मण्डलं भुवः ।
भ्रमन् ताराखेचराणां कक्षामध्यस्थ उच्यते ॥ ६ ॥
तं भ्रमन्तो महीजाद्यास्तत्सङ्गेन भुवं पुनः ।
परिक्रामन्ति यत्तस्मात् स प्रोक्तः सर्व्वकर्षकः ॥ ७ ॥
तथापि कुजजीवार्किभुक्तिभ्यो महती यतः ।
तद्गतिः सततस्तेषां शीघ्रतुङ्गो निगद्यते ॥ ८ ॥
बुधशुक्रस्वभुक्तिभ्यामल्पत्वाद्भास्वतो गतेः ।
तयोर्मध्यग्रहो भानुः स्वयं तौ शीघ्रसंज्ञकौ ॥ ९ ॥

बुधशुक्रावनीपुत्रबृहस्पतिशनैश्चराः ।
सूर्य्यात् क्रमेण दूरस्थाः स्वस्वकक्षासु यान्ति यत् ॥ १० ॥
विधिना तत्क्रमेणैव यच्चाल्पगतयः स्मृताः ।
सुतरामेव दृश्यन्ते तथा भूगोलवासिभिः ॥ ११ ॥
चन्द्रस्य त्वर्कवद्भ्रान्तिर्भूमेर्निकटवर्त्तिनः ।
योजनात्मगतिर्न्यूना महती लिप्तिकात्मिका ॥ १२ ॥
भूगोलापेक्षया भानोर्ज्ञशुक्रौ निकटौ यतः ।
तस्माच्चक्रान्तवद्दृश्यौ चक्रार्द्धेऽपि सहांशुना ॥ १३ ॥
कुजेज्यशनयो यस्माद्दूरगास्तदपेक्षया ।
चक्रे ससूर्य्या दृश्यन्ते चक्रार्द्धे भिन्नदिश्यतः ॥ १४ ॥
सूर्य्याद्भिन्नदिशोः स्थानं भूताराग्रहयोर्यदा ।
ऋज्वी गतिस्तदा ताराग्रहस्य प्रेक्ष्यते भुवि ॥ १५ ॥
यदैकदिगवस्थानं तयोर्भवति सूर्य्यतः ।
वक्रा गतिस्तदा तस्य मध्याशुगतिभेदजा ॥ १६ ॥
मन्दापकर्षणं हित्वा सदार्कात् समदूरगाः ।
यान्ति ताराग्रहाः प्राचीं भचक्रमनुलक्ष्यते ॥ १७ ॥
भचक्रमध्यगा भूमिर्भौमादेर्मध्यगो रविः ।
भार्कसङ्गतसूत्रं तत् समं चक्रार्द्धचक्रयोः ॥ १८ ॥
राशिचयान्ते भूसूत्राद्भार्कगं वक्रितं यतः ।
तद्भेदः शीघ्रपरिधेरोजयुग्मपदान्तयोः ॥ १९ ॥
क्ष्मार्कान्तरवियन्मानात् खरसाग्नि३६०गुणाधिकः ।
भानां पन्था हि दूरस्थस्तस्मिन्नर्कपथाहृते ॥ २० ॥
फलं हरणमेतेन भगणांशा३६० विभाजिताः ।
लब्धोऽंशः शीघ्रपरिधेरोजयुग्मान्तरं मतः ॥ २१ ॥

कक्षाकथनकालेऽहं वक्ष्ये परिधिसम्भवम् ।
साक्षादनुभवादन्यापेक्षा शास्त्रे न वर्त्तते ॥ २२ ॥
रव्यादेर्मन्दतुङ्गाख्या देवा ये सन्ति दूरगाः ।
तद्वातरश्मिभिर्बद्धा ग्रहास्तैरपकर्षिताः ॥ २३ ॥
स्वदिङ्मुखं तथासन्नाः क्षप्यन्ते बहुदूरगाः ।
स्वल्पं तान् प्रवहः स्वांशैः पाशरूपैः प्रभञ्जनैः ॥ २४ ॥
स्वतुङ्गाभिमुखानेव प्रेरयत्यनिशं दिवि ।
सू—पूर्व्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम् ॥ २५ ॥
ग्रहात्प्राग्भगणार्द्धस्थः प्राङ्मुखं कर्षति ग्रहम् ।
उच्चसंज्ञोऽपरार्द्धस्थस्तद्वत्पश्चान्मुखं ग्रहम् ॥ २६ ॥
स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति यद्ग्रहाः ।
तत्तेषु धनमित्युक्तमृणं पश्चान्मुखेषु च । इति ॥ २७ ॥
मन्दस्फुटग्रहान् पाताश्चन्द्रादीन् याम्यसौम्ययोः ।
विक्षिपन्त्येष विक्षेपः स्वक्रान्त्यन्तात्कलात्मकः ॥ २८ ॥
सू—उत्तराभिमुखं पातो विक्षिपत्यपरार्द्धगः ।
ग्रहं प्राग्भगणार्द्धस्थो याम्यायामपकर्षति । इति ॥ २९ ॥
पूर्व्वापरगतः पातौ बुधभार्गवशीघ्रयोः ।
पूर्व्ववद्विक्षिपत्येतौ शास्त्रे तच्छक्तिरूपगौ ॥ ३० ॥
स्वपातसमखेटस्य पातचक्रार्द्धगस्य च ।
विक्षेपो नीजपादान्ते परमोऽसौ शराभिधः ॥ ३१ ॥
मध्येषु लिप्ताः परमा विधोर्नवखवह्नयः३०९ ।
कुजस्य कुवरा१११ ज्ञस्य शतभूपा१६४ बृहस्पतेः ॥ ३२ ॥
गजाद्रयो७८ऽथ शुक्रस्य वसुवेदनिशाकराः१४८ ।
शनेर्गोमनव१४९स्तासां पश्चाद्वक्ष्ये स्फुटीकृतिम् ॥ ३३ ॥

भूलोकलोचनग्राह्या भुक्तिः स्फुटगतिर्मता ।
सा त्रिधा प्राग्गतिः पश्चाद्गतिः शून्येति भेदतः ॥ ३४ ॥
प्राग्गतिः पञ्चधा पश्चाद्गतिर्द्वैविध्यमागता ।
तृतीयैकविधेत्येव भौमादिगतिरष्टधा ॥ ३५ ॥
सू—वक्रानुवक्रा विकला मन्दा मन्दतरा समा ।
तथा शीघ्रतरा शीघ्रा कथितैषां स्वनामभिः । इति ॥३६॥
पश्चाद्गतिः क्षीयमाणा वक्रेति गदिता बुधैः ।
वर्द्धमानानुवक्रा सा तदन्ताद्यौः क्रमेण या ॥ ३७ ॥
स्तम्भिता सैव विकला कलाशून्यत्वहेतुतः ।
वक्रत्वाभिवियोगाभ्यां प्राक्पश्चादन्वहं गतिः ॥ ३८ ॥
क्षीयमाणा वर्द्धमाना स्वल्पा मध्यगतेः क्रमात् ।
उक्ता मन्दतरा मन्दा मध्यतुल्या गतिः समा ॥ ३९ ॥
मध्याधिका वर्द्धमाना क्षीयमाणा पुरोगतिः ।
भवेच्छीघ्रतरा शीघ्रा क्रमतश्चक्रसन्निधौ ॥ ४० ॥
रवीन्द्वोर्मन्दतुङ्गोत्था मन्दा मन्दतरा समा ।
शीघ्रा शीघ्रतरा भुक्तिः पूर्व्ववत्पञ्चधेति सा ॥ ४१ ॥
सू– तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः ।
प्रयान्ति तत्प्रवक्ष्यामि स्फुटीकरणमादरात् । इति ॥ ४२ ॥
आचार्य्यत्वं यया याति जगति ज्ञाततया जनः ।
सतां हिताय तां वच्मि ज्याधनुष्कर्मपद्धतिम् ॥ ४२ ॥
ओतप्रोतैर्यथा वस्त्रं तन्तुभिः सन्ततं तथा ।
गोलः क्रमोत्क्रमज्याभिः सन्दृब्धोऽयं समन्ततः ॥ ४४ ॥
ज्यार्द्धाग्रे खेचरा मध्यसूत्रात्तिर्य्यक्स्थिता यतः ।
ज्यार्द्धैः सकलकर्म्माणां ज्यार्द्धं ज्येत्यत्र सम्मतम् ॥ ४५ ॥

भचक्रचक्रवालार्द्धदलं चापनिभं यतः ।
तद्व्यासरेखा मध्यस्था जीवारूपा तदुच्यते ॥ ४६ ॥
चयस्तयो गुह्या ग्राह्या भुजकोटितया यतः ।
ततो व्यासदलं त्रिज्या परमवृत्तमध्यतः ॥ ४७ ॥
परिधिः षण्णवत्यंशः समो यस्मान्मतस्ततः ।
राशिलिप्ता१८००ष्टमो भागः२२५ प्रथमज्यार्द्धमुच्यते ॥४८॥
आद्यखण्डान्तरञ्चैतद्भक्तो ज्यापिण्ड आदिमः ।
लब्धोनमाद्यं द्वैतीयखण्डान्तरमिदं भवेत् ॥ ४९ ॥
तद्युक्तं प्रथमज्यार्द्धं द्वितीयज्यार्द्धमुच्यते ।
पुनराद्येन तद्भक्तं शेषः स्वार्द्धाधिको यदि ॥ ५० ॥
तल्लोपादेकयुग्लब्धं कार्य्यमर्द्धोन एव लुक् ।
द्वितीयखण्डविवरं तल्लब्धोनं तृतीयकम् ॥ ५१ ॥
तद्युग्द्वितीयजीवार्द्धं तृतीयज्यार्द्धपिण्डकः ।
आद्येनैवं क्रमात्पिण्डान् भक्त्वा लब्धोनितैर्युतैः ॥ ५२ ॥
चतुर्विंशतिखण्डैः स्युः क्रमज्या पिण्डलिप्तिकाः ।
किन्तु ज्यापिण्डतः षष्ठात् सप्तमाद्द्वादशादपि ॥ ५३ ॥
एकविंशात् पञ्चदशाद्विंशात्सप्तदशात्तथा ।
द्वारशेषाद्दलुक् प्रोक्तो नारदाय स्वयम्भुवा ॥ ५४ ॥
सू—तत्त्वाश्विनोऽङ्काब्धिकृता रूपभूमिधरर्त्तवः ।
खाङ्काष्टौ पञ्चशून्येशा बाणरूपगुणेन्दवः ॥ ५५ ॥
शून्यलोचनपञ्चैकाश्छिद्ररूपमुनीन्दवः ।
वियच्चन्द्रातिधृतयो गुणरन्ध्राम्बराश्विनः ॥ ५६ ॥
मुनिषड्यमनेत्राणि चन्द्राग्निकृतदस्रकाः ।
पञ्चाष्टविषयाक्षीणि कुञ्जराश्विनगाश्विनः ॥ ५७ ॥

रन्ध्रपञ्चाष्टकयमा वस्वद्र्यङ्कयमास्तथा ।
कृताष्टशून्यज्वलना नगाद्रिशशिवह्नयः ॥ ५८ ॥
षट्पञ्चलोचनगुणाश्चन्द्रनेत्राग्निवह्नयः ।
यमाद्रिवह्निज्वलना रन्ध्रशून्यार्णवाग्नयः ॥ ५९ ॥
रूपाग्निसागरगुणा वस्वग्निकृतवह्नयः । इति ।
उत्क्रमज्या अथोच्यन्ते त्रयोविंशादिखण्डजाः ॥ ६० ॥
शोज्झ्योत्क्रमेण व्यासार्धादेकद्वित्र्यादिखण्डजाः ।
जायन्ते चापशिञ्जिन्योरन्तः शरवदूर्ध्वतः ॥ ६१ ॥
सू— मुनयो रन्ध्रयमला रसतर्का मुनीश्वराः ।
द्व्यष्टैका रूपषड्दस्राः सागरार्थहुताशनाः ॥ ६२ ॥
खर्तुवेदा नवाद्र्यर्था दिङ्नागास्त्र्यर्थकुञ्जराः ।
नगाम्बरवियच्चन्द्रा रूपभूधरशङ्कराः ॥ ६३ ॥
शरार्णवहुताशैका भुजङ्गाक्षिशरेन्दवः ।
नवरूपमहीध्रैका गजैकाङ्कनिशाकराः ॥ ६४ ॥
गुणाश्विरूपनेत्राणि पावकाग्निगुणाश्विनः ।
वस्वर्णवार्थयमलास्तुरङ्गर्तुनगाश्विनः ॥ ६५ ॥
नवाष्टनवनेत्राणि पावकैकयमाग्नयः ।
अष्टाग्निसागरगुणा उत्क्रमज्यार्धपिण्डकाः ॥ ६६ ॥
ग्रहं संशोध्य मन्दोच्चात्तथा शीघ्राद्विशोध्य च ।
शेषं केन्द्रं पदं तस्माद्भुजज्या कोटिरेव च ॥ ६७ ॥
गताद्भुजज्या विषमे गम्यात्कोटिः पदे भवेत् ।
युग्मे तु गम्याद्बाहुज्या कोटिज्या तु गताद्भवेत् । इति ॥ ६८ ॥
तस्माद्राशित्रयादर्वाग्भाद्यं बाहुर्यथा स्थितम् ।
त्रिभोर्ध्वं शोधितं षड्भ्यः षडूर्ध्वं षड्भिरुज्झितम् ॥ ६९ ॥

खण्डसंख्या	क्रमज्या	अन्तराणि	उत्क्रमज्या	अन्तराणि
०	०	२२५	०	७
१	२२५	२२४	७	२२
२	४४९	२२२	२९	३७
३	६७१	२१९	६६	५१
४	८९०	२१५	११७	६५
५	११०५	२१०	१८२	७९
६	१३१५	२०५	२६१	९३
७	१५२०	१९९	३५४	१०६
८	१७१९	१९१	४६०	११९
९	१९१०	१८३	५७९	१३१
१०	२०९३	१७४	७१०	१४३
११	२२६७	१६४	८५३	१५४
१२	२४३१	१५४	१००७	१६४
१३	२५८५	१४३	११७१	१७४
१४	२७२८	१३१	१३४५	१८३
१५	२८५९	११९	१५२८	१९१
१६	२९७८	१०६	१७१९	१९९
१७	३०८४	९३	१९१८	२०५
१८	३१७७	७९	२१२३	२१०
१९	३२५६	६५	२३३३	२१५
२०	३३२१	५१	२५४८	२१९
२१	३३७२	३७	२७६७	२२२
२२	३४०९	२२	२९८९	२२४
२३	३४३१	७	३२१३	२२५
२४	३४३८	०	३४३८	०

नवोर्द्धं चक्रशुद्धं दोस्त्रिभेभ्यः कोटिरुज्झितः ।
शोधकाच्छोध्यमल्पञ्चेच्छोध्यं भगणयुक्तदा ॥ ७० ॥
मू–लिप्तास्तत्त्वयमै२२५र्भक्ता लब्धं खण्डज्यकामता ।
मतगम्यान्तराभ्यस्तः शेषस्तत्त्वाश्विभि२२५र्हृतः ॥ ७१ ॥
तदवाप्तफलं योज्यं ज्यापिण्डे गतसंज्ञके ।
क्रमज्यानां विधिरयमुत्क्रमज्यास्वपि स्मृतः । इति ॥ ७२ ॥
ज्यापिण्डतः स्वाभिमताच्छोध्यानां खण्डमौर्व्विकाम् ।
शेषं तत्त्वाश्वि२२५गुणितं हृत्वा तद्विवरेण च ॥ ७३ ॥
फलं तत्त्वाश्विगुणया गतज्याखण्डसङ्ख्यया ।
संयोजयेद्धनुरिदं भुजकोट्योः कलात्मकम् ॥ ७४ ॥
त्रिज्यावर्गा११८१९८४द्भुजज्याया वर्गोज्झावशेषतः ।
पदं कोटिज्यकाकोटेरेवं दोर्ज्यापि साध्यताम् ॥ ७५ ॥
कुजज्ञशनिमन्दानां प्राक्पश्चाच्चलने वशात् ।
ज्ञशीघ्रस्यापि क्लृप्तोऽन्यः परोच्चाख्यः सुरौ मया ॥ ७६ ॥
सषड्भः सूर्य्यमध्यः स्याद्भूमिपुत्रपरोच्चकः ।
ज्ञपरोच्चौ मृदोः शीघ्रः शीघ्रस्यापि मृदूच्चकः ॥ ७७ ॥
धृत्यं१८शोनः शनिर्मध्यः स्वमन्दस्य परोच्चकः ।
मन्दोच्चादिवदेतेऽपि न दृश्याः कालमूर्त्तयः ॥ ७८ ॥
एवमन्ये सूक्ष्मरूपाः सन्त्यसङ्ख्या नभश्चराः ।
तथैवोपग्रहाः सन्ति ग्रहवेष्टनकारिणः ॥ ७९ ॥
ते सूक्ष्मयन्त्रलक्ष्यत्वात् पूर्व्वगत्या ग्रहा इति ।
उन्नीता अपि धात्राद्यैरनुक्तत्वादिहोज्झिताः ॥ ८० ॥
ज्ञशीघ्राद्धृति१८भागोनमध्यार्कः स्वमृदूच्चकौ ।
प्रोज्झ्यशेषात् केन्द्रदोर्ज्यां हृत्वा खाष्टर्त्तुभि६८०र्विदः ॥ ८१ ॥

शनेस्त्रिशत्या२००थ भजीत्रिज्यया३४३८ जतुलादिगे ।
तत्केन्द्रे फललिप्तादि स्वमृणं मन्दतुङ्गयोः ॥ ८२ ॥
स्वशीघ्रे तत्फलं वामं कुर्य्यात्ते स्युस्तयः स्फुटाः ।
भौमस्य प्रथमे शीघ्रकेन्द्रे नक्रादिषट्कगे ॥ ८३ ॥
नैतत्कार्य्याथ कर्क्यादौ तत्र स्यादब्दजं मृदुम् ।
तत्परीक्षाद्विशोध्यास्ते तद्भज्याग्रां खशराब्धिभिः४५० ॥ ८४ ॥
हत्वा त्रिज्याप्तमस्यादिकेन्द्रकोटिकलाहतम् ।
त्रिभलिप्ता५४००समेतेन संस्कृतः स्यान्मृदुः स्फुटः ॥ ८५ ॥
तत्कोटिफलमारस्य प्राग्वद्द्राक्कोटिसंस्कृतम् ।
मध्यार्कगत्या गुणितं शनेः कोटिफलं ततः ॥ ८६ ॥
स्वमध्यगत्याथ विदः शीघ्रगत्या तदाहतम् ।
त्रिज्याप्तानि कला लब्धास्तन्मन्दानां द्युभुक्तयः ॥ ८७ ॥
नक्रकर्क्यादि तत्केन्द्रकज्याग्रो वक्रा भवन्ति ताः ।
वक्रर्जुशीघ्रभुक्त्याप्यहीना तद्वाग्गतिः स्फुटा ॥ ८८ ॥
मन्दोच्चाकर्षणफलं यस्य यस्य हि दृश्यते ।
परमं यत्तदभ्यस्ताश्चक्रलिप्ताः२१६०० समुद्धृताः ॥ ८९ ॥
त्रिज्यया३४३८ तत्फलं तत्तत् स्वमन्दपरिधिर्भवेत् ।
क्वाप्यूनाधिकता यस्मात् फलस्य परिधेस्ततः ॥ ९० ॥
युग्मपादान्तजाच्छीघ्रपरिधेर्विषमान्तजः ।
न्यूनः शनिकुजेज्यानामधिकः स्यात्सितज्ञयोः ॥ ९१ ॥

सू—रविमन्दपरिध्यंशा
मनवः१४ शीतगो रदाः३२ ।
युग्मान्ते विषमान्ते तु
नख२०लिप्तोनितास्तयोः । (र)१३।४०।(च)३१।४०। इति ॥९२॥

त्र्यंशोनेन्द्र१३।४०लवा भानोर्जिन२४लिप्तोनिताः स्फुटाः[illegible] ।
चन्द्रस्य सर्व्वदेत्युक्ताः सिद्धान्तशिरोमणौ ॥ ९३ ॥
मया तु भेन्दुयुत्यर्कचन्द्रान्तरविवेकतः ।
कथ्येते दृक्समौ मन्दपरिधी रविचन्द्रयोः ॥ ९४ ॥
मन्दकेन्द्रौजपादान्ते भानोः षट्कलिकान्विताः ।
तदंशा भानव१२।६श्चन्द्रस्यार्द्धोना दशना३१।३० इह ॥ ९५ ॥
रवेश्चक्रे स्वकेन्द्रस्य रवि१२लिप्तोनिताः११।५४ स्फुटाः ।
चक्रार्द्धे सिद्ध२४लिप्ताढ्याः१२।३० स्फुटतास्य च कथ्यते ॥ ९६ ॥
रस६घ्नी केन्द्रकोटिज्या त्रिज्या३४३८प्ता कलिकाफलैः ।
क्रमान्मकरकर्क्यादौ हीनाढ्या धृति१८लिप्तिकाः ॥ ९७ ॥
केन्द्रकोटिज्ययाभ्यस्तास्त्रिज्या३४३८प्तास्वफलैः पुनः ।
युतोनः कर्किनक्रादावोजान्तपरिधिः१२।६ स्फुटः ॥ ९८ ॥
एष सूक्ष्मविधौ कार्य्यः स्थूले तु स्वाङ्क९भागयुक् ।
प्राग्भिरिष्टे पर्व्वसन्धिमानदृक्साम्यलाभतः ॥ ९९ ॥
विधोरुक्तः स३१।३० कोटिज्यागुणितैस्त्रिगुणो३४३८द्धृतैः ।
खगुणैः३० कर्किनक्रादौ कलाभिर्युग्वियुक् स्फुटः ॥ १०० ॥
कुजादीनां क्रमादंशा गोऽङ्गानि६९ गिरिबाहवः२७ ।
सार्द्धाब्धिरामा३४।३०स्तपना१२ गोऽग्नयः३९ परिधेर्मृदोः ॥१०१॥
शैघ्राः परिधयो भौमादयुग्मान्तेऽष्टाग्निबाहवः२३८ ।
नवविश्वे१३९ खगिरयो७० भूषट्पक्षा२६१ नवाग्नयः३९॥१०२॥
ओजान्तेऽद्र्यग्निनेत्राणि२३७ नभःशक्रा१४० नवर्त्तवः६९ ।
द्व्यङ्गपक्षा२६२ गजगुणा३८स्तेषान्तु स्फुटतोच्यते ॥ १०३ ॥
ओजयुग्मपदान्तोत्थपरिध्योर्व्विवरा१हता ।
भुजज्या त्रिज्यया३४३८ भक्ता तत्फलं कलिकादिकम् ॥ १०४ ॥

युग्मपादान्तपरिधी भवति प्रोज्झितं ततः ।
अल्पमाने धनं तस्मिन्नेवं परिधयः स्फुटाः ॥ १०५ ॥
इक्षिद्वैत्र पुनराराशु केन्द्रदोःकलिकाहृताः ।
खरामैः३० फलयुक्तार्थ्यैः बौजो द्राक् परिधिः स्फुटः ॥१०६॥
तमन्त्यकेन्द्रचरणयातैष्याल्पकागुणः ।
कर्कादौ वसुभिः८भागैर्नक्रादौ गुणितोऽब्धिभिः४ ॥ १०७ ॥
शाङ्करामिज्यया२४३१ भक्तः फलैरंशादिभिस्ततः ।
समन्वितः स्फुटो मन्दपरिधिर्गोरसां६९शकः ॥ १०८ ॥
अथैतत्फलवैषम्यपरिहाराय केन्द्रके ।
नागाङ्गाष्टाब्धि४८६८लिप्तातः खाङ्कार्थेन्दु१५९०कलात्मके ॥१०९॥
भुजेन्द्रतिथिलिप्तातः१५१४२ खगोऽर्थेन्दु१५९०कलात्मके ।
परिध्यनादरः किन्तु फलज्याघ्नं त्रिराशिजम्११।२।४७॥११०॥
बुधस्य मन्दकेन्द्राङ्घ्रिगतैष्याल्पबालाज्यका ।
नवाहता लब्धलिप्तोनः स्यान्मन्दपरिधिः स्फुटः ॥ १११ ॥
शुक्रस्य मन्दपरिधिः केन्द्रदोर्ज्याद्वि२घाततः ।
त्रिज्या३४३८भक्तात् फलांशादिरहितः स्फुट उच्यते ॥ ११२ ॥
सू—तद्गुणे भुजकोटिज्ये भगणांश३६०विभाजिते ।
तद्भुजज्याफलधनुर्भाद्यं लिप्तादिकं फलम् । इति ॥ ११३ ॥
तत्त्वनेत्रो२२५नलिप्तानां समभावाद्धनुष्क्रिया ।
नेष्यते बहुतायान्तु ततस्तत्कर्म युज्यते ॥ ११४ ॥
सू—शैघ्र्यं कोटिफलं केन्द्रे
मकरादौ धनं स्मृतम् ।
संशोध्यन्तु त्रिजीवायां३४३८
कर्क्यादौ कोटिजं फलम् । इति ॥ ११५ ॥

सैवोक्ता संस्कृतत्रिज्या ज्यारूपं भुजकोटिजम् ।
फलमत्रैव गृह्णेत धनर्णकृतिकर्म्मणि ॥ ११६ ॥
सू तद्वाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः ।
त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितम् ॥ ११७ ॥
लब्धस्य चापं लिप्तादिफलं शैघ्र्यमिदं स्मृतम् ।
एतदादौ कुजादीनां चतुर्थे चैव कर्म्मणि ॥ ११८ ॥
मान्द्यं कर्म्मैकमर्केन्द्वोर्भौमादीनामथोच्यते ।
शैघ्र्यं मान्द्यं पुनर्मान्द्यं शैघ्र्यं चत्वार्य्यनुक्रमात् ॥ ११९ ॥
अजादिकेन्द्रे सर्व्वेषां मान्द्ये शैघ्र्ये च कर्म्मणि ।
धनं ग्रहाणां लिप्तादितुलादावृणमेव तत् । इति ॥ १२० ॥
मध्यः शैघ्र्यफलार्द्धेन संस्कृतः प्रथमो ग्रहः ।
तदूनितमृदूत्थेन फलार्द्धेन स संस्कृतः ॥ १२१ ॥
द्वितीयस्तेन संशुद्धान्मन्दात् यत् सकलम्फलम् ।
तत्संस्कृतो मध्यखगो मन्दस्पष्टस्तृतीयकः ॥ १२२ ॥
तदूनिताच्छीघ्रतुङ्गात् सकलेन फलेन सः ।
संस्कृतः स्फुटतामेति तुर्य्यः सूर्य्यादिशासनात् ॥ १२३ ॥
त्रिचतुःफलयोर्घातात् कुजस्य तु कलात्मनोः ।
दिग्१०घ्नान्त्यकर्णविहृतात् फललिप्ता युतोनितः ॥ १२४ ॥
मन्दकेन्द्रेऽजतौल्यादौ स भवेत् पञ्चमः स्फुटः ।
पुनस्तृतीयकेन्द्रेऽस्य कर्क्यादिस्थे तुरीयकम् ॥ १२५ ॥
फलं पञ्चेषु५५भक्ताप्तं मन्दकोटिज्यया हतम् ।
तुर्य्यकर्णहृतं लब्धं तुरीयफलवत्कुजे ॥ १२६ ॥
पञ्चमे संस्कृतं चेत्स्यात् षष्ठः स्पष्टतमस्तदा ।
भवेत् स मन्दकेन्द्रे तु नक्रादावेव पञ्चमः ॥ १२७ ॥

परोच्चसंस्कृताज्जस्य शीघ्रान्मध्यस्य शोधनात् ।
प्राक्फलार्धं पृथङ्न्यस्य फले मान्द्यार्धमान्द्यके ॥ १२८ ॥
कृत्वा तृतीयं हि स्थाप्यमथः शैघ्र्यार्धसङ्गुणात् ।
अन्त्यशैघ्र्यार्धे१८०भक्तात्सफलचापशोधितं स्फुटम् ॥ १२९ ॥
मध्यात्तत्संस्कृतात् तुर्यं फलमानीय तद्विधा ।
पृथक्तृतीयकोट्युत्थफलघ्नात्त्रिज्यया हृतात् ॥ १३० ॥
लब्धमूर्ध्वं धनमृणं क्रमात्कर्किमृगादिगे ।
मन्दकेन्द्रे स्फुटं तस्मादथ भुक्तिर्विविच्यते ॥ १३१ ॥
पूर्व्वापरदिनस्पष्टग्रहान्तरकलागतिः ।
स्फुटेति सम्मता किञ्चिद्भेदगापि प्रतिक्षणम् ॥ १३२ ॥
मन्दोच्चभुक्तिरहिता मध्यभुक्तिर्ग्रहस्य या ।
मन्दकेन्द्रगतिः सेयं मन्दकोटिफलज्यया ॥ १३३ ॥
गुणिता त्रिज्यया३४३८ भक्ता मन्दभुक्तिफलम्भवेत् ।
कर्क्यादिकेन्द्रे तेनाढ्या मकरादौ च वर्ज्जिता ॥ १३४ ॥
ग्रहस्य मध्यमा भुक्तिर्मन्दस्फुटगतिर्भवेत् ।
प्रातः सा सकृदानीता तदहोरात्र इष्यते ॥ १३५ ॥
प्रातरर्कोनशुभ्रांशोस्तिथ्यन्तो यः प्रसाध्यते ।
पुनस्तत्कालचन्द्रस्य गत्या तत्कालजातया ॥ १३६ ॥
संस्कार्य्यास्तत्र शुद्ध्यर्थं गतगम्यपलादयः ।
श्राद्धादिसमयव्याप्तिसन्देहे ग्रहणे तथा ॥ १३७ ॥
कर्म्मेदमिष्यतेऽन्यत्र व्यवहारेषु नैव तत् ।
तेषु ग्राह्यं स्फुटार्केन्द्वोः पूर्व्वापरदिनान्तरम् ॥ १३८ ॥
शीघ्रोच्चभुक्तिर्मध्योना शीघ्रकेन्द्रगतिर्मता ।
फलांशान् खाङ्क९०भागेभ्यः शैघ्रान् संशोध्य शेषतः ॥ १३९ ॥

क्रमज्यापिण्डमानीय तेन द्राक्केन्द्रजां गतिम् ।
गुणितां चलकर्णाप्तां शीघ्रभुक्तेर्विशोधयेत् ॥ १४० ॥
शीघ्रस्फुटगतिः शेषो यदि शुद्धिर्विलोमतः ।
सम्भवेदवशिष्टा तद्गतिर्वक्रेति कथ्यते ॥ १४१ ॥
एवं मन्दस्फुटा शीघ्रस्फुटा भुक्तिर्द्विधोदिता ।
स्फुटभुक्तिरथो ताराखेचराणां विविच्यते ॥ १४२ ॥
शीघ्रस्फुटगतिर्मध्याधिका चेन्मध्यशोधिता ।
मध्योना शोधिता मध्यभुक्तेर्यत्स्यात्तदन्तरम् ॥ १४३ ॥
वक्रा मध्यान्विता चापि शैघ्रमध्यान्तराभिधम् ।
तत्स्यादाद्यं गतिफलं तदर्द्धेनैव मध्यमा ॥ १४४ ॥
शीघ्रस्फुटगतेर्मध्याधिकोनत्वे युतोनिता ।
वक्रत्वेऽप्यूनिता तेन ऋज्वी स्यात्प्रथमा गतिः ॥ १४५ ॥
सम्भवेद्व्यस्तशुद्धिश्चेद्वक्रा सा शेषसम्मिता ।
मन्दकोटिफलघ्नी सा त्रिज्या२४३८प्ता तत्फलार्द्धतः ॥ १४६ ॥
युतोना कर्किनक्रादिकेन्द्रयोः स्याद्द्वितीयका ।
कोटी फलघ्नी त्रिज्याप्ता सा तत्पूर्णफलेन च ॥ १४७ ॥
संस्कृता मध्यमा प्राग्वत्तृतीया स्यात्तदुज्झिता ।
शीघ्रान्त्यकेन्द्रभुक्तिः सा फलखाङ्का९ऽन्तरज्यया ॥ १४८ ॥
क्षुण्णाकर्णाप्तहीनाशु भुक्तिः स्फुटगतिर्भवेत् ।
वामशुद्धौ तथा वक्रा स्फुटभुक्तिस्तृतीययोः ॥ १४९ ॥
अन्तरं स्याद्गतिफलं तुरीयं प्रथमक्रमात् ।
कदाचित्क्तयेहौज्झि सौरोक्तं भुक्तिसाधनम् ॥ १५० ॥
कुजज्ञशनिमन्दोच्चगतयस्त्वृजुवक्रिताः ।
प्रथमायां द्वितीयायां शोध्या योज्याः क्रमेण च ॥ १५१ ॥

ततो द्वित्रिगती साध्ये प्राग्वत्कोटिफलाहतेः ।
अस्य तु स्पष्टशीघ्रोच्चभुक्तेर्मध्यद्वतीयके ॥ १५२ ॥
प्रोज्झ्यादितुर्य्ये कर्त्तव्ये तत्र तुर्य्यगतेः फलम् ।
पृथक्संस्थाप्य तदधो मन्दकोटिफलाहतम् ॥ १५३ ॥
त्रिज्याप्तं मन्दकेन्द्रेऽस्य कर्क्यादौ मकरादिके ।
धनर्णमूर्द्ध्वे क्रमशः कृत्वा तद्विस्फुटं भवेत् ॥ १५४ ॥
शीघ्रार्द्धभुक्तौ वक्रायां यदि मान्द्यार्द्धजं फलम् ।
ऋणं तदा तयोर्योगो धनं चेद्वियुतेर्द्वयोः ॥ १५५ ॥
शेषो द्वितीयभुक्तिः स्याद्वक्रैवास्यास्तु संस्कृतेः ।
यस्मान्मन्दफलं कर्क्किनक्राद्योः स्वर्णमेव तत् ॥ १५६ ॥
स्फुरन्ति गत्यानयने बहुधा कल्पना अपि ।
क्लिष्टभावादिह त्यक्ता ग्रहसञ्चारयुक्तयोः ॥ १५७ ॥
वर्त्तमानैष्यदिनजस्फुटग्रहकलान्तरम् ।
गृह्यतां भुक्तिरित्यर्कचन्द्रयोस्तु विशेषतः ॥ १५८ ॥
गुणर्त्तुचन्द्रै१६३स्तर्केन्द्रै१४६ रससूर्य्यै१२६र्नगाष्टिभिः१६७ ।
शररुद्रै११५श्चतुर्थांशकेन्द्रांशैर्भूसुतादयः ॥ १५९ ॥
सू–भवन्ति वक्रिणस्तैस्तैः स्वैः स्वैश्चक्राद्विशोधितैः ।
अवशिष्टांशतुल्यान्त्यकेन्द्रैरुज्झन्ति वक्रिताम् । इति ॥ १६० ॥
व्यवहारे च दृक्सिद्धावुदयास्तमयो द्विधा ।
खेचराणां स्थूलसूक्ष्मौ कथ्येते प्रथमाविह ॥ १६१ ॥
प्रतीच्यामन्त्यकेन्द्रांशैरस्तं यान्ति कुजादयः ।
दृक्सुरै२३२र्गोऽर्थशशिभि१५९ रसवेदाग्निभिः१४६ क्रमात् ॥१६२॥
कुभृद्वनै१७७स्त्र्यब्धिगुणैः३४३ प्राच्यामुद्यन्ति ते पुनः ।
द्विघ्नेन्द्रैः२८ कुनखैः२०१ शक्रै१४र्गुणाष्टविधुभि१८३र्घनैः१७ ॥१६३॥

प्राच्यामस्तं ज्ञशुक्रौ तु दिग्गुणै२१० रसनिर्जरैः३३६ ।
प्रतीच्यामुदयं यातः खशरैः५० कृतबाहुभिः२४ ॥ १६४ ॥
रुद्रै११रूनोऽधिकश्चन्द्रः सूर्य्याद्यात्यस्तमुद्गमम् ।
अथ स्वमन्दशीघ्राभ्यां पूर्व्वोक्तक्रमतश्चरः ॥ १६५ ॥
स्फुटग्रहो मन्दचलैः फलैर्व्यस्तधनर्णकैः ।
मुहुः सुसंस्कृतः स्थैर्य्यं प्राप्तो मध्यग्रहो भवेत् ॥ १६६ ॥

ग्रहस्फुटीकरणपरिश्रमभ्रम-
अनुष्यक्लमदपदं वदन्ति यत् ।
विलिख्यते मृदुचलखण्डजं फलं
मयामलं चपलविबोधदं हि तत् ॥ १६७ ॥

शून्यादिसिद्धा२४वधि खण्डसंख्याधोऽधो लिखेन्मान्द्यफलं लवाद्यम् ।
तदन्तरं सर्व्वखगस्य कोटिः फलं कुजादेश्च गते रवीन्द्वोः ॥ १६८ ॥
खा०द्यष्टवेदा४८वधि खण्डसंख्या तले तथा शैघ्र्यफलं लवाद्यम् ।
खण्डान्तजं खण्डफलान्तरोत्थलिप्तादयस्तच्चलकर्णलिप्ताः ॥ १६९ ॥
पश्चात् फलाद्यस्य विलेखनीया वक्रप्रवेशापगमस्वभागाः ।
द्राक्केन्द्रजाश्चास्तमयोदयांशाः कुजज्ञदेवेज्यसितासितानाम् ॥१७०॥

ग्रहोनमन्दोच्चभुजालयांश*-
लिप्ता विलिप्ताः पृथगष्टनिघ्नाः ।
अन्ताहृताः खर्त्तुभि६०र्खषड्भि६०-
र्वियद्गुणै३०स्तत्फलसंयुताश्च ॥ १७१ ॥
तद्राशिसंख्योत्थफलं गताख्यं
भागादयः खण्डफलान्तरघ्नाः ।

---

* भुजालयः राश्यादयः इत्यर्थः ।

यत्स्यात् खषड्६० भक्तफलाख्यमूल-
भागाः खरामै३०र्विहृताः फलं तत् ॥ १७२ ॥
शिष्टाद्विनिघ्नाः फलयुग्गताख्यं
मान्द्यं फलं प्राग्वदिदं धनर्णम् ।
खण्डान्तरघ्नी मृदुकेन्द्रभुक्ति-
स्त्वाश्वि२२५भक्ता फलमिष्टभुक्तेः ॥ १७३ ॥

स्यात्खण्डमध्येऽथ पुरः परोत्थखण्डोत्थलिप्ता फलमन्तरञ्च ।
शेषं गतिश्च स्फुटमेवमेतत् स्वर्णं कुजज्ञार्किमृदौ च शीघ्रे ॥ १७४ ॥
शीघ्राद्ग्रहोनाद्ग्रहषट्कमाद्यं केन्द्रङ्गतं गम्यमथान्त्यषट्कम् ।
तद्राशिभागादिकमष्टनिघ्नं प्राग्वद्धृतं राशिमितास्तु खण्डाः ॥१७५॥
यातास्तदुत्थं फलमंशकादेः खण्डान्तरघ्नात् खगुणा३०प्तयुक्तम् ।
वर्द्धिष्यमाणे फल एव कार्य्यं तत्क्षीयमाणे पतितं गताख्यात् ॥१७६॥

स्फुटं फलं शैघ्र्यमिदं धनर्णं
केन्द्रस्य पूर्व्वार्द्धपरार्द्धयोः स्यात् ।
शैघ्र्यार्द्धमान्द्यार्द्धसमग्रमान्द्य-
शैघ्र्यैः फलैः प्राग्वदिह क्रियाः स्युः ॥ १७७ ॥
सूर्य्येन्दुभौमपरिधिद्वयवृद्धिभेदा-
न्मान्द्यं फलं चलफलप्रतिमं विलेख्यम् ।
खण्डैर्गजाब्धिभिरिदं निजवर्द्धमान-
क्षीणत्वतः स्फुटमपीह न वक्रिता स्यात् ॥ १७८ ॥
भौमस्य यन्मृदुफलं परिधिक्रमोत्थं
द्वाविंशत२२स्तदिह सप्तसु७ खण्डकेषु ।
साध्यं न किन्तु भवनत्रयजं ११।२।४७ विलेख्यं
तत्र द्वयर्द्धिविषमत्वनिवृत्तिहेतोः ॥ १७९ ॥

द्राक्केन्द्रजाखण्डफलान्तरघ्नी भुक्तिर्हृता तत्त्वयमैः२२५ फलस्य ।
अर्द्धेन युक्तोनितमध्यभुक्तिर्भवेत्किलाद्या फलवृद्धिहान्योः ॥ १८५ ॥
द्वितीयमन्दोत्थफलान्तरघ्नी तत्त्वाश्वि२२५हृल्लब्धदलोनयुक्ता ।
सा नक्रकर्क्यादिकमन्दकेन्द्रे द्वितीयभुक्तिः पुनरेवमेषा ॥ १८१ ॥
फलान्तरघ्नीषुभुजाश्वि२२५भक्ता तल्लब्धहीनान्वितमध्यभुक्तिः ।
भवेत्तृतीया च तदुज्झिताशु भुक्तिर्भवेत्केन्द्रगतिस्तुरीया ॥ १८२ ॥
सा तुर्यखण्डान्तरसङ्गुणेषुपक्षाश्वि२२५हृल्लब्धयुतोनिता चेत् ।
स्फुटा फलर्द्धिक्षययोः स्वखण्डमध्येष्वियं स्यादृजुः पुरेव ॥ १८३ ॥
कुजज्ञसौरिप्रथमद्वितीयगत्योर्धनर्णं क्रमशो विधाय ।
वक्रर्जुमन्दोच्चगतिं द्वितीयतृतीयभुक्ती तत एव साध्ये ॥ १८४ ॥
मन्दर्जुभुक्तेः प्रथमाल्पका चेद्विलोमशुद्धेरवशेषतः स्यात् ।
द्वितीयभुक्तेश्च तथा तृतीयभुक्तेः फलं किन्तु धनर्णवामम् ॥ १८५ ॥
एवंविधे सम्भवतस्त्रयाणां द्वितीयतार्त्तीयगती परोक्षात् ।
वक्रादिमा मन्दविदोस्तनोश्चेद्वक्रोच्चभुक्तेः पतितावशेषात् ॥ १८६॥
साध्या द्वितीयाथ ततोऽधिका चेत्तयोज्झिता मान्द्यमतोविलोमम् ।
वक्रादिभुक्तादृजुमन्दभुक्तिर्योज्या ततो मान्द्यफलञ्च वाम्यात्॥१८७॥
क्वचित्फलं नष्टमविस्फुटं चेत्तत्खण्डसंख्यार्थभुजाश्वि२२५निघ्नो ।
कलात्मकं केन्द्रमतः फलाद्यं दोर्ज्यादिनानीय विलेखनीयम् ॥१८८॥

स्फुटार्यमस्वान्तरभागकेषु
शुक्रेज्यचन्द्रज्ञयमारकाणाम् ।
अस्तं नवा९शा१०शिव११सूर्य१२शक्र१४-
भूपेषु१६ वक्रस्य भृगोर्नगेषु७ ॥ १८९ ॥

एतेऽंशकाः खाभ्रगजेन्दु१८००निघ्नाः प्राक्सायनार्कोदयमानभक्ताः ।
पश्चात्सषड्भायनसंस्कृतार्कलग्नप्रमाणास्तु हृताः स्फुटाः स्युः॥१९०॥

एते रवेः प्रागुदयं परास्तं न्यूनाधिका यान्ति कुजेज्यमन्दाः ।
वक्रौ ज्ञशुक्रावथ ताववक्रौ पूर्वास्तपश्चादुदयौ विधुश्च ॥ १९१ ॥
पूर्वोक्तकेन्द्रांशदिने ग्रहार्कान्तरैस्तदंशान्तरलिप्तिकाद्याः ।
गत्यन्तराप्ताश्च फलं दिनादिस्वर्णं भवेद्वक्रिणि भुक्तियुत्या ॥ १९२ ॥
ग्रहार्कगत्योस्तनुभूरिभावं ज्ञात्वा ततो भाविगतौ च कालौ ।
वदाम्यतः खेटद्युतिप्रकाशादुक्तांशतुल्यत्वमवैतुमिष्टम् ॥ १९३ ॥
इतीरितैरस्तमयोदयांशैः सिद्धाः स्वकालाः खलु लेखनीयाः ।
दृक्कर्मसिद्धास्तमयोदयानां सुदुष्करत्वाद्व्यवहारिपञ्ज्याम्* ॥१९४॥

यथात्र लिखितानि खण्डजफलान्तराणि क्रमा-
त्तथा गतिफलान्तरं द्युतिकलान्तरं साध्यताम् ।
चलद्युतिगतिस्फुटीकरणमात्मखण्डान्तरैः
पुरोदितफलोच्चयानयनवद्विधेयं बुधैः ॥ १९५ ॥
कार्यः सूर्यनिशेशयोः प्रतिदिनं विस्पष्टभावः पुनः
पक्षे पक्षदले बुधस्य विहितोऽन्येषान्तु पक्षान्ततः ।
मध्ये मध्य इह व्रजेद्यदि खगः सद्मर्क्षवक्रार्जवा-
न्यस्तञ्चाप्युदयं तदेष्टदिनजः कार्योऽसकृद्भुक्तिभिः ॥ १९६ ॥
सञ्चारध्रुवलिप्तिका भपदजा२०० भानां८०० गृहाणां१८००श्च या-
स्तत्खेटान्तरलिप्तिका गतिकलाभक्ता दिनाद्यं फलम् ।
खेटे तद्ध्रुवतः पुरः परगते कालादृणं स्वं क्रियात्
काले चक्रगतौ धनर्णमिति तत्सञ्चारकालो भवेत् ॥ १९७ ॥
पक्षान्तद्वयखेचरान्तरकलास्तद्घस्रसंख्याहृता-
स्तत्तद्भुक्तिकलाः फलं गतियुगस्वल्पान्तरत्वे पुनः ।

---

* इति खण्डफलसंग्रहः परिशिष्टे द्रष्टव्यः ।

भूयस्यन्तरके चयर्द्धिवशतो भुक्त्यानुपातोऽथवा
खेटर्क्षध्रुवजान्तरोद्धृतिवशाद्यातैष्यकालोऽसकृत् ॥ १९८ ॥
पक्षद्वन्द्वजतुर्यकेन्द्रविवरात्तद्भुक्तिलिप्तादिनै-
रानीयाभिरवक्रवक्रविलयोद्यानान्त्यकेन्द्रध्रुवात् ।
पक्षान्तग्रहतुर्यकेन्द्रवियुताद्याः स्युस्तदन्तर्गता
लिप्तास्ता विहृताः फलैर्दिनमुखैर्लभ्यास्त्ववक्रादयः ॥ १९९ ॥

भक्राग्रककला:२१६०० खवह्निभि३०रथो
सप्ताश्विभि२७र्भानुभि१२-
र्भूद्बाहुभि२७रम्बरर्तुभि६०रितो
लब्धाः खभोगाः क्रमात् ।
तिथ्यृक्षैन्दवराशियोगकरणानां
स्युः खपक्षाद्रयः७२०
खाभ्राष्टौ८०० खखकुञ्जरक्षितिमिताः१८००
खाभ्राष्ट८००खाङ्गाग्नयः३६० ॥ २०० ॥

स्पष्टार्कोनितविस्फुटेन्दुकलिकाभोगेन७२० भक्तास्तिथि-
र्लब्धाः स्युस्तिथयो गताः प्रतिपदो दर्शान्तमासादिताः ।
लब्धाः पञ्चदशाधिका यदि तदा पञ्चेन्दु१५शेषाश्च ताः
पक्षे श्यामलके स्युरेकसहिताश्चेद्वर्त्तमानास्तदा ॥ २०१ ॥
तच्छेषा गतगम्यका विकलिताश्चन्द्रार्कभुक्त्यन्तरे-
णाप्ताः स्युः क्रमशो गतैष्यघटिकाः साकं खषष्ट्यंशकैः ।
तिथ्यन्तान्तिककालचालितविधोस्तत्कालभुक्त्या पुनः
साध्याः संशयितेष्टकर्मसमयेऽन्यत्र ह्यह्नैकान्तरा ॥ २०२ ॥
स्पष्टेन्दोः कलिकाभभोग८००विहृता लब्धाश्च दस्रादय-
स्ताराः स्युर्विगता गतैष्यकलिकाः षष्ट्याहता भाजिताः ।

भक्त्या चन्द्रमसः फलानि घटिकास्तद्द्विघ्नीलिप्तिका-
स्तद्भोगाप्त१८००गततिथ्यादिनिघ्नया नाड्योऽब्जभुक्त्या तथा ॥२०३॥
स्पष्टेन्द्वर्कयुतिस्तु चक्रवियुता चक्रा२१६००धिका चेद्धृता
भुक्त्या योगकला८०० फलानि न हृताः शेषा गतैष्याः कलाः ।
षष्टिघ्ना रविचन्द्रभुक्तियुतिहृल्लब्धाश्च नाड्यादयः
शून्याङ्गाग्नि३६०कलायुतार्कविधुताः स्पष्टेन्दुलिप्ता हृताः ॥२०४॥
भुक्त्यैवं करणस्वं३६० तानि तिथिवत्तन्नाडिकाद्या मताः
सप्तानां चरतः सितप्रतिपदः प्रान्त्यार्द्धतः संस्थितिः ।
तिथ्यर्द्धेष्वपि कृष्णभूतदलतः प्रान्त्यासितादेर्दलं
यावत् शाकुनकं चतुष्पदमथो नागश्च किंस्तुघ्नकम् ॥ २०५ ॥

नाडीहराद्यदधिका गतगम्यलिप्ता-
स्तद्भिन्नच्युति तिथिप्रमुखाङ्गजातम् ।
भोगा निजा निकलिताः खघटीहराप्ता-
स्तत्प्रमाणघटिकादिफलं क्षयादौ ॥ २०६ ॥

मासोऽसंक्रम ऐन्दवस्तु मलिनः सोऽन्तर्भवेदुत्तरे
संक्रान्तिद्वययुक् क्षयो यदि कदा तत्पार्श्वयोर्द्वौ मलौ ।
स्यातां मासचतुष्टयान्तरनयोः संसर्पतामादिमः
क्षीणोऽंहस्पतिरन्तिमो मल इमे त्याज्या विवाहादिषु ॥ २०७ ॥
श्रौतस्मार्त्तकमासिकाब्दिकविधौ संसर्पकांहस्पती
शुद्धौ नात्र मलिम्लुचः स च मलातीताब्दिके गृह्यते ।
कन्मीरभ्रसमाप्तिमध्य उपरागादौ तथा दुर्लभे
योगे चागतिके व्रते जनुरमाग्न्याद्येन्दुपूजादिषु ॥ २०८ ॥
प्रायः स्यात् क्षयमासतः पुनरसौ वर्षैः कुवेदेन्दुभिः१४१
किंवा द्विद्विकुभिः१२२ क्वचिन्नवकुभि१९र्वर्षे तृतीये मलः ।

युग्मस्थेऽर्कमृदौ हि सम्प्रति तपस्याद्या नव स्युर्मलाः
क्षीणा ऊर्ज्जमुखास्त्रयो न तु शपाद्द्वित्रयाद्दच्छति ॥ २०९ ॥
इत्थं तिथ्यादितथ्यावयवपरिगता पञ्जिका स्थूलसंज्ञा
ग्राह्या वङ्गागमज्ञैः प्रतिशरदुदयन् नित्यनैमित्तिकेषु ।
एकादश्यादिपर्व्वव्रतसुरयजनश्राद्धदेवोत्सवादौ
यस्ता विस्तार्य्य सूक्ष्मा भवतु भुवि हिता बृंहिता संहितार्थैः ॥ २१० ॥

नित्यनैमित्तिकाद्युत्सवार्थोत्सुकः
पञ्जिकां व्यञ्जयन्नर्थ्यमायूर्जिताम् ।
अञ्जनाभाचले भ्राजते यः सदा
कञ्जनाभं भजे तं भवोद्भञ्जनम् ॥ २११ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाह्वितबालबोधे-
ऽयात्पञ्चमः स्फुटखगः सफलः प्रकाशः ॥ २१२ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे स्फुटाधिकारे सखण्डफलग्रहस्फुटीकरण-स्थूलपञ्चाङ्गवर्णनो नाम पञ्चमः प्रकाशः ।

षष्ठः प्रकाशः ।

सूक्ष्मपञ्चिकाकरणादिविवर्णनम् ।

उद्वाहोपनयप्रयाणनिलयक्षौरादिषु द्राक्सदा-
रम्भेष्विष्टफलाप्तये किल मया सूक्ष्मोच्यते पञ्चिका ।
दृक्सिद्धायममार्गग्रहयुगयोगोदयास्तं महा-
पाताद्यं तिथिभादि कार्य्यमनया सूक्ष्मार्कचन्द्रोद्भवम् ॥ १ ॥

वृद्धौ पञ्च५ तिथेः क्षये रस६मिता नाड्यः पुराणैर्मता
नित्यं यत्परमास्ततो व्यवहृतौ स्थूलेष्यते पञ्जिका ।
प्रत्यक्षानुभवं न लुम्पति वचो युक्तिर्यतस्तन्मया
तत् साक्षात्करणाय काम्यविषये सूक्ष्मा परा तन्यते ॥ २ ॥

दृक्तुल्यतां गच्छति पर्व्वसन्धिर्येनार्कविध्वोः परिधिद्वयेन ।
तस्मात्स्वसंसिद्धफलागताङ्गा सत्पञ्जिका स्थूलतया पुरोक्ता ॥ ३ ॥

सूक्ष्मार्कंदोःखण्डफलैस्तु सूक्ष्मा कार्य्या हिमांशोर्बहुभिर्विशेषैः ।
तत्रैव सिद्धः परिधेरभेदात् फलैस्तदुत्थैः प्रथमग्रहः स्यात् ॥ ४ ॥

एतस्य सूक्ष्मस्य रवेश्च गत्या विम्बप्रमाणं स्थिरपर्व्वसन्धिः ।
छाया भुवस्तद्युगमन्दकर्णः सूर्य्यग्रहे सिध्यति लम्बनञ्च ॥ ५ ॥

तुङ्गान्तरं पाञ्चिकनामधेयं फलं दिगंशाख्यमदस्तृतीयम् ।
क्रमेण वक्ष्यामि निरीक्ष्य यत्नाच्चिरां गतिं राशिपतेश्चिराय ॥ ६ ॥

अभीष्टकालोत्थितचन्द्रमन्दात् पक्षे सिते सत्रिभसूर्य्यहीनात् ।
कृष्णे त्रिभोनार्य्यमवर्ज्जिताद्यत् केन्द्रं तदीया भुजशिञ्जिका या:॥७॥

साभ्राङ्कभू१६०घ्नी त्रिगुणेन३४३८ भक्ता
स्फुटार्कचन्द्रान्तरदोर्गुणघ्नी ।
त्रिज्योद्धृता लब्धमतः कलाद्यं
गत्या विनिघ्नं प्रथमस्फुटेन्दोः ॥ ८ ॥

तन्मध्यगत्या ७८०।३५ विहृतं फलं स्यात्तुङ्गान्तरं तेन विहीनयुक्तः ।
पर्य्यायतः सत्रिभवित्रिभार्कहीनेन्दुमन्दोच्चभवोत्थकेन्द्रे ॥ ९ ॥
तुलाधराजादिभषट्कनिष्ठे प्राक्क्षिप्तचन्द्रो भवति द्वितीयः ।
तत् सूक्ष्मसूर्य्यान्तरकेन्द्रपादयातैष्यदल्पाः कलिकाद्विनिघ्नाः ॥ १० ॥
मौर्व्वीकृता हारहृताः फलं स्यात् कलात्मकं पाक्षिकनामधेयम् ।
पक्षार्द्धयोः प्राक्परयोस्तदाढ्यहीनस्तृतीयत्वमुपैति सोऽयम् ॥ ११ ॥

सूर्य्योनितस्वोच्चविधूत्थशेष-
भुजांशकान्योऽन्यविघातपिण्डात् ।
खाष्टेन्दु१८०भक्ताच्च फलं नवत्या९०
युक्तं तृतीयाय फलाय हारः ॥ १२ ॥

स्वर्णार्कदोःसूक्ष्मफलं दिघ्ना१०समाप्तेन्दुगत्या हृतमध्यभक्तम् ।
तुर्य्यं फलं स्यात्क्रमतस्तदूनयुक्तः शशी दृक्सम एष सूक्ष्मः ॥ १३ ॥
स्थलेषु जङ्गम्यत एव यद्वद्भुजङ्ग ऋज्वीं गतिमिति मर्त्तो ।
सदोच्चकर्षातिग एवमिन्दुस्तत्साम्यमागच्छति पर्व्वसन्धौ ॥ १४ ॥
तत्राप्यतुङ्गान्तरपाक्षिके स्यात् सूक्ष्मे दिगंशाख्यफलं यथाहेः ।
मताल्पवक्रा स्वगतिर्बिलेऽपि पार्श्वद्वयस्पर्शदृढाहतित्वात् ॥ १५ ॥
भुजान्तराख्यं फलमर्कसूक्ष्मस्थूलात्मदोःखण्डफलाद्विभेदम् ।
क्रमादणु स्थूलविधौ न तु स्यात् स्फुटीक्रियान्योऽन्यविपर्य्ययेण ॥ १६ ॥
तुङ्गान्तरं यत् फलमत्र सिद्धं त्रिज्याहृतं तत् प्रथमेन्दुभान्वोः ।
विश्लेषदोर्ज्याप्तफलं तदीयान्तरोत्थकोटीगुणसङ्गुणं च ॥ १७ ॥
त्रिज्योद्धृतं तत् पुनरर्कचन्द्रगत्यन्तरघ्नं त्रिगुणाप्तलब्धम् ।
योज्यं तदेव प्रथमेन्दुभुक्तिफले भवेद्भुक्तिफलं द्वितीयम् ॥ १८ ॥
तत् संस्कृतं मध्यगतौ पुरोवद्भवेद्द्वितीया रजनीशभुक्तिः ।
वर्गीकृतं पाक्षिकलिप्तिकाद्यं हारोद्भवस्यान्यफलस्य वर्गात् ॥ १९ ॥

विशोध्य तच्चेकपदे द्वितीय-
चन्द्रान्त्यगत्यन्तरयुतं तत् ।
गोभूवनाप्तं१७१९ सितलग्द्वितीय-
भुक्तौ धनं पश्चपुरोऽन्तिमाङ्घ्रेः ॥ २० ॥

ऋणं पदोर्मध्यमयोरिति स्यात् सूक्ष्मान्त्यभुक्तिः शशिनस्तृतीया ।
दिनान्तरेष्वन्तरसम्मिता वा तत्सिद्धतिथ्यादिशुभेषु चिन्त्यम् ॥ २१ ॥

विश्वाद्यनिष्टं यदिहास्ति तत्तत्त्याज्यं पुनः स्थूलमते यदेतत् ।
तथापि हेयं बहुसम्मतत्वात् स्थूलेन नित्यव्यवहारसिद्धेः ॥ २२ ॥

व्यर्केन्दुकेन्द्रौजसमाङ्घ्रियुग्मं पश्चादिमान्त्यार्द्धयुगं प्रमेयम् ।
पश्चाङ्घ्रयः केन्द्रभषट्कयोः स्युः शराम्बुराशि४५प्रमितैश्च भागैः ॥२३॥

वक्ष्येऽब्जभुक्तिं ग्रहणे प्रसिद्धां
यथैव पर्व्वान्तगतैश्च काले ।
चन्द्रः स्फुटः स्यात् स्थितिमर्द्दकालौ
दृक्तुल्यतामेति यया च सिद्धः ॥ २४ ॥

व्यस्तद्विधायेन्दुगतेः फलं त-
दन्त्येन तुङ्गान्तरकेण१६० निघ्नम् ।
परेण तन्मान्द्यफलेन२०१ भक्तं
गत्याद्ययाप्तं किल मध्यया७९०।३५मम् ॥ २५ ॥

फलान्वितं कर्किमृगादिमन्दकेन्द्रे तदाद्योनितमध्यभुक्तिः ।
द्विघ्नार्कभुक्त्या ऋणितार्द्धहारभक्तामयुक्तान्त्यगतिः स्फुटेन्दोः ॥२६॥

एकत्र तिथ्याद्यपरत्र कार्य्यमन्यद्वेदा कर्त्तुं यदि पञ्जिकायाम् ।
असम्मतिः स्याज्जनतः प्रयासात् कार्य्यं तदा सूक्ष्ममतेन सर्व्वम् ॥२७॥

भूगर्भगे कल्पितसूक्ष्मगोले स्वदेशसूत्राकलितप्रदेशे ।
कदम्बमोलाङ्कितभागलिप्ते दृष्टा ग्रहाः स्पष्टतया भचक्रे ॥ २८ ॥

प्राग्भिमता यत् सकलक्रियासु तत्सिद्धये पर्व्वबीजकॢप्तिः ।
पृथग्विधा कालवशादभिज्ञैर्विधीयते स्वीक्रियते च लोकैः ॥ १९ ॥

कर्म्मार्हपञ्चाङ्गसमत्वसिद्धौ
निशापतेरेव महोपयोगात् ।
दृक्सिद्धयेऽस्य त्रिविधं हि बीजं
तुङ्गान्तराद्याख्यमकल्पि सूक्ष्मम् ॥ २० ॥
तिथावुडौ द्वित्रिपलप्रभेदो
वेद्यः परं विश्वसृजा न चान्यैः ।
श्रेयान् स तत् शक्र१४घटीप्रभेदात्
समुद्धरेत् सारमसारतो हि ॥ २१ ॥

यत्तु स्थिरा पृष्ठनिवासभाजां दृक्सूत्रतो लम्बनसूत्रसक्तात् ।
नभःसदो यत्र कदम्बगोलसूत्रेण विक्षेपवतोऽयनीत्यम् ॥ २२ ॥
दृक्कर्म्मसाध्यं ध्रुवसूत्रसाम्यात्तद्युग्ममर्कग्रहखेऽटयुत्योः ।
स्यात् केवलं नत्वपरक्रियासु स्वार्द्धेऽयनान्ते स्फुटतावशेषात् ॥२३॥

बृहत्संहितायाम्—वेलाहीने पर्व्वणि गर्भविपत्तिश्च शस्त्रकोपश्च ।
अतिवेले कुसुमफलक्षयोभयं शस्यनाशश्च ॥ २४ ॥

गर्गसंहितायाम्—हीनातिरिक्तकाले फलमुक्तं पूर्व्वशास्त्रदृष्टत्वात् ।
स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति॥२५॥
दृक्समे पर्व्वणि नृपा निर्वैरा विगतज्वराः ।
प्रजाश्च सुखिनः सर्व्वे भयरोगविवर्ज्जिताः ॥ २६ ॥

वशिष्ठवाक्यम्—यस्मिन् पक्षे यत्र काले येन दृग्गणितैक्यकम् ।
दृश्यते तेन पक्षेण कुर्य्यात्तिथ्यादिनिर्णयम् ॥ २७ ॥

शाकल्यसंहितायाम्—संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेभ्यः ।
तत्संस्कृतासु सर्व्वे पक्षाः साम्यं भजन्त्येव ॥ २८ ॥

किं तेनापि सुवर्णेन कर्णघातं करोति यत् ।
तथा किं तेन शास्त्रेण यत्र प्रत्यक्षत: स्फुटम् ॥३९॥

कर्म्मार्हकाले लम्बनप्रतिषेधकबीजोपनयग्रन्थवचनं यथा—

यदि च लम्बनसंस्कृतखेटतस्तिथिमुखानयनं परिचोद्यते ।
बधिर तर्हि तव श्रुतिगोचरं वितथमेव हि लम्बनशासनम् ॥४०॥

अत: कुमध्याङ्गतखार्द्धसूत्रे
दृक्तुल्यतामेति नभश्चरो य: ।
स एव शुद्ध: परमार्थत: स्यात्
स्फुटस्ततोऽन्ये विहगास्त्वतथ्या: ॥ ४१ ॥

भूपृष्ठसर्व्वदेशानां मध्यमेव यत: समम् ।
तत्तुल्यखेचरानीतं तिथ्याद्येव वरं तत: ॥ ४२ ॥

दृक्करणैक्यविहीना: खेटा: स्थूला न कर्म्मणामर्हा: ।
अत इह तदर्हतायै तात्कालिकबीजविस्तरं वक्ष्ये ॥ ४३ ॥

लिप्ता विधोरर्कमही११२मिता मे दृग्गोचरा: प्रत्यहमीक्षितस्य ।
कदम्बगोलागतसूत्रपाते क्रान्तौ धनर्णत्वजुषो भमध्यात् ॥ ४४ ॥

मयाद्यबीजोपनये यदस्ते सूर्य्योक्तमाद्यं परमं रहस्यम् ।
प्रकाशये गोप्यमपीह वेदं प्रणम्य देवं जगतां हितार्थम् ॥ ४५ ॥

ब्रह्मगुप्तसिद्धान्ते च– ब्राह्मोक्तं ग्रहगणितं महता कालेन यत्खिलीभूतम् ।
अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन । इति ॥४६॥

लिप्ता विधोरर्कमहीति पद्याङ्गमध्यता स्यादिषुवापमस्य ।
तदाद्यबीजोपनयानुमेयं विक्षेपमन्त्यं कुवसुद्वि२८१लिप्तम् ॥ ४७ ॥

यतो विधो: सन्निभसायनस्य
क्रान्तिज्यका खाद्रिगुणेन्दु१३७०तुल्या ।

तद्बाण२८१निघ्नो त्रिगुणो३४३८भृताप्तं
धनर्णदृक्कर्म्मभुजेश११२लिप्तम् ॥ ४८ ॥

आयाति तद्वीज्य तदुक्तमेतद्बोध्यं कदम्बध्रुवसूत्रमध्ये ।
सम्भाव्यते यद्यखिलश्रुतोक्ताद्दृक्कर्म्मतो भिन्नमितीह वीजम् ॥ ४९ ॥
तदापमस्याद्यविधाभमध्यं स्याद्यत्र कुत्राप्युडुचक्रवृत्तेः ।
तुङ्गान्तरं तत्फलमन्त्यमेव व्यलोकि सूर्य्येन्दु११२कलं तदात्वे ॥५०॥
खाङ्गेन्दु१६०लिप्तं चिरकालतोऽभूत्तद्वृद्धिह्रासावुररीक्रियेताम् ।
इत्यादि पूर्व्वोक्तिभिरेव सिद्धं वीजैः स्वकालाचितसमैः स्फुटत्वम्॥५१॥
समाः सहस्रान्तर एष्यकाले प्रोक्तक्रमेण प्रथमस्फुटेन्दोः ।
दृक्चन्द्रतो लप्स्यत एव यावान् भेदः स तद्बीजमिति प्रमेयः ॥५२॥
षट्षष्टि६६दण्डाभ्यधिका तिथिर्या कृत्स्ना पराह्णद्वयमश्नुते सा ।
सूक्ष्मैव नान्यातु तथाविधास्यात् षोढाभिदाहि, स्मृतिषु प्रसिद्धा॥५३॥
सायाह्नमात्रस्पृगमाह्नि पूर्व्वे परे दिनार्द्धात् पुरतो गता चेत् ।
तत्श्राद्धमुक्तं कुतपे परेद्युः स्मृत्यात्र सूक्ष्मैव मता तिथिः सा ॥५४॥
यथाह गौतमः—पूर्व्वाह्णे चेत् प्रतिपदो भूते सायममा यदि ।
आरभ्य कुतपे श्राद्धं रौहिणं न तु लङ्घयेत् इति ॥५५॥

सप्तम्यादितिथित्रयक्षयघटीदृष्टा रसोनाः६ पुनः
षोढा भेदविरोधशङ्कितहृदां मा भूदिहानादरः ।
सप्तम्यादिषु[३] पञ्चधान्यतिथिषु द्विःषट्सु[१२] षोढेति चे-
त्तात्पर्य्यं स्मृतिजं विचिन्त्यमिह दृक्सिद्धेर्न कापि क्षतिः ॥ ५६ ॥
मध्येपक्षमिवेन्द्र१४सङ्क्रमघटीभेदश्च पक्षान्तयोः
स्याच्चेत् स्थूलमते तदा ग्रहणयोर्भूरिप्रभेदेक्षणात् ।
प्राञ्चो लोकभियापि सूक्ष्मतिथिमन्वेष्टुं व्यधास्यन् श्रमं
सर्व्वैर्भेन्दुयुतेरनादृततया मन्ये तदीयां जहुः ॥ ५७ ॥

अथ गर्गवशिष्ठादिमुनिभिः परिकीर्त्तितम्।
चिन्त्यं यात्राविवाहादौ सूक्ष्मर्क्षानयनं ध्रुवे ॥ ५८ ॥
चन्द्रस्य मध्यमा भुक्ति७९०।३५-
भंभोगः सूक्ष्म उच्यते।
सार्द्धभोगानि११८५।५२।१८ षड्ब्रह्म-
राधादित्युत्तराणि च४।१६।७।१२।२१।२६ ॥ ५९ ॥
अर्द्धभोगानि३९५।१७।२६ वारीन्द्रा-
हीशयाम्यानिलानि२४।१८।९।६।२।१५ षट्।
शेषपञ्चदशैव१।३।५।८।१०।११।१३।१४।१७।१९।२०।२२।२३।२५।२७
स्युरेकभोगानि७९०।३४।५२ भान्यतः ॥ ६० ॥
सर्व्वभोगेन२१३४५।४१।२५चक्रस्य२१६००-
भिजिद्भोगोऽवशेषकः२५४।१८।३५।
वैश्व[२१]वैष्णवयो[२२]र्मध्ये
तद्भोगः स्थितिहेतुतः ॥ ६१ ॥
स्फुटेष्टखेटलिप्ताभ्यः प्रोज्झ्याश्विन्यादिभोगकान्।
विशुद्धभोगसङ्ख्यानि भानि विद्याद्गतान्यतः ॥ ६२ ॥
तच्छेषो वर्त्तमानस्य भोगोऽतिक्रान्त उच्यते।
अशुद्धभोगात् पतितो भोग्यः स्यात् कलिकात्मकः ॥६३॥
गतैष्याः कलिकाः षष्टिगुणिता ग्रहभुक्तिभिः।
विहृता घटिकाद्याः स्युर्गतैष्याः फलसम्मिताः ॥ ६४ ॥
समसार्द्धार्द्धभोगानां भानां साभिजितामपि।
विवाहादिषु गृह्यन्ते पादा भोगानुसारतः ॥ ६५ ॥
राश्यन्ते राशिसञ्चारो भान्ते भान्तरसञ्चरः।
कर्त्तव्यो नात्र राशीनां नियमो नवभाङ्घ्रिजः ॥ ६६ ॥

यथैव सिंहमघयोः प्रवेशोऽप्येकदा स्थितिः ।
सूक्ष्मा मघा कर्कटान्त्यान् भागानष्टौ भुनक्ति हि ॥ ६७ ॥
ग्रहाणां गतिलिप्ताभिर्बिम्बव्यासविलिप्तिकाः ।
हृताः संक्रान्तिनाड्यः स्युर्भानोस्ताश्चालिपुण्यदाः ॥ ६८ ॥
भवन्ति मिश्रफलदाः स्वसंक्रान्तिगता ग्रहाः ।
मण्डलस्योभयस्थत्वादेवं नक्षत्रसन्धिगाः ॥ ६९ ॥
विकला विधुबिम्बस्यार्केन्दुभुक्त्यन्तरेण च ।
चन्द्रभुक्त्या च चन्द्रार्कभुक्तियोगेन चैतयोः ॥ ७० ॥
गत्यन्तरेण च हृता लब्धा दण्डादयः पृथक् ।
तिथिनक्षत्रयोगानां करणानाञ्च सन्धयः ॥ ७१ ॥
उत्पद्यन्ते यतोऽनन्ते तुङ्गापक्रमपातजाः ।
वीथयो मण्डलाकाराः स्वकक्षासु पृथग्विधाः ॥ ७२ ॥
तद्ग्रहाणां गतिमार्गः शीघ्रमन्दोच्चकर्षजः ।
प्रतिमण्डलनामा स्यात् क्रान्तिजातोऽपमण्डलः ॥ ७३ ॥
विक्षेपमार्गः पातोत्थः कथ्यते च विमण्डलः ।
विषुवन्मण्डलाद्यास्तु वक्ष्यन्तेऽन्यप्रकाशके ॥ ७४ ॥
प्रतिलोमगतेः कल्पे क्रान्तिपातस्य पर्ययाः ।
दृक्समाः कल्पिताः खाद्रिचन्द्राभ्राम्बुधिषण्मिताः ६४०१७० ॥ ७५ ॥
भचक्रं सग्रहं सोच्चं सपातं सकलोर्ध्वगः ।
प्राक् पश्चात् प्रेरयत्येष क्रान्तिमार्गानुसारतः ॥ ७६ ॥
सप्त विंशतिभागान्तं प्राचीं मेषादिषट्कभाक् ।
प्रतीचीं प्रति तौल्यादिभार्धगः प्रक्षिपत्ययम् ॥ ७७ ॥
यत्प्रेरणाद्रविमुखास्ताराः स्वस्वापमस्थिताः ।
विक्षिप्ता इव दृश्यन्ते स्वस्थानाद्याम्यसौम्ययोः ॥ ७८ ॥

इष्टैर्दिनैस्तद्भगणा गुणिताः कल्पसावनैः१५७७९१७८२८००० ।
उद्धृता भगणाद्यादिः क्रान्तिपातः स्फुटो भवेत् ॥ ७९ ॥
तद्राश्याद्यं चक्रशुद्धं प्राच्यं तद्बाहुलिप्तिकाः ।
द्विघ्नतास्ताः प्रलानि स्युखलांशास्तेऽयनांशकाः ॥ ८० ॥
शिष्टाः षष्टिहतास्तेन हारेण२००प्ताः कलादिकाः ।
साष्टाविंशतिषष्ट्यंशाः परा नव९।२८ गतिर्दिने ॥ ८१ ॥
करणाब्दमुखेऽंशाद्या दृग्दृशो२२ भूः१ कुसायकाः५१ ।
शराब्धयो४५ द्विवेदाश्च४२ धनाख्या वृद्धिशालिनः ॥ ८२ ॥
तुलाधरादिचक्रार्द्धस्थिते पातेऽयनांशकाः ।
ऋणाख्यास्तत्र मेषादिभार्द्धस्थे धनसंज्ञकाः ॥ ८३ ॥
सू – तत् संस्कृताद्ग्रहात् क्रान्तिच्छायाचरदलादिकम् ।
स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्वयम् । इति ॥ ८४ ॥
सप्तर्षीणामगस्त्यस्य तथा संयमनीपतेः ।
नक्षत्रपार्श्वस्थताराणां क्रान्तिपातो न चालकः ॥ ८५ ॥
एतेषां भगणस्थानां स्वस्थानाद्यदि दृश्यते ।
प्राग्गतिश्चलिते चक्रे तत्पश्चादवधारयेत् ॥ ८६ ॥
प्रत्यग्गतौ पूर्व्वचारं क्रान्तिं तदनुसारतः ।
क्रान्तिमार्गात् शरं भानां दिग्भेदं तद्वशाद्बुधः ॥ ८७ ॥
छायार्कात् साधितादल्पे करणागतभास्वति ।
तदन्तरमिता भागाः प्राक्चलांशाः प्रकीर्त्तिताः ॥ ८८ ॥
करणागतचण्डांशोरल्पे च्छाया विवस्वति ।
प्रत्यक्चलांशा विज्ञेयास्तदन्तरमिताः स्फुटाः ॥ ८९ ॥
किंवायनद्वये भानोरेकक्रान्तिस्थितिर्यदा ।
तत्कालस्फुटयोगार्द्धमयनान्तग्रहादिकम् ॥ ९० ॥

तस्य चायनसंक्रान्तेरन्तरस्याश्चलांशकाः ।
प्राक्पश्चादयने क्रान्ते*र्धनर्णाख्याः क्रमादमी ॥ ९१ ॥
प्राक्पश्चिमायतस्यैव ग्रहसञ्चारवर्त्मनः ।
पार्श्वयोर्वक्रता नाम क्रान्तिश्चापक्रमोऽपमः ॥ ९२ ॥
खगोले कल्प्यते रेखा क्रान्तिमार्गाभिधा हि या ।
वैलोम्यात् संस्कृते चक्रे चलांशैरादिमध्ययोः ॥ ९३ ॥
सा नभोमध्यगा राशित्रयान्ते सौम्यगा ततः ।
यावत्सार्द्धत्रिपञ्चांशा२३।३०स्तद्भान्तेऽपि याम्यगा ॥ ९४ ॥
क्रान्तिज्या परमा तस्मात् खाद्रिविश्व१३७०कलोच्यते ।
चलांशसंस्कृतानां या ग्रहाणां बाहुमौर्विका ॥ ९५ ॥
परमापक्रमज्या१३७०घ्नी सोद्धृता त्रिज्यया३४३८थवा ।
शत१००घ्नी चन्द्रतत्त्वा२५१सा क्रान्तिज्या साभिधीयते ॥ ९६ ॥
तदनु:क्रान्तिकलिका: क्रान्तिज्यावर्गवर्जितात् ।
त्रिज्यावर्गात्११८१९८४४ पदं द्युज्यास्वाहोरात्रार्द्धकर्णकः ॥९७॥
शतघ्नी खेटकोटिज्या भूतत्त्वा२५१सा खभुक्तिभिः ।
गुणिता त्रिज्यया३४३८ भक्ता लब्धाः स्युः क्रान्तिभुक्तयः ॥ ९८ ॥
अयनांशैः संस्कृतस्य ग्रहस्याद्यन्तभार्द्धयोः ।
स्फुटक्रान्तिक्रमाद्गोलौ सौम्ययाम्याभिधौ मतौ ॥ ९९ ॥
भास्करस्य मते नास्ति प्रत्यक्चलनमायनम् ।
ग्रहे तत्संस्कृतेरेव धनत्वं वर्णितं यतः ॥ १०० ॥
तथापि ब्रह्मसौरोक्तेर्युक्तेश्चात्र मयोदितम् ।
प्राक्प्रत्यक्चलनं किन्तु च्छायार्काद्दृग्ज्ञायतेऽखिलम् ॥१०१॥

---

* संक्रान्तेरित्यर्थः ।

क्रान्तिज्या विषुवत्कर्णघ्नी द्वादशाप्ता क्षितिज्यका ।
त्रिज्याहता द्युजीवाप्ता चरज्याथ चरासवः ॥ १०२ ॥
तद्धनुस्तैरुदक्क्रान्तौ धनहीनौ पृथक् स्थितौ ।
सू—खाग्नीरामचतुर्भागौ दिनरात्रिदले स्मृते ॥ १०३ ॥
याम्यक्रान्तौ विपर्यस्ते द्विगुणे ते दिनक्षपे । इति ।
शरयुक्तोनितक्रान्त्या भचन्द्रादेरपि स्वके ॥ [illegible]०४ ॥
सू—विक्षेपापक्रमैकत्वे क्रान्तिर्विक्षेपसंयुता ।
दिग्भेदेऽन्तरिता स्पष्टा भास्करस्य यथागता । इति ॥ १०५ ॥
व्यवहृत्यै चरं स्थूलं पलात्मकमुदीर्य्यते ।
एकद्वित्रिगृहान्तोत्थं स्वदेशजचरत्रयम् ॥ १०६ ॥
आनीय त्रिभजाच्छोध्यं द्विभजं द्विभजात्पुनः ।
एकराशिजमेवं स्याच्चरखण्डत्रयं पृथक् ॥ १०७ ॥
सायनार्कादिदोराशिभागलिप्ताः पृथक्स्थिताः ।
एकराशेर्यदि न्यूनास्तदा भागाश्च लिप्तिकाः ॥ १०८ ॥
चरेणाद्येन गुणिताः शेषात् षष्ट्याप्तसंयुताः ।
त्रिंशद्विभाजिताः शून्ये राशिस्थाने फलान्विताः ॥ १०९ ॥
तद्बाहुराशिरेकश्चेत्तत्स्थाने प्रथमं चरम् ।
निधायांशादिकं क्षुण्णं द्वितीयेन तथा हृतम् ॥ ११० ॥
फलाढ्यं प्रथमं स्पष्टं बाहुराशिद्वयं यदि ।
तत्राद्यद्वियुतिः स्थाप्या तृतीयघ्नं लवादिकम् ॥ १११ ॥
त्रिंशदाप्तयुतं प्राग्वदित्थं स्याद्विस्फुटं चरम् ।
भत्र्यंशं तद्विभक्तं वा सूर्य्यस्यैकैकराशिजम् ॥ ११२ ॥
अथोदयान्तरपलान्यर्कात् सायनसंस्कृतेः ।
क्रमाद्वृद्धिक्षयाख्यानि राश्यर्द्धेषु त्रिषु त्रिषु ॥ ११३ ॥

सूर्य्या१२ नव९ च वेदा४श्च वेदा४ नव९ च भानव:१२।
त्रयमाद्यं वर्द्धमानं क्षीयमाणं ततस्त्रयम् ॥ ११४ ॥
स्वभार्द्धफलसंख्याघ्नास्तिथ्या१५प्तास्तेष्विनांशका: ।
फलं प्राक्पलत: स्वर्णं कार्य्यं वृद्धिक्षयक्रमात् ॥ ११५ ॥
तत्त्व२५संख्याकर्द्दो:कोटिसाम्ये स्यादथ सन्धिषु ।
गोलायनभ[illegible]षां शून्यता स्याच्चतुर्ष्वत: ॥ ११६ ॥
तद्घ्नीभुक्तिरहोरात्रपला३६००प्तासकलादिकम् ।
सायनार्कौजयुग्माङ्घ्रौ कार्य्यं खेटेष्वृणं धनम् ॥ ११७ ॥
ग्रहस्तिष्ठति यद्राशावयनांशपरिष्कृत: ।
तस्योदयासु गुणिता भुक्ती राशिकला१८००हृता ॥ ११८ ॥
तत्फलाढ्यायकलिप्ता:२१६०० स्वाहोरात्रासवो मता: ।
ग्रहे वक्रगतौ तेन फलेन परिवर्ज्जिता: ॥ ११९ ॥
स्थूलन्तु नाड़िकाषष्टि:६० सूर्य्यसावनवासरम् ।
तत्राङ्कशर५९हीना: स्युर्ग्रहर्क्षस्वदिनासव: ॥ १२० ॥
स्थूले दिने चेदुदया: साध्यास्तात्कालिकाद्रवे: ।
सूक्ष्मे त्वौदयिकाद्भानोस्तदा तद्भादय: स्फुटा: ॥ १२१ ॥
क्रान्तिवृत्तद्वादशांश: खखाष्टेन्दु१८००कलोऽपि सन् ।
निजाहोरात्रवृत्तस्थो विषुवेऽतीव वक्रित: ॥ १२२ ॥
ऋजुश्चायनयोरन्ते याति यत्पश्चिमां दिशम् ।
ततो नैकविधा भुक्तिर्लग्नानां नाड़िकात्मिका ॥ १२३ ॥

एकराशेर्भयुग्मस्य
त्रिभानां ज्या: पृथक् पृथक्१७१९।२९७८।३४३८ ।
कृतीकृता२९५४९६१।८८६८४८४।११८१९८४४स्तत: स्वस्व-

क्रान्तिज्या६८५।११८६।१३७० वर्गा४६९२२५।१४०६५९६।
१८७६९०० वर्जिता:११३५०६१९।१०४१३२४८।९९४२९४४ ॥१२४॥
तन्मूलानि३३६९।३२२७।३१५३ त्रिजीवाभि३४३८-
गुणितानि५४२०४३०।९३८८४१२।१०८४०८७२ स्वया स्वया ।
द्युजीवया३३६९।३२२७।३१५३ विभक्तानि तत्फलानां
१६०९।२९१०।३४३८ धनूंषि च १६७५।३४७१।५४०० ॥१२५॥
अधोऽधः परिशोध्यानि क्रमव्युत्क्रमतोऽसव: ।
मेषकर्क्यादिलग्नानां भवन्ति व्यक्षदेशजा: ॥ १२६ ॥
यद्वा राशित्रयद्युज्या३१५३
त्रिद्व्येकभगुणा३४३८।२९७८।१७१९हता
१०८४००१४।९३८९६३४।५४२०००७ ।
स्वस्वद्युज्या३१५३।३२२७।३३६९हृता लब्ध-
धनु:प्राणा:५४००।३४७१।१६७५ पृथक्स्थिता: ॥ १२७ ॥
त्रिभासुभ्यो द्विभप्राणा: शोध्या एकभजास्तत: ।
भुजत्रिद्व्येकराशीनां भवेयुरुदयासव: ॥ १२८ ॥
पञ्चाद्रिभूपा१६७५स्तर्काङ्क-
घना१७९६ नन्दाक्षिगोभुव:१९२९ ।
नन्दाक्षिगोभुवो१९२९ऽङ्काङ्ग-
घना:१७९६ पञ्चाद्रिषड्भुव:१६७५ ॥ १२९ ॥
गदिता उदयप्राणा मेषतौल्यादिषट्कयो: ।
उदयेऽस्तमये मध्ये समा: स्युर्व्यक्षदेशके ॥ १३० ॥
स्वदेशलग्नमानार्थमधोऽध: परिशोधनम् ।
चरासूनां तथा कार्यं तत: स्वचरखण्डका: ॥ १३१ ॥

अजादित्रितये त्याज्याः कर्क्यादित्रितयेऽन्विताः ।
तुलादित्रय एवाढ्या नक्रादित्रय उज्झिताः ॥ १३२ ॥
राशीनामुदया एवं स्वचरैः संस्कृताः क्रमात् ।
स्वदेशजाः स्युः सर्व्वत्र मध्यलग्ना निरक्षजाः ॥ १३३ ॥
यावतोदेति कालेन राशिरेतस्य सप्तमः ।
तावतास्तमयं याति स्थूलेयं लेखकल्पना ॥ १३४ ॥
होराद्रेक्काणयोः कालः पूर्व्ववत् साध्यते हि यः ।
राश्यर्द्धत्रिलवक्रान्तिद्युज्याभिः स तु सूक्ष्मकः ॥ १३५ ॥
चलांशसंस्कृतः सूर्य्यो वर्त्तते यत्र मन्दिरे ।
तद्भोग्यांशादयो निघ्नास्तल्लग्नप्रमितासुभिः ॥ १३६ ॥
खरामै३०र्विहृता लब्धाः प्रश्नाख्यास्तेऽसवो मताः ।
इष्टकालासुतः शोध्यास्ततस्तदपरोदयाः ॥ १३७ ॥
शोध्यास्त्वशुद्धलग्नस्य भुक्तप्राणा खवह्निभिः३० ।
हृत्वा अशुद्धमानाप्ता भागाद्या गतभान्विताः ॥ १३८ ॥
संस्कृता वैपरीत्येन चलांशैर्भवति स्फुटः ।
लग्नः स्वदेशसंसिद्धौ राशिभागकलादिभिः ॥ १३९ ॥
इष्टकालासवोऽल्पाश्चेत् प्रश्नतस्त्रिंशदाहताः ।
लग्नाप्ता सायनार्काढ्या व्यायनाः स्यात्तनुः स्फुटा ॥१४०॥
चलांशसंस्कृतस्पष्टलग्नभुक्तांशलिप्तिकाः ।
तन्मानघ्नाः खरामाप्ताः स्थाप्या भुक्तासवस्ततः ॥ १४१ ॥
अधोऽधो लग्नमानाढ्याः सायनार्कस्य भोग्यकैः ।
लग्नासुभिर्युतास्ते स्युरिष्टकालासवस्तनोः ॥ १४२ ॥
मध्यलग्नोऽपि संसाध्यो निरक्षोदयजासुभिः ।
स्वदिनार्द्धान्तरप्राणाः प्राच्याश्चेच्चण्डदीधितेः ॥ १४३ ॥

चलांशैः संस्कृतस्यैव भुक्तराश्यंशजासवः ।
स्वदेशभवा ये स्युर्नतासुभ्यो विवर्जिताः ॥ १४४ ॥
ततो ये राशयोऽंशाश्च स्वस्वाख्या प्रतिलोमतः ।
शोध्यास्तद्युक्ता भस्वलिप्तद्घ्ना: पूर्वलग्नजैः ॥ १४५ ॥
प्राणैर्हृताः फलांशाद्यं शोधितं त्रिंशदंशतः ।
अस्ताद्भुक्तादिकं तच्च व्युत्क्रमाच्चलभागकैः ॥ १४६ ॥
संस्कृतं मध्यलग्नं स्यान्मध्यमं खार्कं इत्यपि ।
यदि पश्चान्नतः कालस्तदा सायनभास्वतः ॥ १४७ ॥
भोग्यभांशनिरक्षासूनूर्ध्वमध्यभजानसून् ।
प्रोक्तराशुद्धनतप्राणान् हृत्वा गगनवह्निभिः३० ॥ १४८ ॥
हृत्वा तल्लग्नजप्राणैर्लब्धांशाद्यं भपूर्वकम् ।
विलोमसंस्कृतं चेत्स्याच्चलांशैर्मध्यभं हि तत् ॥ १४९ ॥
प्राक्-पश्चात् सायनार्कोत्थभुक्तभोग्यासुतो यदि ।
स्वस्वानतासवस्तस्ते त्रिंशद्घ्नास्तद्भजासुभिः ॥ १५० ॥
उद्धृता लब्धभागाद्यैः प्राक् पश्चान्नतयो रविः ।
हीनयुङ्मध्यलग्नः स्याद्दिनार्धे स्फुट एव सः ॥ १५१ ॥

इष्टैष्योदयजान्तरासु गुणिताः प्राच्याश्चलांशादयः
खाग्न्या३०सा: फलहीनयुक् स्व उदयः स्यादेष्य ऊनेऽधिके ।
यातेष्टान्तरभिन्नखाग्नि३०विहृतप्रत्यक्चलांशैर्गते
लग्नेऽल्पेऽधिक ऊनयुक् स्वक इति स्वालग्नमानं स्फुटम् ॥१५२॥

पश्चात्प्रागयनांशकेषु तनवो व्यक्ते चरा१।४।७।१० द्व्यात्मका:३।६।९।१२
साक्षे मेषघटौ युवत्यनिमिषौ देशे स्थिराः स्युः क्रमात् ।
इत्थं संस्कृतलग्नमानवशतः स्वाभीष्टदिक्ये स्फुटी-
कार्याश्चेत्तनवस्तदायनलवैर्नाद्यन्तयोः संस्कृतिः ॥ १५३ ॥

●

रामाः षड्विमिश्वैः ३।५६ जनाः जनगुणैः ४।२४ खर्वाः खरैः ३।१०
भूवह्निभिः ५।१० रा जनाः जनगुणैः ५।२४ शोषाश्च नगाश्विभिः ५।२२।
चोड्ढ्वे भार्गवे समोऽसमपदात् मूर्च्छनता: पदैः
समान्तविधुबाणनामक्रमात् कथन्त एते स्फुटाः ॥ १५४ ॥
वेदा बाणकुभिः ४।१७ जना रसमै ४।१६ शोषाश्च नन्दाश्विभिः ५।२८-
वांचा बाणगुणैः ३।१५ नगाः नगगुणैः ५।२५ खर्वाश्च विश्वाश्विभिः ५।२२।-
बाणा रूपगुणैः ५।३१ नगा रसगुणैः ५।३६ खर्वाः रसाब्धेन्दुभिः ५।१५-
वेदा बाणगुणैः ४।१५ जनाश्च विश्विमिः ४।१
रामा रसार्कैः ३।१६ विद्यात् ॥ १५५ ॥
अथ चायमितसमधनमयो वेदाः जनार्कैः ४।१४ नगा भूवेदैः ५।१६
विगुणैः ५।३१ मराश्च विश्विभिः ५।५ वेदाः जनाश्वीविभिः ४।७७
वेदा नन्दगुणैः ४।३८ तुल्यादिषु पूर्ववत्सविषयं बाणानां
प्राक्पश्चादयनांशभूतिनिमृगाकार्योऽथ बाणा गुणैः ॥ १५६ ॥
शेषा नगैर्विमितगुणमहिता रामाहिनः बाधिता
चत्वारिंशनिभभुवास्तुपरि भूवाश्च विमानकाः ॥
मध्यादाय नभःसदां च यदवैक्ते कान्तिपातोऽथवा
रामाद्याः समनिभूवैर्गुणनगी ७१ चरखण्डः पातवत् ॥ १५७ ॥

विमाद्या भान्तिपातमगतिरिव विषम्०
खं० कृपामा११ विरामाः११
जवां११ बाणाब्धयो११ ज्ञा१ वनचमरविलास११
नामबाणा१ नविधया:२१ ।
खण्डाद्रो नद्धृवी रूपयनमनवता:०२
भारवाद्य पक्षयावा

चन्द्रभुवःकालस्य रविविधे बहवः ।

रामा३ भूपा१६स्त्रिरामाः३३ शिखरिजलधयो४७
भानि२७ पूर्णाब्धयश्च४० ॥ १५८ ॥

साध्या वा मध्यमार्कानुगतकलिसमागोकुषष्ठ्यंशयुक्ता-
गैर्भूपक्षै२१९।१९र्वियुक्ता द्विरथशत१००हृता भूपतत्त्वा२५१६सहीनाः।
षष्ठ्यासांशा हृतास्ते पुनरुदधिशरै५४र्हारतः शेषहीने-
स्वद्युम्नाल्पाश्चलांशा विषमसमफलानुक्रमात् स्वर्णसंज्ञाः ॥ १५९ ॥

भूयः सायनभानुदोर्जलधिदृक्२४खण्डोद्भवाः क्रान्तयो
द्युज्याश्चोत्क्रमध्यजाः शितिगिरौ सिद्धाश्वराद्रीसवः ।
मेरुस्था उदयासवः क्रियमुखान् संसाध्य लेख्याः शिशो-
र्बोधायाप्युदयान्तरासव इमे स्पष्टाः स्युरात्मान्तरैः ॥ १६० ॥*

प्राग्जन्मार्जितचित्रकर्मविसरं संसारिणां प्राणिनां
यः संज्ञापयितुं सरोजजनुषा संसृज्य खेटव्रजम् ।
द्राङ्मन्दप्रवहापमादिविविधभ्रान्तौ नियोज्य स्वयं
तन्मुक्त्यै पुरुषोत्तमाख्यमसृजद्धामैतमीशं भजे ॥ १६१ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽखिलसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
षष्ठोऽपमाद्यणुरवीन्दुरगाप्रकाशः ॥ १६२ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे स्फुटाधिकारे सूक्ष्मपञ्जिका-
क्रान्त्यादिवर्णनो नाम षष्ठः प्रकाशः ।

---

* क्रान्तिपातस्य पदकानि परिशिष्टे प्रदत्तानि ।

त्रिप्रश्नाधिकारः ।

सप्तमः प्रकाशः ।

शङ्कुच्छायादिवर्णनम् ।

दिग्देशकालकलनार्थमथाभिधास्ये
त्रिप्रश्ननामकमकर्कशवाक्यचक्रम् ।
सर्व्वोपकारकतया प्रथितं प्रकाशं
ग्राह्यं सुदोपकरणाख्यमतिप्रवीणैः ॥ १ ॥
दिक्साधनार्थमवनौ सुसमीकृतायां
तोयैर्विलिख्य चतुरब्धि२४मिताङ्गुलेन ।
सूत्रेण मण्डलममुष्य समस्य मध्ये
सूर्य्या१२ङ्गुलं सुसरलं निदधीत शङ्कुम् ॥ २ ॥
तद्भाग्रमाविशति यत्र यतो निरेति
प्राक्पश्चिमस्थित इमे किल तत्र विन्दू ।
दत्त्वा ततश्च शरबाहु२५समाङ्गुलेन
सूत्रेण वृत्तयुगलं विदधीत धीमान् ॥ ३ ॥
या तत्परस्परसमाक्रमणोत्थरेखा
मत्स्याकृतिर्भवति तन्मुखपुच्छमार्गः ।
चिह्नं भवेद् यमकुबेरदिशोरिहोज्झि
प्राग्विन्दुसंस्कृतिरपक्रमजाल्पभेदात् ॥ ४ ॥
याम्योत्तराङ्कपरि यद्वलयद्वयोत्थ-
मीनेन वासवजलाधिपयोर्दिशौ स्तः ।
दिङ्मध्यसूत्रकृतवृत्तचतुष्टयोत्थ-
मीनैर्भवन्ति विदिशोऽन्तरजाश्चतस्रः ॥ ५ ॥

शङ्कुच्छायाकृतियुतिपदं कर्ण इत्युच्यते तद्-
वर्गाच्छङ्कोः कृति१४४विरहितात्स्यात्पदं भाप्रभायाः ।
वर्गौघोनात्पदमपि नरः शङ्कुभे कोटिबाहू
तच्छङ्क्वाद्यत्रयमभिहितं कर्णसंज्ञं सुधीराः ॥ ६ ॥
योग्यं वर्गं चरमविषमात्प्रोज्झ्य मूलं द्विनिघ्नं
कृत्वा हृत्वा समकममुना तत्फलाप्तस्य वर्गम् ।
त्यक्त्वा पङ्क्तौ द्विगुणितमिदं न्यस्य लब्धं चलन्त्या
पङ्क्त्या प्राग्वद्भवति हरणे स्यात्पदञ्चार्द्धमस्याः ॥ ७ ॥
मूलादल्पः प्रभवति यदा मूलशेषस्त्रिनिघ्नो
लिप्तीभूतो* रस६हतसरूपेण१ मूलेन भक्तः ।
लब्धा लिप्ता यदि पदसमस्याधिकोऽसौ द्विनिघ्नः
सैकोऽब्धि४घ्नत्रियुतपदहृत् स्यात्कलात्मा पुरोवत् ॥ ८ ॥
आयुर्दाये गुणककलिकामात्रभेदाद्द्विसप्त७२-
त्यंशो भेदो भवति यदतः सूक्ष्मकर्म्मात्र कार्य्यम् ।
रूपादीनां कुरुत नवभिः फालकैर्घातमस्मा-
न्मूले लिप्तादि च विकलितात्पूर्ववच्छेषकर्म्म ॥ ९ ॥
येषां येषां गुणनवशतो मूलमानेतुमिष्टं
ते ते हस्ताङ्गुलमुखमया व्याकलाद्यात्मका वा ।
अङ्का ग्राह्याः कृतिपदविधौ रूपलिप्ता विलिप्ता
रूपाद्यं स्याद्विकलितकृतेर्मूलमाप्तं खषड्भिः६० ॥ १० ॥
ऋज्वी वृत्ता समपृथुशिखा मध्यमूला नृयष्टि-
र्दीर्घाल्पा चाङ्गुलमिति मतो द्वादशांशः किलास्याः ।

---

* लिप्तीभूतस्त्रिगुणत्रियुतमूलहृत इत्यर्थः ।

किंवा कालानयनविधये शङ्कुमात्माङ्गयष्टिं
कृत्वा छायां कलयतु पुरोवर्त्तिनीं पादमध्यात् ॥ ११ ॥
स्वंपिण्डं वा स्वनयनसमोच्चाभ्रके बिम्बदेत-
च्छायां चिह्नं किमपि विदधत् स्वाङ्गुलिभ्यां त्यजेत्तम् ।
यत्रैवासौ निपतति ततो यावदङ्कं प्रमाता-
न्नेत्रोच्चद्वादशलवमितैरङ्गुलैर्भामवैतु ॥ १२ ॥
छाया यस्माद्दिनकरतनूमध्यबिन्दोः सदेष्टा
तद्बिम्बान्ते क्षणभुवि तमोऽभावतः सा न दृश्या ।
तस्मात्कर्णक्षितिविधुभुजां२११शेन युक्तैव कार्या
यद्बिम्बार्द्धं शिवभुज२११गुणं मध्यकर्णोद्धृतस्य ॥ १३ ॥
शङ्कुर्नरः कोटिरुदीरितोऽत्र च्छायाप्रभाख्या भुज इत्यभिज्ञैः ।
श्रुत्याख्यमेतत् कृतियोगमूलं चैवं निरुक्तं खलु कर्णभूमिः ॥ १४ ॥
प्राक्पश्चात् खार्द्धगा रेखा सममण्डलमुच्यते ।
निरक्षोर्द्ध्वगता या सा विषुवन्मण्डलाभिधा ॥ १५ ॥
व्यक्षे क्षितिजसंलग्नं ध्रुवद्वन्द्वयुतञ्च यत् ।
वृत्तमुन्मण्डलाख्यं तन्मेरोरुपरि संस्थितेः ॥ १६ ॥
विस्तृतानि निरक्षे तु तनूनि ध्रुवसन्निधौ ।
क्रमाद्द्युरात्रवृत्तानि प्राक्परायतभावतः ॥ १७ ॥
नाड़ीवृत्तं वैषुवतं प्रतिव्यपमुखाश्च ये ।
मण्डलास्तेऽपि लेख्याः स्युर्भूगोले ख इवाखिलाः ॥ १८ ॥
इष्टघस्रार्द्धजा भा चेत् शङ्कुमूलादुदक्स्थिता ।
तदा तद्विषुवच्छायान्तरमग्राभिधीयते ॥ १९ ॥
याम्यस्था चेद्युता साग्रा विषुवच्छायया मता ।
सममण्डलगे भानौ पलभैवोत्तराग्रका ॥ २० ॥

विषुवद्दिनमध्यस्थद्युमणेर्गगनार्द्धतः ।
नतिरक्षः पलस्तत्रोन्नतिर्लम्ब इतीर्य्यते ॥ २१ ॥
ध्रुवस्योन्नतिरक्षांशतुल्या लम्बसमा नतिः ।
अक्षभा पलभाच्छाया विषुवद्दिनमध्यजा ॥ २२ ॥
सू—शङ्कुघ्नभाहते त्रिज्ये पृथक्कर्णविभाजिते ।
लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा । इति ॥२३॥
स्वदेशाक्षप्रभाज्ञानं वक्ष्ये सिद्धान्तसम्मतम् ।
दक्षिणोत्तररेखास्थो भुजो यः स्वदिनार्द्धजः ॥ २४ ॥
तेन संगुणिता त्रिज्या कर्णाप्ता तद्धनुःकलाः ।
नता मध्याह्नसूर्य्यस्य भुजे सौम्ये तु दक्षिणाः ॥ २५ ॥
याम्ये सौम्याः स्युरेताश्च क्रान्तिलिप्ताश्च भास्वतः ।
दिग्भेदे मिश्रिताः साम्ये विश्लिष्टाः स्वाक्षलिप्तिकाः ॥ २६ ॥
सू—तज्ज्याक्षज्याथ तद्वर्गं प्रोज्झ्य त्रिज्याकृतेः११८१९८४४ पदम् ।
लम्बज्याक्षगुणोऽर्क१२घ्नो लम्बज्याप्तोऽक्षभा भवेत् । इति ॥२७॥
छायार्कानयनं वक्ष्ये स्वदेशे ये पलांशकाः ।
मध्याह्नार्कनतांशाश्च दिक्साम्ये तदन्तरम् ॥ २८ ॥
दिग्भेदे तद्युतिः क्रान्तिस्तज्ज्या त्रिगुण३४३८ताडिता ।
परमापक्रमज्या१३७०प्ता भुजज्यास्या धनुःकलाः ॥ २९ ॥
ग्राह्यास्ताः सायनेऽजादौ कर्क्यादौ भार्द्धतश्च्युताः ।
तुलादौ भार्द्धसंयुक्ताश्चक्राद्दूना मृगादिके ॥ ३० ॥
ततोऽयनांशलिप्ताद्यैर्वैपरीत्येन संस्कृताः ।
भवन्ति स्वदिनार्द्धार्कभुक्तस्फुटग्रहादयः ॥ ३१ ॥
स्फुटार्कोनात् स्वमन्दोच्चात् फलं वामं स्फुटे रवौ ।
असकृद्धनहीनत्वात् स्यान्मध्यार्कः स्थिरत्वभाक् ॥ ३२ ॥

सू–स्वाक्षार्कापक्रमयुतिर्दिक्साम्येऽन्तरमन्यथा ।
स्युर्नतांशा रवेस्तेभ्यः साध्ये दोःकोटिमौर्व्विके । इति ॥ ३३ ॥
शङ्कुमानाङ्गुलाभ्यस्ते दोर्ज्यात्रिज्ये यथाक्रमम् ।
कोटीज्यया विभज्याप्तौ च्छायाकर्णावहर्दले ॥ ३४ ॥
*उन्मण्डलस्थखेटस्य क्रान्त्योरुत्तरयाम्ययोः ।
क्षितिजोर्द्ध्वाधरस्थानो भवत्युद्वृत्तजो नरः ॥ ३५ ॥
विषुवद्भापमज्याघ्नी कर्णाप्तोद्वृत्तना भवेत् ।
त्रिज्योन्मण्डलशङ्कुघ्नी चरज्याप्ता च यष्टिका ॥ ३६ ॥
यष्टिरुद्वृत्तशङ्क्वाढ्या तदूनोत्तरयाम्ययोः ।
गोलयोः क्रमतः शङ्कुर्भवति स्वदिनार्द्धजः ॥ ३७ ॥
अथवा वक्ष्यमाणान्त्या गुणितोद्वृत्तशङ्कुना ।
चरज्याप्ता भवेच्छङ्कुरुदग्दक्षिणकाष्ठयोः ॥ ३८ ॥
सू–नतांशभुजकोटिज्ये दृग्ज्याशङ्कुज्यके मते ।
क्रान्तिज्या विषुवत्कर्णहताप्ता शङ्कुजीवया । इति ॥ ३९ ॥
अग्रा माध्याह्निकी सैव सौम्ययाम्यापमानुगा ।
स्वेष्टकर्णहता मध्यकर्णाप्ताग्रेष्टकालिका ॥ ४० ॥
किंवा मध्येष्टकर्णाभ्यां क्रान्तिज्या गुणिता पृथक् ।
लम्बज्याप्ता च मध्याग्रा स्वेष्टाग्रा भवति क्रमात् ॥ ४१ ॥
चलांशसंस्कृते भानौ मेषादौ गोल उत्तरः ।
तुलादौ संस्थिते याम्यः पुरोक्तोऽप्यत्र कार्य्यतः ॥ ४२ ॥
सौम्यगोले यदार्काग्रा विषुवच्छायतोऽधिका ।
तत्तयोरन्तरं याम्यभुजः स्याच्छङ्कुमूलतः ॥ ४३ ॥
न्यूना चेदन्तरं सौम्यो बाहुर्याम्ये तु गोलके ।
अक्षप्रभाग्रयोर्योगः सौम्यो बाहुर्दिनार्द्धजः ॥ ४४ ॥

सममण्डलरेखायां यदा विशति शङ्कुभा।
तदा भाकर्णकालाः स्युः सममण्डलजा इति ॥ ४५ ॥
सममण्डलभा न स्याद्रवौ दक्षिणगोलगे।
अक्षाधिकेऽपमे सौम्ये न स्यात्तत्राल्पके भवेत् ॥ ४६ ॥
लम्बज्या विषुवद्भाघ्नी सौम्यक्रान्तिज्ययोद्धृता।
सममण्डलकर्णः स्यात् किंवाक्षज्यार्क१२ताड़िता ॥ ४७ ॥
तत्क्रान्तिज्योद्धृता किंवा दिनार्द्धश्रवणाहता।
अक्षप्रभा दिनार्द्धाग्राहृता कर्णः स एव हि ॥ ४८ ॥
अक्षकर्णहता सौम्यक्रान्तिज्याक्षप्रभोद्धृता।
सममण्डलशङ्कुः स्यात्त्रिज्यावर्ग११८१९८४जान्तरात् ॥ ४९ ॥
मूलं दृग्ज्या रवि१२घ्ना सा शङ्कुभक्ता भवेत्प्रभा।
त्रिज्या सूर्य्यहता तेन* भक्ता प्रागुदिता श्रुतिः ॥ ५० ॥
सू—स शङ्कुः स्वाक्षजीवाघ्नः परक्रान्तिज्यया१३७०हृतः। इति।
फलं छायार्कबाहुज्या तद्धनुर्भुजकेन्द्रकम् ॥ ५१ ॥
ततः पूर्व्ववदानेयौ छायार्कस्फुटभास्करौ।
अथोच्यते कोणशङ्कोः सिद्धयेऽग्रज्यकादिकम् ॥ ५२ ॥
सू—स्वक्रान्तिज्या त्रिजीवा३४३८घ्नी लम्बज्याप्ताग्रमौर्व्विका।
स्वेष्टकर्णहता भक्ता त्रिज्ययाग्राङ्गुलात्मिका६६ ॥ ५३ ॥
खमध्यात् कोणरेखास्थसूर्य्यात् क्षितिजगामिनी।
कोटीज्या कोणशङ्कुत्वेनोच्यते तद्विलोमगा ॥ ५४ ॥
या विदिक्षु च या च्छाया कोणच्छायेति सा मता।
सौम्यापमे स्वाक्षसमे न स्यातां कोणशङ्कुभे ॥ ५५ ॥

---

* सममण्डलशङ्कुना।

यदि मध्याह्नगो भानुर्दक्षिणस्थां नतस्तदा ।
कोणशङ्कुस्तदाग्नेय्यां नैर्ऋत्यां प्राक्पराह्णयोः ॥ ५६ ॥
स नतश्चेदुत्तरस्थां तदैशानमरुद्दिशोः ।
कोणशङ्कुप्रभाकर्णौः कोणाख्यं साध्यतां नतम् ॥ ५७ ॥
त्रिज्यावर्गार्द्धतो५९०९९२२ऽग्रज्यावर्गोनात्कृतवह्निभिः१४४ ।
निघ्नान्नृवर्गदल७२युक्पलभावर्गभाजितात् ॥ ५८ ॥
लब्धं तत्करणी नाम कर्म्मभूमौ निधायताम् ।
पुनरग्रज्यकार्क१२घ्नविषुवच्छायताड़िता ॥ ५९ ॥
द्वाद्रा७२घ्नेनाक्षभावर्गेणोद्धृतात्तत्फलं भवेत् ।
तद्वर्गकरणीयोगान्मूलमक्षफलोनयुक् ॥ ६० ॥
क्रमतः कोणशङ्कुः स्याद्दक्षिणोत्तरगोलयोः ।
मू- तत्त्रिज्यावर्गविश्लेषान्मूलं दृग्ज्याभिधीयते ॥ ६१ ॥
स्वशङ्कुना विभज्याप्ते दृक्त्रिज्ये द्वादशाहते६७ ।
छायाकर्णौ तु कोणेषु यथास्वं देशकालयोः । इति ॥ ६२ ॥
संस्कृतस्यायनांशैर्या भास्वतो बाहुमौर्व्विका ।
सान्त्यापक्रमजीवा१३७०घ्नी लम्बज्याप्तोदयज्यका ॥ ६३ ॥
यत्रोदयज्या भूरामसिद्धा२४३१स्तत्रायनान्तगः ।
विदिक्षूदयमस्तञ्च यात्यर्को विषुवे पुनः ॥ ६४ ॥
सर्व्वत्र पूर्व्वापरयोः समेर्व्वोः परितो भ्रमन् ।
कोणस्थे प्राङ्नतं यावत्तावत्प्रत्यङ्नतं रवौ ॥ ६५ ॥
क्रान्तिभाघटिकाग्राद्यं सर्व्वं पूर्व्वं दिनार्द्धजात् ।
भानोः संसाध्यतत्कालप्रभवात् पुनरानयेत् ॥ ६६ ॥
अभीष्टकालतश्छाया छायातः काल उच्यते ।
यज्ज्ञानाज्जन्मयात्रादौ सलग्नाः स्युर्ग्रहाः स्फुटाः ॥ ६७ ॥

इष्टकालनतासुभ्यो योत्क्रमज्या प्रसाध्यते ।
सा नतोत्क्रमजीवेति ज्ञेया वासरभागयोः ॥ ६८ ॥
त्रिज्याचरज्या हीनाढ्या दक्षिणोत्तरगोलयोः ।
अन्त्या नतोत्क्रमज्योना सोन्नतज्याभिधीयते ॥ ६९ ॥
स्वाहोरात्रार्धकर्णेन गुणिता सा त्रिजीवया ।
विभक्ता शङ्कवेच्छेदो लम्बज्याघ्नः स भाजितः ॥ ७० ॥
त्रिभज्यया भवेच्छङ्कुस्तद्वर्गपरिशोधितात् ।
त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत् ॥ ७१ ॥
इ—अभीष्टच्छाययाभ्यस्ता त्रिज्या तत्कर्णभाजिता६८ ।
दृग्ज्या तद्वर्गसंशुद्धात्त्रिज्यावर्गाच्च यत्पदम् ॥ ७२ ॥
शङ्कुः स त्रिभजीवाघ्नः स्वलम्बज्याविभाजितः६९ । इति ।
किंवाक्षकर्णगुणितः सूर्या१२प्तश्छेदसंज्ञकः ॥ ७३ ॥
स त्रिज्याघ्नो द्युजीवाप्त उन्नतज्या तयोनिता ।
स्वान्त्या नतोत्क्रमज्या स्यात्तस्याश्चापं नतासवः ॥ ७४ ॥
स्ववासरदलप्राणास्तदूनाश्चोन्नतासवः ।
रसो६द्धृता विनाड्यः स्युः प्राक्पश्चिमकपालयोः ॥ ७५ ॥
प्रदर्श्यते विशेषोऽत्र यद्यल्पा सप्तविंशतेः ।
भवेन्नतोत्क्रमज्या तदन्त्या वर्गात्परित्यजेत् ॥ ७६ ॥
उन्नतज्याकृतिं शेषान्मूलं त्रिज्यान्त्यजीवयोः ।
योगार्द्धेन हृतं भज्यादन्त्यया स्युर्नतासवः ॥ ७७ ॥
नतोत्क्रमगुणस्त्रिज्याधिकश्चेत्त्रिज्ययोज्झितः ।
शेषात् क्रमगुणाच्चापस्त्रिज्याचापा५४००न्वितोऽसवः ॥७८॥
एवं नतासवस्त्रिज्याधनुषो५४०० यदि चाधिकाः ।
तदा तदूनिताः शेषात् क्रमज्या त्रिज्ययान्विता ॥ ७९ ॥

स्यान्नतोत्क्रमजीवाथ प्राक्सिद्धा ये नतासवः ।
स्वाहोरात्रासु गुणिताः सूक्ष्मास्वक्रासुभि२१६००र्हृताः ॥८०॥
छायार्कस्याप्यथाग्रातः सममण्डलशङ्कुतः ।
वक्ष्याम्यानयनं स्वाग्रागुणिता लम्बमौर्व्विका ॥ ८१ ॥
इष्टकर्णाङ्गुलैर्भक्ता क्रान्तिज्यातो भुजज्यका ।
ततः प्राग्वत्पदैश्छाया सूर्य्योऽंशैरायनैः स्फुटः ॥ ८२ ॥
त्रिभजीवा३४३८कं१२गुणिता समविम्बश्रवो हृता ।
सममण्डलशङ्कुः स्यात् सोऽभ्यस्तः स्वाक्षजीवया ॥ ८३ ॥
परमापक्रमज्या१३७०प्तः फलं भानोर्भुजज्यका ।
ततः केन्द्रं ततश्छाया रविः प्राग्वदसौ स्फुटः ॥ ८४ ॥
छायाक्रान्तिपथो निरूप्यत इह प्राज्ञैः समे भूतले
वृत्ते यत्तलशङ्कुना न घटते सर्व्वत्र तत्सर्व्वदा ।
गोले तद्घटना भविष्यति यतस्तस्मिन्मया वक्ष्यते
रात्रेः काल इहोच्यतेऽथ भयुतौ वक्ष्यताराध्रुवैः ॥ ८५ ॥
मध्ये व्योमगतैर्भदृक्त्ववशतो निश्चित्य मध्यां तनुं
तां संस्कृत्य चलांशकैर्गतघटीरानीय रात्र्यर्द्धजात् ।
सूर्य्याक्रान्तचलांशसंस्कृतगृहाद्भोग्या घटीर्मध्यजा-
स्तद्युग्मान्तरभुक्तमध्यभघटीः संयोज्य सर्व्वास्ततः ॥ ८६ ॥
प्रोज्झ्यार्कद्युदलञ्च शिष्टघटिका रात्रौ गताः स्युर्दिन-
स्यार्द्धेनाथ युता भवन्त्युदयतः सूर्य्यस्य ता निर्गताः ।
इत्थं मध्यभभोग्यकालतपनाक्रान्तर्क्षभुक्तान्तर-
क्षेत्राणाञ्च युतिर्दिनार्द्धरहिता स्यादेष्यकालो निशः ॥ ८७ ॥
कालाद्यद्यपि लग्नसिद्धिरुदिता भूयोऽत्र कौतूहलाद्-
याम्योदग्वलयोर्द्वगोडुवशतो दृग्दृक्२२चलांशस्फुटाः ।

ये प्रागुक्तलदेशजानि गदिता लग्नास्तदीयान्यहं
वक्ष्ये भुक्तपलान्यतः प्रमुदिताः स्युर्योगताराविदः ॥ ८८ ॥
यन्नक्षत्रगतार्कवासरदले यः स्याद्विलग्नः स्फुट-
स्तस्मिन् भे गगनार्द्धगे स हि भवेत्तत्समोऽस्तं व्रजेत् ।
विष्णौ(२२) स्वार्द्धगतेऽजलग्नजपलान्यम्भोधिनन्दा९४ धने(२३)
तस्मात् खाङ्कृतयः२२० प्रचेतसि(२४) वृषा-
द्व्योमाष्टनेत्राणि२८० च ॥ ८९ ॥
प्राग्भाद्रे(२५)ऽब्धिदृशो२४ व्रजन्ति मिथुनात्तस्मादहिर्बुध्न्यभे(२६)
वेदाद्रित्रितयी१७४ऽथ कर्कटतनोः पौष्णे(२७) नवाम्भोधयः४९ ।
अश्विन्यां(१) स्वरवासवा१४७स्व यमभे(२)-
ऽङ्गार्थाश्विनो२५६ऽथाग्निभे(३)
सिंहादद्रिरसा६७ विधौ(४) स्वरघना१७७-
श्चन्द्रे(५) स्त्रिया लोचने२ ॥ ९० ॥
रौद्रे(६)ऽस्याः करिमार्गणा५८ अदितिभे(७)
द्वे२ तौलितोऽस्माद्गुरौ(८)
वेदेन्द्रा१४४ भुजगे(९) ततोऽब्धिधृतयः१८४
पित्र्ये(१०) रदाः३२ कीटतः ।
योना(११)वद्रिनवेन्दवो१९७ऽर्य्यमसुरे(१२)
पञ्चाष्टयमा२८५स्ततो
हस्ते(१३) चापत ईक्षणर्त्तव६२ इभा-
ङ्कक्षोणय१९८स्त्वाष्टरि(१४) ॥ ९१ ॥
स्वातौ(१५) नक्रतईक्षणेन्दव१२इतः शक्राग्निभे(१६) क्ष्मेष्विला१५१
मैत्रे(१७)ऽङ्गाङ्गदृशो२६६ मघोनि(१८) घटतो-
ऽद्र्यङ्गानि६७ मूले(१९) ततः ।

क्ष्माग्न्यक्षोणि२३१ जले(२०)ऽब्जजात् खवसवो८०
वैश्वे(२१)ऽक्षिवाणेन्दवो१५२
यातानागतभान्तरात्तनुपलस्वर्णत्वमालोच्यताम् ॥ ९२ ॥

सत्सिद्धान्तशिरोमणौ यदवदद्व्युत्पत्तये भास्करः
क्षेत्राणां भुजकोटिकर्णघटनां नानाविधां सूक्तिभिः ।
यत्प्रश्नोत्तरविस्तरेण गणितं दिग्देशकालाश्रये
तद्व्याख्यासहितं यतोऽस्ति हि मया तत्प्रोज्झि वाग्गौरवात् ॥९३॥

सिद्धान्तप्रचयादलम्भि मयका यो यो विशेषो इमा
तुल्यस्तल्लिखितं मदिष्टमिह तत्तत्साङ्गतासिद्धये ।
सर्व्वग्रन्थकृतिर्बभूव गणिते गोलान्विते स्फुटे
क्षेत्राणामुपपत्तयो हि सुलभास्तत्किं वचोविस्तरैः ॥ ९४ ॥

यत्राष्टाब्धिकलाढ्यनन्दकु१९।४८लवैरक्षः समक्षीकृतो
व्यक्षात् सार्द्धरसर्त्तकैः२७६।३० खखभुजै२००र्भूमध्यरेखाङ्कितः ।
सिद्धं योजनकैः स्वदेशविवरं तत्रासिताद्रौ शश-
श्लोलेलाकमलाविलासस्थलमलंकुर्य्यान्मदीयं मनः ॥ ९५ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
त्रिप्रश्नवाग्मुनि७मितः शमितः प्रकाशः ॥ ९६ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
शङ्कुच्छायादिवर्णनो नाम सप्तमः प्रकाशः ।

अष्टमः प्रकाशः ।

चन्द्रग्रहणवर्णनम् ।

स्मार्त्ताः सांहितिकाः पुराणनिपुणास्तन्त्रेचका वैदिकाः
स्नानार्चाजपहोमदानकृतिनां यस्मिन्ननन्तं फलम् ।
प्रोचुर्यश्च महाचमत्कृतिकरो लोकस्य तिथ्यादिके
विश्वासावहमिन्दुतिग्ममहसोर्वच्म्यहं तं ग्रहम् ॥ १ ॥

पर्वान्तसाधितविपातविधोर्भुजांशा
विश्वा१३ल्पका यदि तदा ग्रहसम्भवोऽस्य ।
तस्माद्विधौ शिखितमोऽन्यतरान्तिकस्थे
चिन्त्यो ग्रहोऽग्निकु१३लवावधि पूर्णिमान्ते ॥ २ ॥

सूर्यग्रहो धृति१८लवान्तममान्तजेऽब्जे
ग्रस्तो मतोऽन्तिकवशात् शिखिना गुनेति ।
प्राक् पुरो नतगुणां२शयुतोनसूक्ष्म-
दर्शान्तकालिकसुधाकरदिक्शरस्य ॥ ३ ॥

तत्कालवित्रिभतनूनतबाहुजीवा
षष्ठ्यंशकस्य च युतेर्वियुतेश्च शेषात् ।
दिक्साम्यभेदजनुषः क्रमशः स्फुटेषौ
न्यूने कृताग्नि३४ इनग्रहसम्भवः स्यात् ॥ ४ ॥

तत् क्वापि याम्यनतिभूरितयोत्तरेषौ
सार्द्धांशके१।३०ऽपि स भवेदपि निःशरत्वे ।
न क्वाप्यथो नयनमण्डलगेऽपवृत्ते
स स्याद्विपातशशिदोष्णिनगां७शतोऽल्पे ॥ ५ ॥ इति ग्रहणसम्भवः ।

पर्वान्तसंस्कृतिरवीन्दुसमीकृतीन-
भूभाविधुप्रमितिबाणपिधानकालैः ।

सल्लम्बनावनतिदिग्वलनाङ्गुलाद्यैः
शास्त्रान्तरादिह विशेषमवेत सन्तः ॥ ६ ॥
राकामयो रवसितिप्रभवोच्चमध्य-
सिद्धे विधौ तपनभार्द्धदिवाकराभ्याम् ।
न्यूनेऽधिकेऽन्तरपराः प्रथमेन्दुसूर्य्य-
भुक्त्यन्तरेण विहृता विघटीफलेन ॥ ७ ॥
तिथ्यन्त आद्यवियुतः समपर्व्वकाल-
स्तात्कालिकार्कभदलञ्च रविश्च सूक्ष्मः ।
वेद्यः शशी समकलाविति तौ भवेतां
किन्त्वोच्यते क्वचन पर्व्वणि तद्विशेषः ॥ ८ ॥
सूर्य्यस्य दोर्गतिफले उदयान्तरञ्च
यद्येकदा त्रितयमेतदृणं धनं स्यात् ।
तच्चोदयान्तरभुजान्तरके सुधांशो-
र्भास्वद्गतेः फलयुतेर्विकलास्ततस्ताः ॥ ९ ॥
शीतांशुदोःफलकला गुणिता विभक्ता-
स्तद्ग्रासयोजनचयेन४४४ च पूर्णिमायाम् ।
दर्शे हृतास्तु रवियोजनकै७२०००र्विलिप्ता
लब्धाश्च ताः पुनरिनेन्दुगतान्तराप्ताः ॥ १० ॥
दण्डादिकैरिह फलैः समपर्व्वयुक्त-
मूनं पुरोदितफलत्रितयर्णतायाम् ।
स्वल्वे क्रमाद्भवति दृक्सममत्र कार्य्या
सूर्य्याब्जयोः समकलीकृतिरुक्तपूर्व्वा ॥ ११ ॥

द्विसप्ततिसहस्र७२०००योजनमितार्कविम्बायतिर्महापुरुषवाचयेत्यनुजगावथर्व्वा श्रुतिः ।

मयैतदनुसारतो नयनगोचरत्वंग्रह-
प्रमाणपरिधिग्रहादिकमकल्मषं कल्प्यते ॥ १२ ॥

विवस्वद्बिम्बाद्द्विरसविधु१६२भागः समुदितो
विधोर्बिम्बव्यासः श्रुतिकृतचतु४४४योजनमितः ।
भुवः प्राङ्निर्दिष्टः१६०० स च सवितुरर्थाम्बुधि४५लवो-
ऽन्तरीते वक्ष्येऽहं ग्रहणमथ भानोः शशभृतः ॥ १३ ॥

भूमध्यात्खदलावधि ग्रहपतेः कर्णाख्यमार्गश्चतु-
र्नन्दद्विद्विपपूर्णतर्कधरणीभृद्७६०८२९४योजनो मध्यमः ।
शीतांशोः शरपुष्करक्षितिधरस्तम्बेरमाम्भोधयो४८७०५
मध्यस्य श्रुतियोजनान्यथ तयोः स्पष्टा भवेन्मान्दजा ॥ १४ ॥

भास्वन्मण्डलयोजनानि७२००० गुणभूपक्षाक्षि२२१३भक्तानि चे-
द्बिम्बव्यासकला३२।३२ भवन्ति सवितुर्मध्या निशास्वामिनः ।
तान्येवर्तु६गुणानि पञ्चकरिभि८५र्भक्तानि चेन्मण्डल-
व्यासस्यापि कला३१।२० भवन्ति धरणीच्छायाकलाश्चन्द्रवत्॥१५॥

मन्दकोटिफलयुक्तदूनिता
नक्रकर्किमुखमन्दकेन्द्रके ।
त्रिज्यका भवति संस्कृता तया
वर्जिता द्विगुणितत्रिमौर्विका६८७६ ॥ १६ ॥

शेषकेण विहृतास्त्रिभज्यका-
वर्गतः११८१९८४४ फलकलात्मकः स्फुटः ।
मन्दकर्ण इनचन्द्रयोः क्षिते-
र्मध्यतोऽन्यखसदां रवेर्भवेत् ॥ १७ ॥

मन्दकर्णहतयोजनश्रुतिस्त्रिज्यया किल हृता भवेत् स्फुटा ।
मध्यकर्णहतबिम्बलिप्तिका स्पष्टकर्णविहृताः परिस्फुटाः ॥ १८ ॥

सिद्धान्तशिरोमणौ— मन्दश्रुतिर्द्राक्श्रुतिवत्प्रसाध्या
तया त्रिभज्याद्विगुणा६८७६ विहीना ।
त्रिज्याकृतिः११८१९८४४ शेषहृता स्फुटा स्या-
ल्लिप्ता श्रुतिस्तिग्मरुचेर्विधोश्च ॥ १९ ॥
लिप्ताश्रुतिघ्नस्त्रिगुणेन भक्तः
स्पष्टो भवेद्योजनकर्ण एवम् ।
बिम्बं रवेर्द्विद्विशरर्त्तु६५२२सङ्ख्या-
नीन्दोः खनागाम्बुधि४८०योजनानि । इति ॥ २० ॥

भास्करोक्तमृदुकर्णसाधनं यद्यपि स्फुटतमं तथाप्यहम् ।
प्राह कोटिफलतो भुजान्तभाग्बिम्बमध्यसमतार्थमेव हि ॥ २१ ॥

मध्यमार्कशशिबिम्बजाः कलाः
सूक्ष्मतत्प्रथमभुक्तिताड़िताः ।
मध्यभुक्ति५९।८।७९०।३५विहृताः स्वमण्डल-
द्वन्द्वविस्तृतिरदः फलानि वा ॥ २२ ॥

किं वा बिम्बास्त्रिगुण२४३८गुणिता योजनैः स्वैर्मितानां
स्वश्रुत्याप्ताः स्फुटतरकलाभानुभूभाविधूनाम् ।
यद्वा भास्वद्गतिफलखरुद्रां११०शयुक्तोनितास्ता
मध्याः३२।३२ स्पष्टाः स्युरिनकलिकाः कर्किनक्रादिकेन्द्रे ॥ २३ ॥

मध्यं मानं३१।२० गतिफलकलापञ्चविंशांशकस्य
त्यागाद्योगात् स्फुटविधुमितिर्नक्रकर्क्यादिके स्यात् ।
रुद्र११घ्नो वा स्फुटरविगतिः खाक्षि२०भक्तार्कमानं
सप्तोनेन्दुस्फुटगतिकलास्तत्त्व२५भक्ताः स्वमानम् ॥ २४ ॥

भूव्यास१६००निघ्नः स्फुटसूर्यकर्णो
भूव्यासहीनार्कतनू७०४००विभक्तः ।

फलं तदा मूलशिखान्तदैर्घ्यं
सूचीनिभायाः पृथिवीप्रभायाः ॥ २५ ॥

शिरोमणौ—भूव्यासहीनं रविबिम्बमिन्दु-
कर्णाहतं भास्करकर्णभक्तम् ।
भूविस्तृतिर्लब्धफलेन हीना
भवेत् कुभाविस्तृतिरिन्दुमार्गे । इति ॥ २६ ॥

तस्मान लिप्ताः शशिवत्प्रसाध्याः
किंवा नगां७शः शशभृद्गतेर्यः ।
सोऽष्टाद्रि७८निघ्नेषुमनू१४५हृतार्क-
गत्यूनितः स्यात्तमसः प्रमाणम् ॥ २७ ॥

भूभा विधुं चन्द्र इनं पिधत्ते यदा तदैव ग्रहणं तयोः स्यात् ।
पाताख्यराहोर्भुजसन्निकर्षात्तस्यासुरग्रास इति प्रशस्तिः ॥ २८ ॥

शिरोमणौ—दिग्देशकालावरणादिभेदा-
न्न च्छादको राहुरिति ब्रुवन्ति ।
यन्मानिनः केवलगोलविद्या-
स्तत्संहितावेदपुराणबाह्यम् ॥ २९ ॥
राहुः कुभामण्डलगः शशाङ्कं
शशाङ्कगश्छादयतीनबिम्बम् ।
तमोमयः शम्भुवरप्रदानात्
सर्व्वागमानामविरुद्धमेतत् । इति ॥ ३० ॥

प्रभा भुवो भ्राम्यति भानुभार्द्धे लग्नभंमध्ये यदि शुभ्रभानुः ।
अभ्युद्विपद्दिङ्मुख एति वेगात्तत्तद्ग्रहः सातप्रबिम्बलोपात् ॥ ३१ ॥
भूभानुमध्ये यदि शीतभानुर्गच्छन् रविं छादयति प्रतीच्याः ।
भास्वद्ग्रहस्तद्धितयस्य पूर्व्वयानेऽपि शुभ्रांशुगतेर्महत्त्वात् ॥ ३२ ॥

कुजादिपातेषु यथा तुरीयफलस्य वाच्यो धनहीनभावः ।
तथा दिगंशाख्यफलेन राहुः सूक्ष्मः स्फुटस्तुर्य्यशरोव वाच्यः ॥ २३ ॥
पातोनतात्कालिकचन्द्रदोर्ज्या स्वाष्टाग्नि३८भागेन युतार्द्दिता च ।
चापीकृता षड्विहृता फलं स्यात् कलादिकं स्पष्टशरः सुधांशोः ॥ २४ ॥
विपातचन्द्रस्य भषट्क आद्ये सौम्यो द्वितीये स च दक्षिणः स्यात् ।
क्षितिप्रभारोपणतो विलोमश्चन्द्रग्रहे दिक्शर एव वेद्यः ॥ २५ ॥

चापं विना कोटिफलं तथास्य
युत्या हृतं पातशशाङ्कगत्योः ।
त्रिज्याहृतं बाणगतिः स्फुटा स्या-
त्तत्संस्कृतेः क्रान्तिगतेः स्फुटत्वम् ॥ २६ ॥
लेख्यं विपातेन्दुभुजाब्धिपक्ष२४-
खण्डैः शरांशादिसहान्तरं वा ।
कोटीफलं तद्गतियोगनिघ्ना-
न्तरं गतिस्तत्त्वयमा२२५प्तमिष्वाः ॥ २७ ॥*

यद्वा विपातेन्दुभुजोत्थलिप्ता नृपां१६शहीना गिरिशै११र्विभक्ताः ।
फलं शरः पातविहीनचन्द्रबाहोर्गृहाद्यावधि कल्पनीयः ॥ २८ ॥

छाद्यच्छादकमानयोगदलतो न्यूनः शरश्चेत्तदा
ग्रासः स्यान्न शरेऽधिके स्फुटतरे तन्मानयोगार्द्धतः ।
प्रोज्झ्य स्पष्टशरञ्च शिष्टकलिकाश्छन्ना भवन्त्येव ता-
श्छाद्याद्यद्यधिकास्तदैव सकलग्रासोऽम्बरव्यापकः ॥ २९ ॥
स्पर्शश्चन्द्रमसः पुरो दिशि रवेः पश्चाद्विमोक्षोऽन्यदिक्-
प्रायः स्याच्च निमीलनं हि सकलग्राह्यापिधानक्षणः ।

---

* इति विक्षेपखण्डा परिशिष्टे द्रष्टव्या ।

तत्रोन्मीलनमेव किञ्चिदुदिते स्वच्छादकाभ्यन्तरे
तन्मध्ये दृगगोचरांशुरुदितो ग्रासो विमर्दाभिध ॥ ४० ॥
पर्व्वान्तःसमलिप्तिकेन्दुरविजौ भार्द्धे च चक्रे क्रमा-
न्मान्त्यं ग्रहणस्य मध्यसमयः सौरस्य सत्त्वनः
मानैक्यार्द्धकृतेः स्फुटाशुगकृतिं प्रोज्झ्यावशेषात्पदं
षष्ट्या संगुणितं दिनेशशशिनोः सूक्ष्मस्वभुक्त्यन्तरा ॥ ४१ ॥
भक्तं तत्फलनाडिकाः सपलकाः स्थित्यर्द्धजा मध्यमा
ग्रासप्रोज्झितमानयोगदलतः स्वघ्नाद्वियुक्तादिषोः ।
कृत्याशेषपदात् पुरेव घटिका मध्या विमर्दार्द्धजाः
पर्व्वान्तः स्थितिमर्द्दखण्डवियुतस्तद्युक् क्रमादुत्क्रमात् ॥ ४२ ॥
मध्ये स्पर्शनिमीलने च भवतश्चोन्मीलनोन्मोक्षकौ
तत्तत्कालिकपातसूक्ष्मशशिजैर्बाणैः पुनः साधिताः ।
स्पर्शाद्या असकृत्क्रियास्थिरतराः स्पष्टाः स्युरिन्दो रवे-
स्त्वेते स्वस्वविलम्बनैः सह परिस्पष्टा मुहुः संस्कृताः ॥ ४२ ॥
वक्ष्याम्यत्र विशेषमीश११गुणितं मध्यग्रहेषोर्दलं
सूर्य्येन्द्वन्त्यगकान्तरोद्धृतमिषौ स्याद्दृङ्माने फलम् ।
नाड्याद्यं वियुतं युतं त्वितरथा पर्व्वण्यतस्तत् स्फुटं
तत्कालेन्दुशराद्यपर्व्वशरयोरन्तर्विलिप्ताकृतेः ॥ ४४ ॥
अर्कान्मूलमिहादिपर्व्वशरतः संशोध्य शेषः स्फुटः
स्याद्बाणस्तत आगते स्थितिदले स्यातां समे विस्फुटे ।
ग्रासो दृक्समतामुपैति च ततः स्पर्शादयः स्युः सकृत्
पश्चाद्या कथयिष्यते धरणिभा सा दृक्समा गृह्यताम् ॥ ४५ ॥
अथेष्टकालाद्ग्रसनप्रमाणं ग्रासादभीष्टात्समयं प्रवक्ष्ये ।
पूर्व्वत्र भागे ग्रहणेष्टनाडीं स्थित्यर्द्धतः प्रोज्झ्य ततोऽवशिष्टैः ॥ ४६ ॥

दण्डैर्निहन्याद्ग्रहकालहारं षष्ट्या भजेत्कोटिकलाविधोः स्युः ।
भानोर्ग्रहे कोटिकलाश्च मध्यस्थित्यर्द्धनिघ्नाः स्फुटलम्बनोत्थैः ॥४७॥
स्थित्यर्द्धदण्डैर्विहृताः स्फुटाः स्युस्तत्कालविक्षेपकलाभुजोऽत्र ।
दोःकोटिवर्गैक्यपदञ्च कर्णस्तदूनमानैक्यदलं पिधानम् ॥ ४८ ॥
भागे परस्मिन् ग्रहणस्य मोक्षस्थित्यर्द्धतः स्वेष्टघटी विशोध्या ।
शेषो रवीन्दुस्फुटसूक्ष्मभुक्त्यन्तराहतः षष्टिहृतः स कोटिः ॥ ४९ ॥
तात्कालिकेन्दोः शर एव बाहुः स्पष्टो रवेः कोटिकलाः पुरोवत् ।
ग्रासस्तथा यः कलिकात्मकः स्यात्संज्ञायते सद्भिरतोऽवशेषः ॥५०॥
ग्रस्ताः कलामानयुतेरथार्द्धात् संशोध्य शेषः खच्छाभिधानः ।
तद्वर्गतस्तत्समयस्फुटेषु वर्गोनितान्मूलकलाश्च कोटिः ॥ ५१ ॥

सूर्य्यग्रहे लम्बनसंस्कृतेष्ट-
स्थित्यर्द्धसन्ताड़ितकोटिलिप्ताः ।
मध्यस्थितार्द्धेन हृताः स्फुटाः स्युः
षष्ट्याहताः कोटिकला रवीन्द्वोः ॥ ५२ ॥

भुक्त्यन्तराप्ताः फलनाड़िकाभिः स्थित्यर्द्धमूनं सदभीष्टनाड्यः ।
विमुच्यमाने त्ववशिष्टलिप्ता अभीप्सितग्रासतया प्रकल्प्याः ॥ ५३ ॥
प्राग्वत्ततः स्यादवशिष्टकालो रविग्रहे स्पार्शिकमौक्षिके ये ।
स्थित्यर्द्धके मध्यतयोदिते ते कर्मान्तरं लम्बनजं तयोर्यत् ॥ ५४ ॥

अथाभिधास्येऽयनजं पलोद्भवं
कलास्वरूपं वलनद्वयं तयोः ।
यतो ग्रहस्पर्शविमोक्षमध्यजा
दिशः स्फुटाः स्युर्नभसः कपालयोः ॥ ५५ ॥
चलांशसंस्कारवदर्कचन्द्रयोः
स्वकोटिलिप्ताः खमहीन्द्र१४१०ताड़िताः ।

खखाब्धिबाणै५४००र्विहृतास्ततः फलं
कलात्मकं स्याद्वलनं स्वमायनम् ॥ ५६ ॥
हिमांशुभान्वोः स्वदिनार्द्धतो नतं
पलात्मकं खाङ्क९०हतं दिनार्द्धजैः ।
निजैः पलैर्भाजितमंशकादिकं
नतं पुरः पश्चिमजं दिनार्द्धयोः ॥ ५७ ॥
निजाक्षभागा नतभागताडिता
नवत्य९०वाप्ताः फलमक्षसम्भवम् ।
पुरोनते स्याद्वलनं तदुत्तरं
नते च पश्चाज्जनिते हि दक्षिणम् ॥ ५८ ॥
तयोः पलोत्थायनयोः समांशयोर्युतेर्वियोगात्तु विभिन्नकाष्ठयोः ।
स्वकं भवेद्दिग्वलनांशकादिकं तदङ्गुलाद्यं परिलेख दृश्यते ॥ ५९ ॥
पुरोदितं सूर्यदिनं विधूदया-
स्तयोस्तु मध्ये दिनमस्य सम्मतम् ।
दिनान्तसिद्धावयनांशसंस्कृतौ
विधाय भास्वच्छशिनौ तदृक्षयोः ॥ ६० ॥
रवेरभुक्ताः शशिनो गता लवा
निजोदयघ्नाः खगुणो३०द्धृताः फले ।
तदन्तरोत्थास्तनवश्च षट्शरा५६-
सवश्च युक्ता घटिकादयोऽत्र ये ॥ ६१ ॥
दिनादितस्तत्र भवेद्विधूदयः
परेद्युरर्कोदयकालिकौ तथा ।
विधाय सूर्यस्य स षड्भशीतगोः
समे गृहे भुक्तलवोदयान्तरम् ॥ ६२ ॥

ग्रहान्यतायां रविभोग्यचन्द्रमो-
गतांशकालद्वययोग ऐन्दवः ।
इनोदयादस्तमयः स षट्शरा५६-
सुभिर्वियुग्लम्बनजैः स्फुटः पुनः ॥ ६३ ॥
स्वकालविक्षेपकलाः पलप्रभा-
ङ्गुलाहताः सूर्य्य१२हृताः फलासुभिः ।
युतोनितः स्यादुदयोऽप्यवागुदक्-
शरक्रमादस्तमयस्तु हीनयुक् ॥ ६४ ॥
निशापतेः सूक्ष्मगतिर्निशाहता
कलात्मिका नन्दसुधांशु१९भाजिता ।
फलैः पलैः सङ्कलिता निशामिति-
र्भवेत्तदीयं दिनमानमेव वा ॥ ६५ ॥

याम्यायनान्तहरिति ध्रुवतो यदेव
स्थानं दलोनकृतबाहु२३।३०लवान्तरस्थम् ।
तत्प्रोदितं ध्रुवकदम्ब इति ग्रहाणां
क्रान्तेस्तदुत्तरदिशो निरचायि चिह्नम् ॥ ६६ ॥
तद्ग्रस्तदिग्विनिहितो यमदिक्कदम्ब-
स्तर्क्यः कदम्बमनुजातशिखः कलम्बः ।
तत्पार्श्वको ह्यपमसम्मुख एव विम्बः
प्राग्याति सर्व्वखसदां शशिनोऽविलम्बः ॥ ६७ ॥

इत्थं सिद्धात् कदम्बाद्ध्रुवत उपसरत् सूत्रयोर्विम्बमध्य-
स्यूतस्वीयाग्रयोर्यद्विवरमुडुपतेर्मण्डलान्तेऽस्ति तद्भाः ।
भांशा३६०स्तदिष्टनाम्नाः फलमिह वलनं ह्यायनं भागरूपं
ग्राह्यं तत्तद्दिगाख्यं खलु रजनिपतौ सौम्ययाम्यायनस्थे ॥ ६८ ॥

पूर्व्वेषामुक्तिरेषा क्वति च न वलनं प्रोचुराद्यं क्रमज्या-
साध्यं केऽप्युत्क्रमज्याकलितमिति जगुश्चायनं कोटिमौर्व्याः ।
नास्माकं तन्मतं यद्वपुरिव नमिते नाडिकाक्रान्तिवृत्ते
तत्कोट्यंशैर्नतांशैर्वलनमयनजं चाक्षजं कर्त्तुमिष्टम् ॥ ६९ ॥

अष्टादशाङ्गुलगुणभ्रमणेन वृत्त-
द्वन्द्वं पुरन्दरजलेशदिशोर्विलिख्य ।
अन्योऽन्यलग्नमनतोन्नतभूप्रदेशे
तत्केन्द्रयोः प्रतिदिशञ्च दशैव बिन्दून् ॥ ७० ॥

मध्ये पुरःपरगतां निदधीत रेखां
प्राङ्मण्डलाद्बहिरुदग्दिशि चाङ्गुलान्ते ।
बिन्दुन्तथा वरुणदिग्गतमण्डलस्य
बाह्येऽङ्गुलान्तरितदक्षिणभागकेऽन्यम् ॥ ७१ ॥

बाह्यस्थदक्षिणगबिन्दुत एव पश्चा-
च्छिन्ने पुरश्चरमबिन्दुगकोटियुग्मम् ।
षष्ठांशसंयुतरसाक्षि२६।१०मिताङ्गुलेन
सूत्रेण चापमथ पूर्व्वगबिम्बमध्ये ॥ ७२ ॥

तद्वद्बहिर्विलिखितोत्तरबिन्दुतोऽपि
चापं लिखेत्परपुरोगतबिन्दुलग्नम् ।
चापद्वयं भवति सम्मिलितं कपाल-
द्वन्द्वस्थितापमपथप्रतिमं द्वयान्तः ॥ ७३ ॥

प्रत्यग्दिशो हरिदिगन्तमथार्क१२सङ्ख्यै-
श्चिह्नैः क्रियादिनिलयान् कलयेन्निजांशैः ।
तत्रार्द्धखण्डिततनुं शशिनं निवेश्य
तच्छृङ्गयुग्मपरिलग्नगुणेन भूयः ॥ ७४ ॥

वाह्यस्थबिन्दुपरिवेष्टनकं विदध्या-
दित्थं निजापमपथाभिमुखः खगः स्यात् ।
प्राग्वृत्तकेन्द्रयमदिग्गतरेखिकाया
पश्चाद्भ्रमं प्रवहजं विषुवद्दिनोत्थम् ॥ ७५ ॥
व्यक्षोत्तरे वसुभुजानल३२८योजनस्थे
देशेऽवगच्छतु धनुःपथसम्मुखीनम् ।
तस्मान्न तस्य पलजे वलनेन जीवा
याम्यायनोत्थवलनेऽपि न कोटिजीवा ॥ ७६ ॥
मध्यसूत्रादुदग्दक्षिणान्तावधि
ज्यात्मकं मानमेवात्र निश्चीयते ।
मध्यसूत्रादतः क्रान्तिमार्गान्तरं
क्रान्तिजीवाक्षजीवा तु केन्द्राद्भवेत् ॥ ७७ ॥
स्फुरति धरणिभाया बिम्बवाह्ये समन्ता-
द्वलयसदृशमस्या अञ्चलं पञ्चलिप्तम् ।
तदवतमससंज्ञं तत्कुभा दिक्१०कलाढ्या
मलिनयति सितांशोरन्तमग्रस्तमूर्त्तेः ॥ ७८ ॥
अथ त्रिभागस्तमसोऽवपूर्व्वतः
कुभान्तलग्नोऽतिघनस्तमस्तया ।
मतस्तदाढ्या क्रियतां तमोमितिः
पुनर्विधोरन्तिकदूरहृक्तिजात् ॥ ७९ ॥
तमःक्षयर्द्धीक्षणतः क्रमेण तद्धनर्णगत्यादिफलाष्टदो२८र्लवैः ।
वियुक्तयुक्तस्तमसीति तत्स्फुटं भवेत्ततः स्पष्टतमः शशिग्रहः ॥ ८० ॥
विधोर्मानं तस्मात् शरगुण३५हतं विश्व१३विहृतं
पुनः सूर्य्यस्वर्णाभिधगतिफलार्द्धोनितयुतम् ।

तमोमानं तस्मादिति नयनसिद्धं शशिमिति
प्रभृत्युक्तं पूर्वं मतमिदमुपादेयमखिलात् ॥ ८१ ॥

कक्षायां शशिनस्तिरोहिततनोः स्याद्गोलकेन क्षिते-
र्भानोर्ग्राविदनीक्षणं भवति तन्माना कुभा यद्यपि ।
दृष्टेऽर्कस्य नखां२०शकेऽपि परितश्छायासमे वेक्ष्यते
मध्येन्दोः पथि दूरसन्निधिजुषोऽनल्पाल्पसूर्यांशयोः ॥ ८२ ॥

अत्रार्थे गणितक्रमः स्वदशभागो७२००-
नार्कबिम्बः६४८०० क्षिति-
व्यासो१६००नः६३२०० शशिमध्यकर्ण४८७०५गुणितः
३०७८१५६००० स्पष्टार्ककर्णोद्धृतः ।
लब्धोना क्षितिविस्तृतिः शशभृतः कक्षागतक्ष्माप्रभा-
मानं स्यात्त्रिगुणा३४३८हृतं स्फुटशशिश्रुत्याप्तमेतत्कलाः ॥८३॥

तमोबिम्बव्यासेऽम्बरकृत४०कलोने स्फुरति यो-
ऽन्तरे वृत्तः सारः स घनतर उक्तोऽन्धतमसम् ।
शरेऽल्पे तस्यान्तः प्रविशति यदा शीतकिरण-
स्तदातिम्लानः स्यान्निविडतमधूमावृत इव ॥ ८४ ॥

ग्रस्तेऽल्पीयसि भागके सितरुचो वर्णो नभःसाम्यभा-
गल्पे धूम्रनिभो दले कवलिते कृष्णोऽर्द्धभागाधिके ।
रक्तश्यामरुचिर्भवेच्च सकलग्रासक्षणे पाटलो
भूभामध्यगतस्य पिङ्गलरुचिर्भानोः सदैवासितः ॥ ८५ ॥

क्षुद्रक्षपाकरतनुः क्षयितार्द्धबिम्बो
भानुर्भवेन्निशितशृङ्गयुगोऽतिनिम्नः ।
चन्द्रोऽर्द्धखण्डिततनुस्तमसो महत्त्वा-
द्दोषप्रभीरु इव कुण्ठितशृङ्गयुग्मः ॥ ८६ ॥

अकृतकृतकराहुं यस्तमस्त्वात्कुभार्द्धं
विशति शशिनि तस्मिन्नागमैर्दीक्षितानाम् ।
वितरति मनुसिद्धिं यश्च सद्वैष्णवानां
स दिशतु कुशलं नः श्यामशैलावनीशः ॥ ८७ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
चन्द्रग्रहोऽष्टम इतः सुभगः प्रकाशः ॥ ८८ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
चन्द्रग्रहणवर्णनो नामाष्टमः प्रकाशः ।

नवमः प्रकाशः ।

सूर्य्यग्रहणवर्णनम् ।

पूर्व्वप्रकाश उदितं ग्रहणद्वयस्य
साधारणं सकलकर्म्म रविग्रहे तु ।
यल्लम्बनावनतिकर्म्म ततोऽवशिष्टं
मानान्तरञ्च शशिनस्तदिह प्रवक्ष्ये ॥ १ ॥
दर्शान्तगौ समकलौ क्षितिगर्भसूत्र-
स्यूतावपि द्युमणिचन्द्रमसौ न पश्येत् ।
यद्गोलपृष्ठगतमानव एकसूत्रे
खार्द्धान्यतोऽवनतिलम्बनसम्भवोऽस्मात् ॥ २ ॥
सूक्ष्मेन्दुसूर्य्यजनितस्फुटदर्शनांशो
यस्मिन् स काल उदितः समपर्व्वनामा ।

चेत्संस्कृतः स निजलम्बननाड़िकाद्यै-
र्भास्वद्ग्रहच्छदनमध्य इह स्फुटः स्यात् ॥ ३ ॥

एका नतिश्चन्द्रमसोऽपि सूर्य्यात् प्राक्पश्चिमस्थे त्विह लम्बनाख्या ।
याम्योत्तरस्थेऽवनतिः खमध्यस्थिते सितांशौ न हि ते भवेताम् ॥४॥
न लम्बनं वित्रिभलग्नतुल्ये भवेद्विधौ वित्रिभलग्नजाते ।
सौम्यापमे स्वाक्षसमानभागे न सम्भवेच्चावनतिर्हिमांशोः ॥ ५ ॥
त्रिभोनलग्नोदगपक्रमेऽक्षाधिके च सौम्यानतिरन्यथासौ ।
याम्या भवेत् पर्व्वणि चन्द्रभान्वोः साम्यान्नती ते रवितः सुसाध्ये॥ ६॥
तात्कालिकार्कात्समपर्व्वलग्नमानीय तस्मात्सदनत्रयोनात् ।
क्रान्तिं समानीय निजाक्षभागैस्तत्त्यागयोगौ पृथगेकदिक्के ॥ ७ ॥
कार्य्याविति स्युस्त्रिभहीनलग्ननतांशकास्ते नवतेर्विशोध्याः ।
शेषो भवत्युन्नतभागसंज्ञः क्रमज्यकास्यस्फुटदृग्गतिः स्यात् ॥ ८ ॥
विश्वम्भरागोलदलं रवीन्द्वोः कक्षागतं कल्पितमुक्तरीत्या ।
लिप्तीकृतं चेत्परमे नती स्तस्तदन्तरं चाल्पनतिर्ग्रहे स्यात् ॥ ९ ॥
यद्वार्कभुक्तेः शतभूप१६४भागः शक्रां१४शकश्चेशगतेर्नतिः स्वा ।
परा तयोरन्तरजा विलिप्ताश्चन्द्रार्कगत्यन्तरलिप्तिकाप्ताः ॥ १० ॥
नाड्यादिलब्धं स्फुटदृग्गतिघ्नं राशित्रयज्या३४३८विहृतं फलञ्च ।
अन्त्यं भवेल्लम्बननाड़िकाद्यं तत्प्राणतो ज्यापरसंज्ञका स्यात् ॥ ११ ॥

शताहता भूपभुजैर्१६विभक्ता
सा दृग्गतिर्लम्बनकृत्परो वा ।
त्रिभोनलग्नोष्णकरान्तरोत्था
दोर्ज्यापरघ्नी त्रिगुणो३४३८द्धृता च ॥ १२ ॥

स्याल्लम्बनज्याफलमस्य चापं प्राणात्मकं लम्बनमेतदर्कौ ।
त्रिभोनलग्नात् परपूर्व्वदिक्स्थे क्रमाद्युतोनं समपर्व्वकाले ॥ १३ ॥

तत्कालसम्भूतरवित्रिभोनलग्नोन्नतज्यापरमौर्व्विकाभिः ।
अर्कत्रिभोनान्तरतोऽपि भूयस्तल्लम्बनं पूर्व्ववदेव साध्यम् ॥ १४ ॥
तत्संस्कृतात् तत्समपर्व्वकालात् पुनर्नताद्यैरपि लम्बनञ्च ।
स्थिरेऽसकृत्कर्म्मवशादिहैतत् संस्कारयोग्यं स्फुटलम्बनं स्यात् ॥ १५ ॥
वक्ष्ये सकृल्लम्बनकर्म्म सूक्ष्मं लग्नार्कयोरन्तरतः प्रसाध्ये ।
दोःकोटिजीवे परबाहुजीवान्तरस्य वर्गाद्युतकोटिवर्गात् ॥ १६ ॥
पदं श्रुतिः कोटिगुणात्परघ्नाच्छ्रुत्या हृताद्यत्फलमस्य चापः ।
मध्यो भवेल्लम्बनजासुसङ्गस्तत्संस्कृतामान्तजदृग्गतिघ्नः ॥ १७ ॥
स आद्यया दृग्गतिजीवयाप्तो विस्पष्टतां गच्छति भास्करोक्तः ।
किन्त्वेष मध्यादधिको यदि स्यात्तदा स्वमध्यान्तरजासुवर्गात् ॥ १८ ॥
द्वाभ्यां हृतान्मध्यमलम्बनाशात्फलेन युक्तः करणीय एव ।
तल्लम्बनं भूय इनेन्दुमध्यगत्यन्तर७३१घ्नं प्रथमेन्दुभान्वोः ॥ १९ ॥
गत्यन्तरेणोद्धृतमेव कार्य्यं द्विधोदितं स्पष्टतमं भवेद्धि ।
परिष्कृतो लम्बननाड़िकाद्यैर्दर्शान्त एव स्फुटपर्व्वनामा ॥ २० ॥
षड्भै२७६र्हता लम्बनसिद्धकाललग्नस्फुटार्कान्तरकोटिजीवा ।
त्रिज्याहृता दृग्गतिताड़िताप्ता त्रिभज्यया लम्बनजा विनाड्यः ॥ २१ ॥
भवन्ति ताः प्राग्वदिनेन्दुमध्यगत्यन्तर७३१घ्नाः स्फुटजान्तराप्ताः ।
काले स्फुटे योगवियोगवाम्यात् परिष्कृतास्तत्समपर्व्वकालः ॥ २२ ॥
इत्थं प्रसाध्य ग्रहमध्यकालं चन्द्रग्रहे या स्थितिखण्डसिद्ध्यै ।
अन्त्या स्फुटा चन्द्रगतिः पुरोक्ता तया हतं लम्बननाड़िकाद्यम् ॥ २३ ॥
षष्ट्याप्तमेतत्फलहीनयुक् चेत्प्राक्पर्व्वजार्कः स्फुटशीतगुः स्यात् ।
पातो दिगंशाख्यफलेन भिन्नः कार्य्यस्तदूनात् शशिनः शरश्च ॥ २४ ॥
आनीय भानोः स्फुटपर्व्वलग्नं त्रिभोनलग्नं तदपक्रमौ च ।
उदक्शरोनो यमदिक्शराढ्यः स्वदेशजाक्षस्तु भवेत् शराक्षः ॥ २५ ॥

तद्वित्रिभाङ्गापमयोर्वियोगाद्योगात् विभिन्नैकदिशोः क्रमेण ।
साध्या नतज्यात्र तु सैव मध्या लग्नापमज्याप्युदयज्यकाख्या ॥२६॥
मध्योदयज्यागुणिता विलग्नद्युज्याहृता लब्धकृतिः समेता ।
मध्याकृतौ मूलमितौ यदासं दृक्क्षेप एष स्वनतानुसारात् ॥ २७ ॥
किं वा त्रिभोनां तनुमेव भानुं प्रकल्प्य तत्क्रान्तिचरद्युमानम् ।
संसाध्य लग्नार्कयुगान्तरोत्थकालस्य तद्वत्स्वदलस्य चान्तः ॥ २८ ॥
ये चासवस्तैर्नतोत्क्रमज्यासाध्यान्त्यका तद्रहितोन्नतज्या ।
छेदो नरो दृग्गुण एतदंशा नतास्त्रिभोनापम उत्तरोऽस्मात् ॥ २९ ॥
स्याच्चेद्वसुः सौम्यनतांशकास्तेऽन्यथैव याम्याः शरसंस्कृताः स्युः ।
दिक्साम्यभेदोत्थयुतिच्छिदाभ्यां तज्ज्यया च दृक्क्षेप इति द्विधैषः ॥३०॥
पृथक्स्थितस्य प्रथमेन्दुभुक्तिफलेन निघ्नः कलिकात्मना सः ।
त्रिज्याहृतः कर्क्कमृगादिमन्दकेन्द्रे स्फुटः स्यात्[illegible]युग्वियुक्तः ॥३१॥
द्विधोक्तयोरत्र कलाल्पमाने ग्रासेऽष्टचक्षुः२८ कलिकाधिके च ।
दृक्क्षेपयोः सूक्ष्मतया द्वितीयो ग्राह्योऽन्यथा स्थूलतयापि वाद्यः ॥३२॥

मध्यार्कचन्द्राख्यनतिद्वयस्य २०।२१।२८ां च ५६।२८।१२
दृक्क्षेपनिघ्नं विवरं५६ ६।२५ त्रिमौर्व्या३४३८ ।
हृतं नतिस्तत्स्वयमां२२५शहीन-
दृक्क्षेपभूतर्क६१लवः स्फुटा वा ॥ ३३ ॥

एकाशयोश्चन्द्रशरावनत्योर्योगः पुनर्भिन्नदिशोर्वियोगात् ।
शेषोऽधिकांशस्फुटदिक्शरः स्याद्ग्रासादिरिन्दुग्रहवद्विचिन्त्यः ॥ ३४ ॥
देशे क्वचित्सौम्यशरोऽधिकश्चेदक्षात्तदाक्षं प्रविशोध्य बाणात् ।
शेषः शराक्षो भवतीह सौम्यः सौम्येऽपमे वित्रिभजे ततोऽल्पे ॥३५॥
स्वाक्षाधिकेऽक्षं परिवर्ज्य तस्माच्छेषः शराक्षाख्य उदङ्नतः स्यात् ।
सौम्येऽपमे तत्र निजाक्षतोऽल्पे तदक्षलिप्ताविवराच्छराक्षः ॥ ३६ ॥

विशोधिते याम्यनतोऽवशेषः सौम्यः शराक्षाद्विवरे विशुद्धे ।
याम्येऽपमे वित्रिभलग्नजाते स्वाक्षान्विते सौम्यशरात्ततोऽल्पे ॥ ३७ ॥
शरात्ततः प्रोज्झ्य तदक्षयोगं लिप्तादिकः सौम्यनतोऽवशेषः ।
भागात्मकाक्षेषु विशेष एष देशेषु दृश्यो हि कुशाग्रधीभिः ॥ ३८ ॥
अतः शराक्षप्रतिसंस्कृतायाः क्रान्तेः सदा वित्रिभलग्नजायाः ।
नतांशयाम्योत्तरतानुसाराद्दृक्क्षेपमध्या नतयोऽखिलाः स्युः ॥३९॥
प्राग्वद्रवेर्मानमथेन्दुमानं साध्यं विधावस्ति कियान् विशेषः ।
सूक्ष्मं तमोमानमतः प्रवक्ष्ये दृक्सिद्धये यद्गदितं न पूर्व्वैः ॥ ४० ॥
कर्क्यादिनक्रादिककेन्द्रकोटिफलोनयुक्तत्रिगुण३४३८स्वघातात् ।
मूलेन तद्दोःफलवर्गयुक्ताद्द्विघ्नत्रिजीवा६८७६वियुतावशेषः ॥ ४१ ॥

यस्तेन भक्तात्त्रिगुणस्य वर्गात्
फलं हि लिप्तामयमन्दकर्णः ।
त्रिज्याघ्नमध्येन्दुकलात्मबिम्ब१०७७२४-
स्तत्कर्णभक्तः स्फुटमिन्दुमानम् ॥ ४२ ॥

आनीय शङ्कुं स्फुटपर्व्वकालसूर्य्यस्य दृग्ज्याञ्च परेन्दुनत्या५६।२८ ।
हीनस्य शङ्कोः कृतियुक्तदृग्ज्यावर्गात्पदं यत्तमसः स कर्णः ॥ ४३ ॥
स्फुटेन्दुमानं त्रिगुणघ्नमेतत्कर्णोद्धृतं स्यात्तमसः प्रमाणम् ।
यद्वेन्दुषष्ठ्यंशविनिघ्नशङ्कुत्रिज्याप्तयुक्तेन्दुमितिस्तमः स्यात् ॥ ४४ ॥
किं वा दिनस्योन्नतदण्डसङ्ख्या द्विघ्ना विलिप्तास्तमसि प्रदेयाः ।
स्पर्शे विमोक्षे त्विदमेव कर्म्म कार्य्यं हि शङ्कौ सुबहुप्रयासात् ॥ ४५ ॥
आद्येन्दुभुक्तेरथ षष्टिभागः शङ्क्वाहतो व्यासदलेन३४३८ भक्तः ।
फलेन चन्द्रान्त्यगतिः समेतार्कभुक्तिहीना ग्रहकालहारः ॥ ४६ ॥
यद्वाष्टमांशोनदिनोन्नताक्षनाडीसमाभिः कलिकाभिराढ्या ।
अन्त्येन्दुभुक्ती रविभुक्तिहीना हृतिर्मता स्पर्शविमोक्षकाले ॥ ४७ ॥

क्रियेयमिन्दुग्रहणेन तुल्या यदेककक्षास्थकुभेन्दुमानात् ।
ग्रासोनभिन्नोऽत्र तु भिन्नकक्षास्थिते रवीन्द्वोश्छदनस्य भेदः ॥ ४८ ॥
तस्मात्पुरः पश्चिमयाम्यसौम्यपरस्परात्यान्तरदेशकेषु ।
अत्यल्पसर्व्वग्रहणकक्ष्याभ्रमासाः सूक्ष्मसूक्ष्मतयैव साध्याः ॥ ४९ ॥
स्फुटेषु मानैक्यदलस्वकालहारैर्हिमांशुग्रहणक्रमेण ।
स्थित्यर्द्धमर्द्दार्द्धघटीपलानि सकृत्समानीय तदूनयुक्तात् ॥ ५० ॥
स्पर्शादिकालान् समपर्व्वकालात्संस्थाप्य तत्तत्समयोत्थलग्नैः ।
त्रिभोनलग्नात्परपूर्व्वदिक्कं नतं समालोच्य गतक्रमेण ॥ ५१ ॥
संसाध्य तत्तद्धरिजानि तैस्तैः संस्कृत्य तांस्तानथ तान्विधाय ।
तत्कालदृक्क्षेपनतीषुसिद्धैः स्थित्यर्द्धकालैः समपर्व्वकालात् ॥ ५२ ॥
परिष्कृतात्तद्धरिजैः पुनस्तान् स्पर्शादिकानित्यसकृत्क्रियाभिः ।
स्थिरं भवेत् स्पर्शविमोक्षमर्द्दनिमीलनोन्मीलनकालजालम् ॥ ५३ ॥
तत् स्पष्टपर्व्वान्तरनाड़िकाद्यं स्थित्यर्द्धमर्द्दार्द्धयुगं स्फुटं स्यात् ।
सकृत्कृतस्पर्शविमोक्षजेष्वोर्म्मध्येषुतः कालजमन्तरं यत् ॥ ५४ ॥
तस्यानुपातात् शरसिद्धिरस्याः स्थित्यर्द्धके वाप्यसकृद्विधेये ।
आद्यद्वितीयस्थितिखण्डसिद्धपर्व्वोद्भवलम्बनजान्तरस्य ॥ ५५ ॥
तथानुपातात्समयान्तरोत्थाद्भवेत्तृतीयादिकलम्बनाप्तिः ।
किंवाद्यसंस्कारभवाल्पभूरिस्थित्यर्द्धयोर्म्मध्यत एव यत्स्यात् ॥ ५६ ॥
पलान्तरं वर्गितमेतदाप्तं मध्यस्थिताद्वीत्थपलैः फलेन ।
युक्तं स्फुटं स्याद्यदि दण्डतोऽल्पं स्थित्यर्द्धमंशग्रफलाढ्यमेव ॥ ५७ ॥
साध्यं ततो लम्बनमेकवारं चेन्मध्यमेन स्थितिखण्डकेन ।
ऊने युते लम्बनभाजि दर्शे मानैक्यखण्डादधिकः शरः स्यात् ॥ ५८ ॥
समोऽपि वातेन तदाप्तबाणमध्यग्रहेष्वन्तरलिप्तिकाभिः ।
मध्यग्रहग्रासकलाघ्नमध्यस्थित्यर्द्धकालस्य दलं विभक्तम् ॥ ५९ ॥

फलं सकृत्कर्म्मत एव सिद्धं स्थित्यर्द्धकं मौक्षिकमादिमं वा ।
तत्संस्कृतात्पर्व्वण एकमेव स्याल्लम्बनं स्पष्टमतः शरश्च ॥ ६० ॥
तमोऽधिकं चेच्छदनप्रमाणं ग्रासस्तदा स्याद्वलयाभिधानः ।
तस्मिंस्तमीमानविहीनमानयोगार्द्धवर्गात् शरवर्गहीनात् ॥ ६१ ॥
मूलं पुरोवद्गुणहारहेतोः पलात्मकः स्याद्वलयार्द्धकालः ।
तदूनयुक्तात्समपर्व्वणस्तदारम्भनाशावपि लम्बनाभ्याम् ॥ ६२ ॥
मध्यात् शरात् स्पार्शिकमौक्षिकेष्वोर्यत्रैक ऊनोऽभ्यधिकस्तथैकः ।
वदामि तत्रापि पुनर्विशेषमसम्भवेऽपि ग्रहणं यतः स्यात् ॥ ६३ ॥
निष्पाद्य सूर्य्यग्रहमुक्तरीत्या स्पर्शान्तमध्यस्फुटसायका ये ।
ते स्वस्वलग्नापमसंयुतार्कक्रान्तिज्यया घ्नास्त्रिगुणेन भक्ताः ॥ ६४ ॥
संस्पर्शमोक्षाशुगतिर्दिगैक्ये तदन्तरं भिन्नदिशोस्तु योगः ।
शरान्तरं तद्गुणिताश्च लब्धाः षट्त्रिंशता३६प्ता इह यष्टिलिप्ताः ॥ ६५ ॥
ता एव मध्यग्रहणे स्फुटाः स्युः स्पर्शान्तजा वित्रिभलग्नभान्वोः ।
विश्लेषदोर्ज्यागुणितास्त्रिजीवाहतास्त्रिधा यष्टय एवमेताः ॥ ६६ ॥
परीकृतास्तद्ग्रहकालहृत्या भक्ताः पलैरेव फलैर्युतोनः ।
लग्नापमेष्वोः पृथगेकदिक्के क्रमात्त्रिधैवं समपर्व्वकालः ॥ ६७ ॥
स्पर्शादिके संस्कृतपर्व्वनाम्ना स्थाप्योऽथ मध्यो निजलम्बनेन ।
सुसंस्कृतः स्याद्ग्रहमध्यकालस्तात्कालिकस्पष्टदिगाशुगस्य ॥ ६८ ॥
वर्गात्पदं मध्यमयष्टिवर्गयुक्तात् स्वमध्यस्फुटदिक्शरः स्यात् ।
ग्रासस्ततः स्पष्टतमः स्वमध्यस्थित्यर्द्धकालं स्फुटकालहृत्या ॥ ६९ ॥

प्रसाध्यलग्नद्युगुणघ्नमेतं
त्रिज्याहृतं संस्कृतपर्व्वणोश्च ।
कृत्वान्तिमाद्योः स्वमृणं ततः स्तो
मोक्षाद्यकालौ निजलम्बनाभ्याम् ॥ ७० ॥

मानैक्यखण्डात् त्रिकलाधिकेऽपि मध्यग्रहस्पष्टशरे कदाचित्।
लग्नापमार्कापमभूरिभावात्सूर्य्यग्रहः स्यात् क्रिययानयैव ॥ ७१ ॥
मध्यः शरः स्पर्शजमोक्षजाभ्यामल्पः स ताभ्यामधिकश्च यत्र।
तुल्यो भवेद्वान्यतरेण तत्र नेयं क्रिया किन्तु पुरोदितैव ॥ ७२ ॥
दृग्गोचरं सद्ग्रहणद्वयं तद्ग्राह्यं न चादृश्यमिदं क्रियार्हम्।
अतो दिने चन्द्रमसो निशायां रवेस्तदिष्टं न हि सम्भवेऽपि ॥ ७३ ॥
दिने निशायां रविचन्द्रयोर्ग्रहद्वयस्य भागो यदि दृश्यतेऽल्पकः।
तदा विधिस्तावदशेषकालके निषेध उक्तो ग्रहणोचितः स्मृतौ॥७४॥
अभीष्टकालाद्ग्रसनं पिधानतो यथैव कालः कलितोऽयनाच्चजे।
यथोदिते तद्दलने पुरा तथा विधेयमत्राखिलकर्म्म निर्म्मलम् ॥७५॥

अन्त्याश्चन्द्रग्रहे स्युः समयविघटिकाः पूर्णगोऽर्था५९० विमर्द्दे
रामाद्र्यक्षीणि२७३ सूर्य्यग्रहणसमयजाः पञ्चरामर्त्तवो६३२ऽन्त्याः।
ग्रासे स्युः कङ्कणाख्ये द्विरदजलधय४८स्तद्विमर्द्देऽग्निपक्षा२३
वृद्धौ ताः सूक्ष्मतिथ्याः शरगगनकृता४०५-
स्तत्क्षयेऽर्थाङ्कबाणाः५९५ ॥ ७६ ॥

सिद्धाः सूक्ष्मर्क्षवृद्धौ शररसनिगमा४६५स्तत्क्षयेऽष्टाङ्गवेदा४६८
योगर्द्धौ पञ्चभूपा १६२ क्षय उदधिरसाङ्गानि६६४ चन्द्रस्य भुक्तेः।
सूक्ष्मं स्वर्णं फलं दृक्कृतनगमुनयो७७४२ भाङ्कवेदा४९२७ विलिप्ता
भानोस्त्र्यर्का१२२ नगेशाः११७ परमविघटिका
लम्बनेऽर्काग्नयः३१२ स्युः ॥ ७७ ॥

स्वर्भानुं शुभ्रभानुं विदधदथ उपर्य्युद्भ्रमंश्चानुमद्भा-
भूतैर्नव्याभ्रभित्तिभ्रमकरमकरोद्भूमिभागेऽर्भकाणाम्।
भूभृद्भूभानुभूतप्रभुभवतनुभूभावुकां भूतिभाजं
भूतालिं यो विधत्ते भवतु भवभयोद्भेदभिन्नो विभुः सः ॥ ७८ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
सूर्य्यग्रहो नवमको व्यगमत्प्रकाशः ॥ ७९ ॥

इति श्रीचन्द्रशेखरसिंहकृते सिद्धान्तदर्पणे चिंम्शाधिकारे
सूर्य्यग्रहणवर्णनो नाम नवमः प्रकाशः ।

दशमः प्रकाशः ॥

परिलेखवर्णनम् ।

स्पर्शस्य मोक्षस्य च मध्यमस्य काष्ठावगत्यै परिलेखसंज्ञम् ।
वदाम्यथ च्छेदकमर्कचन्द्रग्रहद्वयं येन भवेत्समक्षम् ॥ १ ॥
दृशोर्बलं तिर्य्यगधःस्थिते स्याद्द्रव्ये यथा नैव तथोर्द्ध्वसंस्थे ।
सर्व्वत्र तच्चन्द्ररवीषुमानसाम्येऽपि मध्येगगनं तनुत्वम् ॥ २ ॥
विलोक्यते च क्षितिजे महत्त्वं प्राक्सूरिभिस्तत्क्रमतोऽङ्गुलानि ।
सिद्धानि तत्तत्कलिकाच्छिदाभिस्तन्मानसाक्षात्करणाय कल्प्ये ॥ ३ ॥

विधो रवेश्चोन्नतकालशङ्कु-
रिन्द्राग्निदिग्१०३१४युक् त्रिगुणेन३४३८ भक्तः ।
छेदः कलानाममुना हृतानां
फलानि बिम्बेषु मिताङ्गुलानि ॥ ४ ॥

त्रिघ्नं दिनार्द्धं निजमुन्नताढ्यं दिनार्द्धभक्तं भवति च्छिदा वा ।
किंवा तमः सूर्य्यशरेन्दुलिप्तास्त्र्या३प्ता सदा स्युश्च तदङ्गुलानि ॥ ५ ॥
सुसाधितायां भुवि बिन्दुमेकं दत्त्वा ततः कर्कटकेन लेख्यम् ।
सत्र्यंशसप्तार्थ५७।१८मिताङ्गुलेन वृत्तं खसंज्ञं वलनाङ्कितं तत् ॥ ६ ॥

मानैक्यखण्डप्रमितेन मध्ये स्पर्शाय मोक्षाय च वृत्तमन्यत् ।
लेख्यं समासाख्यमिदं तदन्तर्ग्राह्यार्द्धमानेन तदीयविम्बम् ॥ ७ ॥
प्राग्वद्दिशां साधनमत्र कृत्वा दिक्चिह्नवत्कार्य्यमिदं खवृत्तम् ।
प्राक्प्रत्यगक्षवलनं निधेयं तत्रांशसङ्ख्याङ्गुलकान्तरेण ॥ ८ ॥
स्पर्शे विधोर्[illegible]संज्ञं न्यस्यं स्वदिश्येव रवेश्च मोक्षे ।
मोक्षे विधोः स्पर्श इनस्य तद्वद्व्यस्तं ततः सूत्रमपि प्रसार्य्यम् ॥ ९ ॥

ग्रामध्यविन्दुश्च समासवृत्त
मध्येऽपि दिक्सूत्रमितीदमिष्टम् ।
तद्याम्यसौम्याख्यदिशोः प्रसार्य्यः
सूत्रात्तथा ज्याक्रमतः कलम्बः ॥ १० ॥

यथा निजाग्रस्य समासवृत्ते स्पर्शौ भवेत्तद्वलनानुसारात् ।
शरः शलाकात्मक एष देयः शीतद्युतेः स्पर्शनिमीलयोः प्राक् ॥ ११ ॥
पश्चात्तदुन्मीलनमोक्षयोश्च तद्युग्मयोस्तिग्मरुचेर्विलोमः ।
शराग्रतो मध्यमविन्दुगामि सूत्रं स्पृशेद्ग्राह्यतनुञ्च यत्र ॥ १२ ॥
स्पर्शश्च मोक्षश्च भवेदिहैव शरस्तु तत्कालभवः सदेष्टः ।
तात्कालिकं स्वाद्वलनं तथैव तस्यानुसारेण शरः प्रसार्य्यः ॥ १३ ॥
स सौम्ययाम्यायतसिञ्जिनीवत्तथापि कोणाभिमुखः क्वचित्स्यात् ।
वदामि मध्यग्रहयोर्विशेषं राहोश्च केतोः सविधस्य इन्दौ ॥ १४ ॥
पञ्चाङ्गुलान्ते वलनाग्रतोऽन्यत् क्रमादुदग्दक्षिणयोर्निधेयम् ।
विस्पष्टमेतद्वलनं खवृत्ते प्राच्यां स्वदिक्स्थं विनिवेश्य तस्मात् ॥ १५ ॥
प्रसार्य्य रेखां किल मध्यविन्दुस्पृशं पराशान्तगतां सितांशोः ।
ग्रहान्तरैक्यस्य तु याम्यसौम्यलम्बापमांशाङ्गुलकान्तरस्थम् ॥ १६ ॥
विन्दुं पुरःस्थाद्वलनाद्वितीर्य्य रेखां ततो व्यासमितां प्रसार्य्य ।
तत्पार्श्वगां मण्डलमध्यविन्दोर्विन्यस्य याम्योदगिषुं तदग्रात् ॥ १७ ॥

तद्ग्राहकार्द्धप्रमितेन विम्ब: सूत्रेण लेख्यस्तम इत्यभिज्ञैः ।
ग्राह्यं तदाच्छादितमत्र यावत्तावान् ग्रहो दृश्यत इन्दुभास्वोः ॥१८॥
विन्दुत्रयं स्पर्शविमोक्षमध्यस्फुटाशुमाग्रेषु निधाय तस्मात् ।
आद्यन्तविन्द्वन्तरवह्निशभागसूत्रेण वृत्तत्रितयञ्च कार्य्यम् ॥ १९ ॥
तदन्तरा यत् पृथुरोमयुग्ममुत्पद्यते तन्मुखपुच्छलग्नम् ।
सूत्रद्वयं दक्षिण उत्तरे वा भागेऽल्पमानान्तरके प्रसार्य्य ॥ २० ॥
तदग्रयोर्यत्र युतिस्ततोऽन्यसूत्रेण बिन्दुत्रितयस्पृशैव ।
लेख्यं धनुर्ग्राहकमार्ग एष प्रागन्त्यबिन्दुद्वितयान्तरा स्यात् ॥ २१ ॥
प्राङ्मार्गतो ग्राहकखण्डतुल्यं दिङ्मध्यबिन्दूपरिगामिसूत्रम् ।
प्रसारितङ्ग्राह्यतनोरुपान्ते यत्र स्पृशेत्तत्र निमीलनं स्यात् ॥ २२ ॥

उन्मीलनं मौक्षिकमार्गसूत्रा-
त्तथा भवेदिष्टघटीषु लक्ष्यः ।
ग्रहो यदि स्यात्तदिह त्रिबिन्दु-
मार्गो द्विधा मध्यमबिन्दुतः स्यात् ॥ २३ ॥

तदङ्गुले स्पार्शिकमौक्षिकाख्ये यातैष्यदिच्छाघटिकादिनिघ्ने ।
स्थित्यर्द्धकालेन निजेन भक्ते फलाङ्गुलान्ते पथि बिन्दुमेकम् ॥२४॥
दत्त्वा ततश्छादकखण्डतुल्यसूत्रेण वृत्तं विरचय्य तेन ।
संच्छादितं ग्राह्यमभीष्टकाले दृश्यं स्वकालाङ्गुलकानुपातात्॥२५॥
सद्रष्टुमिष्टग्रसनस्वरूपं मानैक्यखण्डाङ्गुलतो विशोध्य ।
ग्रासाङ्गुलं स्वेष्टमितोऽवशिष्टाङ्गुलप्रमाणा सरला शलाका ॥ २६ ॥
ग्राह्यार्द्धतो मार्गमुखी प्रसार्य्या स्पर्शे विमोक्षे स्वदिशि क्रमेण ।
यत्र स्पृशेद्ग्राहकमार्गमेषा लेख्यं ततो ग्राहकबिम्बमानम् ॥ २७ ॥
ग्राह्यं भवेच्छन्नमनेन यावत्तावान् ग्रहो दृक्समतामुपैति ।
मानान्तरार्द्धेन मितां शलाकां प्रसार्य्य संस्पर्शदिशीन्दुकेन्द्रात्॥२८॥

यत्र स्पर्शोन्मार्गमियं ततोऽपि लेख्यं तमस्तत् सितभान्तयोगः ।
निमीलनस्थानमिनस्य च स्यादुन्मीलनं मोक्षपथोत्थवृत्तात् ॥ २९ ॥
मध्यग्रहे स्पष्टतमेऽथवा या केन्द्रस्पृगुक्ता वलनोत्थरेखा ।
तत्पार्श्वगां मध्यशराग्रतोऽन्यां तावन्मितां न्यस्य तदग्रयुग्मात् ॥ ३० ॥
तत्पार्श्वसिद्धोदगवाक्प्रदेशे स्वाक्षज्यकाषष्टिलवाङ्गुलान्ते ।
सुधांशुसूर्य्यग्रहयोः क्रमेण विन्दुद्वयं मध्यशराग्रके च ॥ ३१ ॥
दत्त्वात्यमेतत्त्रयभेदिचापं विलिख्य तस्मिन्निहितस्वमध्यम् ।
तमःशलाकावलयादिक्लृप्तं चन्द्रग्रहे पूर्व्वदिशः प्रचाल्य ॥ ३२ ॥
सूर्य्यग्रहे पश्चिमदिक्प्रदेशात् स्पर्शादयो ग्राह्यदिशासु दृश्याः ।
नान्वेष्यते स्पार्शिकमौक्षिकेषुर्न वा तदीये वलने प्रयासः ॥ ३३ ॥

किन्त्वत्र सूर्य्यग्रहणे गुणाऽष्ट-
लिप्ताङ्गुला ये तम आशुगार्काः ।
ते द्विःस्थिताः शङ्कुहताः खखाब्धि-
वेदो४४००द्धृता लम्बयुता विधेयाः ॥ ३४ ॥

अथेष्टकाले फलके ग्रहौ तौ प्राक्पश्चिमव्यत्ययतो विलिख्य ।
वेलाक्रमाद्वाम्मुखमुक्तमध्य प्रदर्शनीयौ नभसीव साक्षात् ॥ ३५ ॥

यद्ग्राहरुग्ग्रहणपान् सदसत्फलाय
वर्णान् वराहमिहिरो निजसंहितायाम् ।
पर्व्वाण्यकालभवमाहुरदोऽद्भुतं यत्
प्राञ्चो मयोज्झि तदिहानुपयोगिभावात् ॥ ३६ ॥

हसन्तमतिसुन्दराधरसुवृत्तनेत्रश्रिया
वसन्तशिशुचण्डरुक्शरदखण्डपाण्डुद्युती ।
वसन्तमसिताचले विविधदेशलोकाकुले
दिशन्तमभयं विभुं भुवनमङ्गलाक्षं भजे ॥ ३७ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽद्विसिद्धे।
सिद्धान्तदर्पण उपाहितबालबोधे
सच्छेदको निरगमद्दशमः प्रकाशः ॥ ३८ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे परिलेखवर्णनो नाम दशमः प्रकाशः।

एकादशः प्रकाशः।

ग्रहयुतिवर्णनम्।

स्वस्वकक्षासु चरतां खेचराणां दवीयसाम्।
लोकैर्दृश्या युतिर्युद्धमुच्यते सदसत्फलात् ॥ १ ॥
सू - ताराग्रहाणामन्योऽन्यं स्यातां युद्धसमागमौ।
समागमः शशाङ्केन सूर्य्येणास्तमयः सह। इति ॥ २ ॥
ग्रहौ समकलौ कृत्वा ध्रुवसूत्रसमौ ततः।
स्वदेशे याम्यसौम्यस्थौ विम्बाद्यं साधयेत्ततः ॥ ३ ॥
सू शीघ्रे मन्दाधिकेऽतीतः संयोगो भविताऽन्यथा।
द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्ययात्। इति ॥ ४ ॥
अवक्रादधिके वक्रिण्येष्योऽवक्रेऽधिके गतः।
मन्दशीघ्रगयोस्तद्वद् वक्रसंस्थे गतैष्यता ॥ ५ ॥
सू—ग्रहान्तरकलाः स्वस्वभुक्तिलिप्ता समाहताः।
भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः ॥ ६ ॥
द्वयोर्वक्रिण्यथैकस्मिन् भुक्तियोगेन ता भजेत्।
लब्धं लिप्तादिकं शीघ्यं गते देयं भविष्यति ॥ ७ ॥

विपर्य्ययाद्वक्रगत्योरेकस्मिंस्तु धनक्षयौ ।
समलिप्तौ भवेतां तौ ग्रहौ भगणसंश्रितौ ॥ ८ ॥
विवरं तद्वदुद्धृत्य दिनादिफलमिष्यते । इति ।
गतगम्यं ततः प्राग्वत् स्यातां समकलौ स्थिरौ ॥ ९ ॥
सू—कुजार्किगुरुपातानां ग्रहवच्छीघ्रजं फलम् ।
वामं तृतीयजं मान्द्यं बुधभार्गवपातयोः ॥ १० ॥
स्वपातोनाद्ग्रहाज्जीवा शीघ्राद्भृगुजसौम्ययोः । इति ।
मध्येषुघ्नान्त्यकर्णाप्ता विक्षेपाः स्युः स्फुटाः स्वकाः ॥ ११ ॥
स्थूलोऽयं शरसंस्कारः सिद्धान्तोक्तैरलेखि यः ।
मयोच्यन्ते कुजादीनां दृक्सिद्धैर सूक्ष्मसायकाः ॥ १२ ॥
मध्यार्कस्थानतो मन्दस्फुटानां द्युषदां यतः ।
विक्षेपाः स्युः स्फुटा भूमिगोलतः शीतगोरिव ॥ १३ ॥
तन्मध्याः कुजमन्देज्याः शीघ्राः स्वस्फुटमन्दतः ।
ततोऽखिलैर्मान्द्यफलैः प्राग्वत्कार्य्या युतोनिताः ॥ १४ ॥
बुधस्य स्फुटशीघ्रोनस्फुटमन्दात्परोच्चजम् ।
फलं स्वोनयुतेन स्फुटद्राक्शरशीघ्रकः ॥ १५ ॥
स्यात्सितस्य य[illegible] शरशीघ्रचलोच्चकः ।
शरशीघ्राविम[illegible]स्पष्टास्त्रयश्च ते ॥ १६ ॥
स्वपातैः शोधि[illegible]तोनग्रहसंज्ञकाः ।
तस्माद्धुः शरसि[illegible] प्रागुक्ता सौम्ययाम्यता ॥ १७ ॥
कान्तात्मकौ मन्दकर्णः साध्यः प्राग्वत्तृतीयकः ।
तत्त्रिज्यान्तरमभ्यस्तं त्रिभज्या तुर्य्यकर्णयोः ॥ १८ ॥
विवरेण त्रिजीवाप्तं क्षेपकर्णान्तरं भवेत् ।
त्रिज्याधिकेऽन्त्यश्रवणे यदि त्रिगुणतो२४३८ऽधिकः ॥ १९ ॥

मन्दकर्णस्तदा त्रिज्या क्षेपकर्णान्तरोनिता ।
यद्यल्पस्त्रिगुणान्मन्दकर्णस्तत्त्रिभमौर्विका ॥ २० ॥
क्षेपकर्णान्तराढ्या स्यात्कर्मयोग्या शरश्रुतिः ।
त्रिज्याल्पे तुर्यकर्णे तु मन्दकर्णो यदाधिकः ॥ २१ ॥
त्रिगुणात्तत्कुजेज्यार्किक्षेपकर्णान्तरान्विता ।
त्रिज्याथ ज्ञसितक्षेपकर्णान्तरसमन्विता ॥ २२ ॥
मन्दश्रुतिरथोनश्चेत्त्रिज्यातो मन्दकर्णकः ।
तदा कुजेज्यशौरीणां क्षेपकर्णान्तरोज्झिता ॥ २३ ॥
त्रिज्या ज्ञदैत्यगुर्वोस्तु तत्कर्णान्तरवर्जिता ।
मृदुश्रुतिर्भवेत्कर्मयोग्या सैव शरश्रुतिः ॥ २४ ॥
प्राग्वत्पातोनखेटज्या मध्यविक्षेपताडिता ।
शरश्रुतिहृता लब्धं त्रिज्याघ्नान्त्यश्रवो हृतम् ॥ २५ ॥
भौमादिस्फुटविक्षेपः स्यात्सूक्ष्मः कलिकात्मकः ।
भौमज्ञान्यग्रहाणां वा स्थूलो ग्राह्योऽल्पभेदतः ॥ २६ ॥
चलांशसंस्कृतानां या ग्रहाणां स त्रिविक्षनाम् ।
क्रान्तिज्या सा स्फुटेषुघ्नी तद्युज्याप्तासमलिप्तिकाः ॥ २७ ॥
धनर्णाख्यास्तदाक्रोनाः क्रमादय[illegible]ः ।
दिग्भेदसाम्ययोस्ते स्युर्ध्रुवसूच[illegible] ॥ २८ ॥
इदमायनदृक्कर्म तत्परिष्कृत[illegible]
अन्तरेण पुनः कार्यौ प्राग्वत्[illegible]ः ॥ २९ ॥
ततो गतैष्यदिवसाः साध्यास्तत्का[illegible]
अकृतायनदृक्कृत्योर्विक्षेपायनदृक्क्रिये ॥ ३[illegible]
कृत्वाऽसकृत्समकलौ स्यातां तौ ध्रुवसूचकौ ।
ततो धनर्णकलिकावर्गयुक्तेषु वर्गतः ॥ ३१ ॥

पदं स्यात्सूक्ष्मविक्षेपः क्रान्तिस्तत्संस्कृता स्फुटा ।
मध्यैव सर्व्वदा भानोरपमण्डलगस्य सा ॥ २२ ॥
स्फुटक्रान्तेश्चरं स्वं स्वं दिनार्द्धं चोन्नतं नतम् ।
कालमानीय खगयोर्ज्ञेयात् खखवेदेषुभिः५४०० ॥ २३ ॥
दिनार्द्धेन भजेल्लब्धकलानां ज्ये नतोन्नते ।
स्यातां मध्यस्फुटक्रान्तिसिद्धयोर्यच्चरार्द्धयोः ॥ २४ ॥
आपात्मकं स्याद्विवरं तत्कलाघ्नी नतज्यका ।
त्रिज्याप्ता फललिप्ताभिर्दिनपूर्व्वपरार्द्धयोः ॥ २५ ॥
सौम्ये देशे हीनयुतौ क्रमाद्याम्ये युतोनितौ ।
कार्य्यौ ग्रहौ तद्विवरात् कालं यातैष्यसंज्ञकम् ॥ २६ ॥
ज्ञात्वास्मादाक्षदृक्कर्म्म पौनःपुन्यादिति स्थिरौ ।
कृत्वा पश्येन्निजे देशे याम्यसौम्यान्तरं तयोः ॥ २७ ॥
कुजादीनां बिम्बमानं वृत्ताख्यं भास्वरञ्च तत् ।
मध्यं स्फुटमिति द्वेधा दृग्बिम्बमिति पञ्चधा ॥ २८ ॥
तेजोमयः सूर्य्यबिम्बस्तत्प्रभाग्रहणाद्ग्रहाः ।
चन्द्राद्यो जलमया दृश्यन्ते विविधा जनैः ॥ २९ ॥
ताराग्रहा विद्रुम[illegible]स्वाद्विधोरपि ।
चन्द्रवच्छुक्लिमा नाम लक्ष्यन्ते लोकलोचनैः ॥ ४० ॥
खार्थवेदा४५०(म) खरामाङ्काः९३०(बु)
पूर्णार्थगिरिसिन्धवः४७५०(बृ) ।
खाभ्रषड्बाहवः२६००(शु) खाभ्रे-
ष्वश्विनौ२५००(श) योजनात्मकाः ॥ ४१ ॥
बिम्बव्यासाः कुजादीनां त्रिज्याकृति२११२विभाजिताः ।
फलं कलादि तन्मानं रविकक्षागतं भवेत् ॥ ४२ ॥

ज्ञशुक्रयोः स एव स्यान्मध्यव्यासोऽपरस्य तु ।
त्रयस्य शीघ्रपरिधिक्षुण्णं तद्भांश३६०भाजितम् ॥ ४३ ॥
वृत्तविम्बं भवेन्मध्यं तद्विलिप्ताः कुजादितः ।
नागाब्धस्तत्त्वानि२५ तत्त्वानि२५ पूर्णशैला७० दिशः१० क्रमात्॥४४॥
भौमेज्यार्किभुवां विम्बा द्विष्ठास्तुर्य्यफलस्य या ।
उत्क्रमज्या तया क्षुण्णा द्विगुणत्रिज्ययो६८७६द्धृताः ॥ ४५ ॥
तत्फलैरुज्झिताः कार्य्या बुधभार्गवयोस्तु तौ ।
द्राक्केन्द्रे मकरादिस्थे लिप्ताः शीघ्रफलोत्थिताः ॥ ४६ ॥
कोटीलिप्ताश्च संयोज्य तज्जराया त्रिज्ययाख्यया ।
पुनः कर्क्यादितत्केन्द्रे द्राक्फलाख्यत्रिराशितः ॥ ४७ ॥
कोटीराश्यादयः शोध्याः शेषाद्दोर्ज्या च या तया ।
विम्बौ सङ्गुणितौ द्विघ्नत्रिज्याप्ताविति पञ्च ते ॥ ४८ ॥
भवन्ति भास्वरा मध्यास्त्रिभाधिककलावलेः ।
क्रमज्या त्रिज्यया युक्ता शुक्रस्य गुणको भवेत् ॥ ४९ ॥
मध्यास्ते द्विविधा विम्बास्त्रिज्याघ्ना वृत्तभास्वराः ।
मन्दश्रुत्या हृतास्त्रिज्याक्षुण्णा द्राक्कर्णभाजिताः ॥ ५० ॥
स्फुटा भवन्ति यौ स्पष्टवृत्तविम्बौ सितज्ञयोः ।
तौ चक्रार्द्धे शराल्पत्वे दृश्यौ भास्वति मर्त्तवत् ॥ ५१ ॥
स्फुटभास्वरविम्बानां दृग्विम्बत्वमथोच्यते ।
दूरस्थदीपा इव ते स्थूला भान्ति यदोच्चिताः ॥ ५२ ॥
दूरे पथः स्थितिमतां स्वव्यासतिथिदृग्२१५गुणात् ।
ज्योतिषां स्थूलता लोकैर्दृश्यते क्रमवर्द्धितः ॥ ५३ ॥
तद्विम्बनृप१६घातस्य कलादेः पदमेव यत् ।
ताराग्रहाणां दृग्विम्बं स्वं स्वं तद्भवति स्फुटम् ॥ ५४ ॥

भानां स्वतो भास्वरत्वात् समदूरस्थितेः क्षितेः ।
साम्यं सदैव किन्त्वेषां कार्य्या दृग्विम्बशालिता ॥ ५५ ॥
युद्धभेदानथो वक्ष्ये ग्रहयोः समलिप्तयोः ।
दृग्विम्बान्तद्वयस्पर्शे युद्धमुल्लेखनामकम् ॥ ५६ ॥
विम्बवेधे च भेदाख्यं मानयोगाल्पकेऽन्तरे ।
तत्स्यादंशुविमर्दाख्यमपसव्यं ततोऽधिके ॥ ५७ ॥
अंशावधि भवत्येव भागाधिक्ये समागमः ।
सम्भवे त्वपसव्यस्य यद्येको दीप्तिमान् ग्रहः ॥ ५८ ॥
अन्यो विवर्णस्तद्युद्धं दीप्तौ द्वौ चेत्समागमः ।
तत्र द्वौ चेद्रश्मिहीनौ कूटयुद्धं तदुच्यते ॥ ५९ ॥
स्थूलविम्बो जयी खेटस्तुल्ययोरुत्तरस्थितः ।
जितोऽणुः समयोर्याम्यः सर्व्वदा सर्व्वजिद्भृगुः ॥ ६० ॥
सौम्ययाम्यस्थितीचार्यै प्रोक्ते दृक्कर्म्मणी परम् ।
सलम्बननतिस्पष्टखेटतः स्यात्तु तद्युतिः ॥ ६१ ॥
गण्यतेऽक्षांशभेदोऽपि भौमादीनां बुधैर्न यत् ।
प्रायस्तत्रोदिते तेषामत्यल्पे नतिलम्बने ॥ ६२ ॥
तथापि गणितज्ञानस्यावश्यकतया मया ।
परिकल्प्य निगद्येते सद्धियां परितुष्टये ॥ ६३ ॥
परमा नतिरर्कस्य द्वाविंशतिविलिप्तिका ।
सैव ज्ञशुक्रयोर्मध्या त्रिज्याघ्नी द्राक्श्रवो हृता ॥ ६४ ॥
पुनस्तत्कालदृक्क्षेपगुणिता त्रिज्ययोद्धृता ।
स्फुटावनतिरन्येषां त्रयाणां सापरार्कजा ॥ ६५ ॥
नतिः स्वद्राक्परिधिभिर्गुणिता भांश३६०भाजिता ।
त्रिज्याघ्नी तुर्य्यकर्णाप्ता पुनर्दृक्क्षेपताडिता ॥ ६६ ॥

ग्रहे वक्रिणि मध्येन्दुतद्गत्योर्योगभाजिता ।
लब्धं नाड्यादितत्कालदृग्गतिघ्नं विभज्यया ॥ ७९ ॥
भक्तं तत्प्राणतो जीवा परः स्वार्केन्दुलग्नयोः ।
अन्तराद्भुजकोटिज्ये साध्ये दोर्ज्यापरान्तरात् ॥ ८० ॥
वर्गात् कोटीवर्गयुताच्छ्रुतिर्मूलं पराहता ।
कोटीः श्रुतिहृता लब्धधनुः प्राणा हि मध्यमाः ॥ ८१ ॥
[illegible]ग्रहयोर्मध्यगत्यन्तरहृता हृताः ।*
स्फुटगत्यन्तरेणाप्त गतियुत्यानृजौ पुनः ॥ ८२ ॥
त्रिभोनलग्नप्राक्प्रत्यक्स्थिते चन्द्रे स्वकालतः ।
ऊना युतास्तु तत्कालदृग्गतिघ्नास्त आद्यया ॥ ८३ ॥
दृग्गत्याप्ताः स्फुटा ह्येतैः संस्कृतः समलिप्तयोः ।
चन्द्रान्यग्रहयोः कालो युतिमध्ये स्फुटो भवेत् ॥ ८४ ॥
तत्कालवित्रिभतनोर्दृक्क्षेपः प्राग्वदागतः ।
रविघ्नशर५१३भागाढ्यः क्ष्माङ्गा६१प्तोऽवनतिर्विधोः ॥ ८५ ॥
त्रिभयोनलग्नस्य याम्यसौम्यनतक्रमात् ।
शरात्तानुद्धृतैः सिद्धा या नतिस्तत्परिष्कृतौ ॥ ८६ ॥
चन्द्रस्य च कुजादेश्च शरौ चेदेकदिग्भवौ ।
तदा तद्वियुतिः शेषो दिक्शरश्चन्द्रतो ग्रहे ॥ ८७ ॥
याम्यसौम्यस्थिते याम्यसौम्यास्यश्छेदकाय सः ।
तौ चेद्भिन्नदिशौ तत्संयोगाद्दिक्शरः स्फुटः ॥ ८८ ॥
ताराग्रहाणां सर्वेषामधस्थश्छादको विधुः ।
प्रवेशस्तत्पुरस्तेषां प्रायः पश्चाद्धि निर्गमः ॥ ८९ ॥

---

* अत्र स्फुटगतिपक्षेन चन्द्रमध्यमगतिर्ग्राह्यते, सूर्यग्रहणे तथोक्तेः ।

कृत्वैवायनदृक्कर्म्मग्रहाणां नतिसंस्कृतैः ।
विशिखैर्भयुतिः साध्या तद्ध्रुवेष्वनुसारतः ॥ ९० ॥
खवृत्तान्तः समासाख्यं वृत्तं संलिख्य पूर्व्ववत् ।
तन्मध्येऽत्र विधोर्विम्बं खवृत्ते वलनं तथा ॥ ९१ ॥
स्पर्शे स्वदिशि मोक्षेऽन्यदिशि न्यस्य ततो गुणः ।
आचन्द्रमध्यं प्रसृतो दिक्सूत्रमिति सम्मतः ॥ ९२ ॥
तत्पार्श्वयोः स्वदिग्बाणः प्रसार्य्यः स्वेष्टकालिकः ।
समासेऽग्रयुतिर्यत्र ततः शीतांशुमध्यगम् ॥ ९३ ॥
सूत्रं यत्र स्पृशेन्नेमिं तस्यात्र स्पर्शनिर्गमौ ।
ज्ञेयौ ग्रहाणां भानाञ्च गोलवेदिभिरभ्रमात् ॥ ९४ ॥
नक्षत्रचन्द्रयोर्युत्यां दृग्गतिः शतताड़िता ।
धरित्रीत्रिभुजै२३१र्भक्ता लम्बनाय परो भवेत् ॥ ९५ ॥
एवं ज्ञशुक्रयोर्भानौ प्रवेशापगमक्रमः ।
स्वशरो दिक्शरस्तत्र च्छेदके मध्यगो रविः ॥ ९६ ॥
ताराग्रहाणां किरणैः शङ्कुच्छाया यदस्फुटा ।
छायाग्रस्थे तदादर्शे दृश्यास्ते शङ्कुमूर्द्धगाः ॥ ९७ ॥
समभूमौ प्रतिष्ठाप्य पञ्चहस्तोच्छ्रितं नरम् ।
दृढं सममृजुं वृत्तं द्वादशांशाङ्गुलान्वितम् ॥ ९८ ॥
इष्टकालिकखेटस्य नतकालान्निजां प्रभाम् ।
शङ्कोरानीय तन्मानसूत्रेण परितो लिखेत् ॥ ९९ ॥
तन्मूलाद्वृत्तमत्र प्राक्परयोर्याम्यसौम्ययोः ।
विलिखेत्केन्द्रसंस्पर्शि सरलं रेखिकाद्वयम् ॥ १०० ॥
ग्रहस्यर्क्षस्य वा स्पष्टक्रान्तिज्याभाश्रवोद्धृता ।
लम्बज्याघ्ना भवेदग्रा स्वेष्टकालेऽङ्गुलात्मिका ॥ १०१ ॥

दक्षिणोत्तरयोः काष्ठयोस्तद्युतोना पलप्रभा ।
वियोगाच्छेषदिक्संस्था स्याद्भुजाङ्गुलसंज्ञका ॥ १०२ ॥
दक्षिणोत्तररेखायां शलाकां भुजसम्मिताम् ।
केन्द्रात्प्रसार्य दिग्भेदादग्रे बिन्दुं निधाय च ॥ १०३ ॥
भुजवर्गोनभावर्गात्तलशङ्कुर्भवेत्पदम् ।
सा कोटी प्राक्कपालस्थे खगे बिन्दोः परां दिशम् ॥ १०४ ॥
प्रत्यक्स्थे प्रतिपूर्व्वाशां प्रसार्य्या यत्र सा स्पृशेत् ।
वृत्तं तत्र प्रभाग्रं स्यात्ततः शङ्कुशिखावधि ॥ १०५ ॥
नलकं कर्णमार्गस्थं न्यस्यास्य शुषिरेण सः ।
भाग्रस्थमुकुरे खेटो दर्शनीयो विपश्चिता ॥ १०६ ॥
योगकाले ग्रहौ द्रष्टुं तद्विक्षेपसमान्तरम् ।
शङ्कुद्वयं निखायास्य शिखयोः सङ्गताविमौ ॥ १०७ ॥
छायाग्रलग्ननेत्राय दर्शनीयौ सुबुद्धये ।
द्रष्टव्यानि फलान्यासां संहितासु युधां बुधैः ॥ १०८ ॥

उक्ता ये वृत्तबिम्बा इह गगनसदां सूक्ष्मबिम्बाश्च भानां
पश्यन्ती तिऽच्छभावान्नृप१६गुणसितदृक्कान्तिजाज्वल्यमानाः ।
स्वीयेष्वस्तोदयांशेष्वमृतकरसमज्योतिरालोकमाथो-
च्यन्ते व्यासैश्चतुर्घ्नैस्तनव इति चतुर्थांशमानाः स्वतस्ताः ॥१०९॥
दृष्टं शुक्रस्य गाढास्तमयसमयजं मण्डलं चण्डभानौ
कोटांशे पञ्चविंशे गतवति कलितोऽर्थाद्रिगोऽभ्र४९७५ब्दवृन्दे ।
भास्वद्विष्कम्भदन्तां३२शमितमित दृष्टे खार्थषड्६५०योजनं स्या-
दित्यन्यज्ज्ञेयमस्मात्तनव इनतनोस्तारकाः कोर्थंशाः स्युः ॥११०॥
अम्बुदावलिविडम्बिततनुश्रीरम्बुराशितटविस्फुटधामा ।
कम्बुपत्तनपतिः पतितानां संक्षुदस्यतु तमःपटलं नः ॥ १११ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोध
एकादशो ग्रहयुतिः प्रययौ प्रकाशः ॥ ११२ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
ग्रहयुतिवर्णनो नामैकादशः प्रकाशः ।

द्वादशः प्रकाशः ।

भग्रहयोगवर्णनम् ।

अथ भ-ग्रह-योगाय भानां वक्ष्ये ध्रुवान् शरान् ।
सङ्ख्याकारान् योगताराः साङ्गानां विश्वविस्तृतीः ॥ १ ॥

दस्रादीनां ध्रुवांशाः स्यु-
र्व्यङ्घ्रिकाष्ठाः(१)९।४५ कुबाहवः(२)२१ ।
सपादेष्वग्नयः(३)३५।१५ सार्द्ध-
षड्वेदाः(४)४६।३० साङ्घ्रिखर्त्तवः(५)६०।१५ ॥ २ ॥

शरषट्(६)६५ साङ्घ्रिशून्याङ्काः(७)९०।१५
कृताशा(८)१०४ वसुखेन्दवः(९)१०८ ।
रसार्काः(१०)१२६ सार्द्धवह्नीन्द्रा(११)१४३।३०
रामबाणहिमांशवः(१२)१५३ ॥ ३ ॥

शरभूपा(१३)१६५ नवघना(१४)१७९-
स्त्रिनन्दसितभानवः(१५)१९३ ।
नगाभ्रपक्षाः(१६)२०७ सार्द्धाष्ट-
भूभुजा(१७)२१८।३० रसहग्दृशः ॥ ४ ॥

षड्वीना(१८)२२५।३० त्र्यंशहीनेन्दु-
सिद्धाः(१९)२४०।४० खशरबाहवः(२०)२५० ।
अर्धयुक्तर्कतत्त्वानि(२१)२५६।३०
दलोनाद्रीषुबाहव(०)२५६।३० ॥ ५ ॥
त्रिभानि(२२)२७३ सार्धपञ्चाष्ट-
पक्षा(२३)२८५।३० साङ्घ्र्यष्टभूगुणाः(२४)३१७।४५ ।
इन्द्वन्ता(२५)३२२ दन्ति गीर्वाणाः(२६)३३८
शून्यं(२७)० साभिजिता पति ॥ ६ ॥

क्रान्त्यन्तादेषामथ
विक्षेपांशा दलाढ्यदिश(१)१०।३ ईशाः(२)११ ।
साङ्घ्र्यब्धयः(३)४।१५ सहार्धे-
न्द्रियाणि(४)५।३० सार्धानलक्षितयः(५)१३।३० ॥ ७ ॥
अंशोनतर्कचन्द्राः(६)१५।४०
सार्धरसाः(७)६।३० साङ्घ्रिरूप(८)१।१५मवाग्य(९)१२ ।
रूपदलं निजषष्ठां-
शोनित(१०)० २५मर्थेन्दवो(११)१५ विश्वे(१२)१३ ॥ ८ ॥
रुद्राः(१३)११ सरसांशद्वशौ(१४)२।१०
देवा(१५)३३ बाहू(१६)२ भुजौ(१७)२ सपादकृता(१८)४।१५।
सदलानलरजनीशाः(१९)१३।३०
सार्धाङ्गा(२०)६।३०न्यत्रिभागकृताः(२१)३।४० ॥ ९ ॥
द्वाषष्टि(०)६२रम्बरामाः(२२)३०
षट्त्रिंश(२३)३६च्छीतदीधितेस्त्र्यंशः(२४)०।२० ।
दन्ता(२५)३२ गजभुजसङ्ख्या(२६)२८
शरा(२७)५ इति शराः क्रमाद्भानाम् ॥ १० ॥

ब्रह्मत्रयस्य(४।५।६) राधाषट्क(१६।१७।१८।१९।२०।२१)
स्याहेः(९) करस्य(१३) चित्रायाः(१४) ।
वरुणस्य(२४) च विक्षेपो याम्यः सौम्योऽपरर्क्षाणाम् ॥ ११ ॥

रामा(१)३ गुणाः(२)३ षड्(३)६ विषया(४)५ हुताशा(५)३
रूपं(६)१ शरा(७)५ वह्नय(८)३ आशुगाश्च(९)५ ।
बाणा(१०)५ दृशौ(११)२ युग्म(१२)२मथेन्द्रियाणि(१३)५
धरा(१४)१ स्थिरा(१५)१ पञ्च(१६)५
नगाश्च(१७)७ रामाः(१८)३ ॥ १२ ॥

नन्दाः(१९)९ समुद्रा(२०)४ निगमा(२१)४ गुणाश्च(२२)३
रामाः(०)३ शराः(२३)५ खखाभ्रभुवो(२४)१०० भुजौ(२५)२ च।
दृशौ(२६)२ द्विरामा(२७)३२ इति तारकाणां
सङ्ख्योदिता साभिजितां क्रमेण ॥ १३ ॥

जीवर्क्ष(८)मध्ये बहुतारकाणां स्थितावपि व्यक्ततया विनाद्यैः ।
एकत्वमुक्तं कतिचिद्विभिन्नसङ्ख्यानि भानीत्यपरे वदन्ति ॥१४॥

ऋक्षचयस्याकृतयः प्रत्ययहेतोरथाभिधास्यन्ते ।
तुरगवदन(१)त्रिकोण(२)ज्वलनशिखा(३)नः(४)सदृशास्ताः ॥ १५ ॥

मार्जारपाद(५)विद्रुम(६)-
कार्मुक(७)कठिनीरजः(८)खपुच्छ(९)निभाः ।
लाङ्गल(१०)भारसमाभे(११)
भार(१२)कराभे(१३) च मुक्ताभा(१४) ॥ १६ ॥

माणिक्य(१५)तोरण(१६)फणि(१७)-
क्रोड़रद(१८)कम्बु(१९)सूर्प(२०)सदृशतनवः ।
सूर्पा(२१)ग्निबिम्ब(०)सायक(२२)-
मुरज(२३)वितान(२४)प्रतीकाशाः ॥ १७ ॥

भारनिभा(२५) भारसमा(२६) मीनाभा(२७) चेति सम्मता उडवः ।
काश्चित्कैश्चित्प्रोक्ता भिन्नाकृतयः स्वमतेषु ॥ १८ ॥

अश्वि(१)चन्द्र(५)भगे(११)न्द्राग्नि(१६)-
तोय(२०)विश्वा(२१)जपादजाः(२५) ।
अहिर्बुध्न्यो(२६)त्तरस्था योगतारा ध्रुवांशगाः ॥ १९ ॥

इन्द्र(१८)गोविन्द(२२)मित्रा(१७)ग्नि(३)जीवानां(८) मध्यमा मताः ।
अदित्या(७)दित्य(१३)दैत्याना(१९)मीशानदिगवस्थिताः ॥ २० ॥

वित्त(२३)स्याभिजितः(०) पश्चात् पूर्वस्यां ब्रह्म(४)सर्पयोः(९) ।
याम्या स्थूला पितुः(१०) पूष(२७)-
यमा(२)र्य्यम्णाश्च(१२) दक्षिणाः ॥ २१ ॥

क्षपोट्योनिकाष्ठायां योगतारा प्रचेतसः(२४) ।
मद्धस्त्वाष्ट्रवातानां(९)(१४)(१५) स्वरूपाण्येकभावतः ॥ २२ ॥

योगताराविलिप्तास्तु सूक्ष्माः क्रमात्-
आगतः षड्६भुजौ२ वह्नयः३ सप्तयः७ ।
ईक्षणे२ स्वाश्वतः७ कुञ्जरा८ लोचने२
सिन्धवः४ षड्६गुणा३ वार्धय४श्चाब्धयः४ ॥ २३ ॥

सैन्धवा७स्त्वीन्दव१२श्चक्षुषी२ सिन्धवः४
सप्त७ पञ्चा५ब्धय४श्चाब्धयो४ऽब्धीन्दवः१४ ।
वाजिनः७ पावका३ वीतिहोत्राः३ कृता४
अर्णवा४ वह्नय३श्चेति दस्रादितः ॥ २४ ॥

देवमातुः७ पुनर्याम्यगा तारका
सर्वताराधिका तद्विलिप्ता नखाः२० ।
तद्ध्रुवः सप्तसप्तां७७शका मार्गगः
खार्णवां४०शा निजापक्रमाद्दक्षिणः ॥ २५ ॥

सूर्य्यसिद्धान्तवाक्यादियं तारका
लुब्धकाख्यो मुनिश्चेति निश्चीयते ।
चेददित्यास्तदा याम्यगान्वा लघु-
स्तारका तत्समीपेऽपि निर्णीयताम् ॥ २६ ॥
केचिदाहुर्मृगव्याधनामा मुनिः
सोमभाद्५याम्यगस्तद्ध्रुवोऽङ्गेषवः५६ ।
याम्यबाणो रदाः३२ स्वापमादंशका
दिग्१०विलिप्ताश्च तन्मण्डलस्यायतिः ॥ २७ ॥
तस्य चेशानभस्या६पि मध्यस्थिता-
स्तारकास्तिस्र ईष्वाभका इल्वलाः ।
एकषष्टि६१ध्रुवः स्थूलभस्यार्द्धयुग्-
वह्निपक्षाः२३॥ शरो याम्य आसां मतः ॥ २८ ॥
हुतभुग्ब्रह्महृदययोः पक्षाक्षां५२शा ध्रुवश्च सौरोक्तः ।
प्रथमस्याष्टौ८ त्रिंश३०द्वितीयभस्योत्तरेष्वंशाः ॥ २९ ॥
ब्रह्महृदयपूर्वस्यां पञ्चभिरंशैः प्रजापतिर्वसति ।
तस्योत्तरविक्षेपः कुञ्जररामां२८शकोऽप्युदितः ॥ ३० ॥
आधुनिकैरभियुक्तैर्निश्चित्योक्तं पृथक् च संस्थानम् ।
हुतभुग्ब्रह्महृदययोः प्रजापतेस्तत्पुनर्वच्मि ॥ ३१ ॥
हुतभुग्ध्रुवः सपादाष्टार्थां५८।१५शाः साङ्घ्रिपञ्च५।१५ सौम्यशरः ।
षड्विकलास्तन्मानं ध्रुवः पुनर्ब्रह्महृदयस्य ॥ ३२ ॥
अङ्गार्थाः५६ सौम्यशरस्त्रिभुज२३लवा नृपा१६स्तनूविकलाः ।
सोमभ(५)याम्यगतो यो लुब्धक एतत्प्रजापतिभम् ॥ ३३ ॥
त्वाष्ट्र(१४)स्यापांवत्सः पञ्चलवान्ते वसत्युदग्भागे ।
आप्यवसुस्तत्सौम्ये स्थूलः किञ्चित्ततोऽङ्गां६शैः ॥ ३४ ॥

ध्रुवोऽगस्त्यस्य पञ्चाङ्क९५भागाः पञ्चाद्रयः७५ शरः५ ।
दक्षिणस्तद्ध्रुवो वामं चलांशैः संस्कृतः स्फुटः ॥ २५ ॥
धृतयो१८ विकलास्तस्य सूक्ष्ममण्डलविस्तृतिः ।
यमस्यैव द्विपक्षां२२शा ध्रुवोऽङ्गाङ्गानि६६ मार्गणः ॥ २६ ॥
याम्योऽष्टौ विकला विष्णोऽगस्त्यवद्ध्रुवसंस्कृतिः ।
राशित्रयमगस्त्यस्य ध्रुवः सौरोदितः पुरा ॥ २७ ॥
सप्तनागां८७शकः प्रोक्तः सिद्धान्तशिरोमणौ ।
भूशराब्धिकृता४२५१ब्देषु कलेर्भास्करधीमता ॥ ३८ ॥
स्वोक्तादिति(७)ध्रुवा९३त्पश्चाद्भागषट्कान्तरे८७ यतः ।
दृष्टोऽसौ साम्प्रतं सार्द्धघनां७।३०शान्तर ईक्ष्यते ॥ ३९ ॥
युग्मस्य विश्व(१३)भागान्ते तदब्दैर्गोकुपर्व्वतैः७१९ ।
तस्य स्थानान्तरं सिद्धं सार्द्धरुद्रायनांशजम्११।३० ॥ ४० ॥
सप्तर्षीणां ध्रुवं प्राग्भिर्नोक्तः सञ्चारसम्भवात् ।
तथाप्यनुभवात्तेषां व्यवस्था क्रियतेऽधुना ॥ ४१ ॥
पूर्व्वांशं शकटाकारमुदक्स्थमुडुसप्तकम् ।
सुरर्षिमण्डलं प्रोक्तं व्यक्तं विश्वनमस्कृतम् ॥ ४२ ॥
तत्पूर्व्वोन्नतरेखाग्रे मरीचिः पश्चिमे ततः ।
वशिष्ठोऽरुन्धतीयुक्तस्तत्पश्चादङ्गिराः स्थितः ॥ ४३ ॥
तत्पश्चाच्चतुरस्रस्य शम्भुदिश्यत्रिरस्य च ।
पुलस्त्यो दक्षिणे तस्य पश्चिमे पुलहः स्थितः ॥ ४४ ॥
क्रतुस्तदुत्तरस्थानस्तत्रोक्तौ पुलहः क्रतुः ।
ध्रुवसूत्रेण यन्नाम्नौ तद्दृक्स्था महर्षयः ॥ ४५ ॥
कथ्यन्ते साम्प्रतं सिंहे भूभुजां२१शान्तगौ स्थितौ ।
कालांशैर्विश्वकैः१३ प्राच्यां पुलस्त्यो वर्त्तते ततः ॥ ४६ ॥

ततस्तैः शायकै५रत्रिरङ्गिरा नवभि९स्ततः ।
ततोऽष्टाभि८र्वशिष्ठोऽस्मान् मरीचिर्वर्त्ततेऽष्टभिः८ ॥ ४७ ॥
अरुन्धती स्थिता प्राच्यां स्वामिनोऽद्रि७कलान्तरे ।
या वशिष्ठातिनेदिष्ठा यन्त्रदृष्टाणुरेततः ॥ ४८ ॥
सा नेष्टा सदसद्दृष्टिफलोक्तेः प्रथमेष्यते ।
एकास्या मानविकला तिस्रोऽत्रेरष्ट चान्यतः ॥ ४९ ॥
परस्परस्य चैतेषां सदा तुल्यान्तरस्थितेः ।
गृह्यन्तामृक्षयोगेषु कालांशा दिक्१०पलात्मकाः ॥ ५० ॥
तेऽष्टादशशताभ्यस्ता व्यक्षलग्नासुभिर्हृताः ।
प्राग्ध्रुवाख्या भवन्तीष्टमुनिक्रान्तग्रहांशकाः ॥ ५१ ॥
सप्तर्षिमण्डलायामस्त्यब्धि४२कालांशकोऽपि यत् ।
सायनांशतुलाकन्यास्थित्याङ्काब्ध्यंश४६ ईष्यते ॥ ५२ ॥
क्रान्त्यन्तात्सौम्यबाणांशा लिख्यन्तेऽङ्गशराः५६ क्रतोः ।
पुलहस्यैकपञ्चाशत्५१पुलस्त्यस्याग्निसायकाः५३ ॥ ५३ ॥
अङ्कपञ्चिण५९ एवात्रेः षष्टि६०रङ्गिरसो मता ।
द्वाषष्ट्यंशा वशिष्ठस्य६२ मरीचेः षष्टि६०रीरिता ॥ ५४ ॥
सर्व्वदायं शरः क्रान्तेर्यदि तुल्यो भवेत्तदा ।
युग्मान्तस्थवशिष्ठः स्याच्चतुर्भागान्तरो ध्रुवात् ॥ ५५ ॥
स्फुटक्रान्तेर्महर्षीणां तुल्यता यदि सर्व्वदा ।
तदा राश्यन्तरप्राप्तौ विक्षेपो भिन्नतां व्रजेत् ॥ ५६ ॥
यमागस्त्यस्फुटक्रान्तेर्यथा साम्यं सदेक्ष्यते ।
दस्रादीनाञ्च वैषम्यं तथैषां नेक्षितोऽपमः ॥ ५७ ॥
प्रत्यब्दं प्राग्गतिः प्रोक्ता सुरार्च्चैरष्टलिप्तिका ।
तेषां नो लिखिता पूर्व्वानुभवादर्शनाश्रया ॥ ५८ ॥

यथायनांशसंस्कारो वामस्तेषां यदीरितः ।
तत्सर्वं कविभिर्भाव्यैर्ज्ञेयं मत्कालिकस्थितेः ॥ ५९ ॥
लिप्ता तिथ्यं१५शमानः४ खे यत्र राजत्युदग्ध्रुवः ।
च तन्मध्यध्रुवस्थानं सूत्रपाताद्दिमिष्यते ॥ ६० ॥
कृताष्ट८४लिप्तान्तरितो निजकेन्द्राद्यतो ध्रुवः ।
मेषादिस्थो भ्रमत्यस्मात् पौष्णभे(२७) गगनार्द्धगे ॥ ६१ ॥
उन्नतो दृश्यते विष्णौ(२२) दित्यां(७) चाक्षसमोच्छ्रितः ।
त्वाष्ट्रे(१४) नतस्ततो मध्यस्थानमस्यानुमीयताम् ॥ ६२ ॥
एवं याम्यध्रुवो मेधिमूलयोजितगोरिव ।
तुलादिस्थो भ्रमन्नभ्रे दृश्येतासुरभागगैः ॥ ६३ ॥
अंशास्तु त्रिविधा ज्ञेया मानांशाः कालजांशकाः ।
क्षेत्रांशाश्चेति लग्नानां भेदात्तौ क्षेत्रकालजौ ॥ ६४ ॥
अंशौ विभिन्नौ भवतश्चक्रान्ते सङ्ख्यया३६० समौ ।
मानकालांशयोः साम्यं विषुवद्वृत्त एव तत् ॥ ६५ ॥
महदन्तरमेव स्यात्तदुदग्याम्यभागयोः ।
प्राक्पश्चिमान्तरस्यायं क्रमोनावागुदश्रितेः ॥ ६६ ॥
यथात्र पुलहक्रत्वोः सौम्ययाम्यान्तरं शराः५ ।
भागा एव समा दृष्टा मरीच्यन्तं क्रतोः पुनः ॥ ६७ ॥
प्राक्पश्चादन्तरे दृष्टा मानांशास्तत्त्व२५सङ्ख्यकाः ।
सार्द्धा०।३०स्तत्तच्छरांशेभ्यस्तयोः साध्यौ स्फुटापमौ ॥ ६८ ॥
दिनव्यासदले प्राग्वत् तद्युयोगार्द्धं हृतिर्भवेत् ।
मानांशास्त्रिज्ययाभ्यस्ता हृत्याप्ताः क्षेत्रजांशकाः ॥ ६९ ॥
स्युस्ते लग्नाः सुगणिताः खखनागमही१८००हृताः ।
कालांशाः स्युस्ततो मानभागा व्युत्क्रमकर्मतः ॥ ७० ॥

एवं ध्रुवभ्रान्तिमार्गः खाङ्गाग्नि३६०मितभागकः ।
अप्यष्टाम्बुधिलिप्ताढ्यवसु८।४८मानांशसम्मितः ॥ ७१ ॥
क्रान्तिभेदे महर्षीणामाकृतेः समता यदि ।
स्यात् तदान्तरकालांशाः क्रान्त्यल्पत्वमहत्त्वयोः ॥ ७२ ॥
क्रमादल्पाश्च भूयांसो भवेयुर्द्युगुणक्रमात् ।
कालांशान्तरमेतेषां क्रान्तिभेदे यदि स्थिरम् ॥ ७३ ॥
तदाकृतेर्हानिवृद्धी स्यातामृक्षान्तरांशवत् ।
स्थिरा क्रान्तिर्यदैषां स्यात् कालांशाः स्युस्तदा स्थिराः ॥७४॥
क्षेत्रांशानां स्थिरत्वे स्यात् कालमानाल्पभूरिता ।
क्षेत्रमानांशयोः सिद्धिः कालभागांशयोरिव ॥ ७५ ॥
नक्षत्राणां ध्रुवांशा ये ते कृतायनदृक्क्रियाः ।
उदिता एव विज्ञेया विक्षेपाश्च तथा स्फुटाः ॥ ७६ ॥
ग्रहाणामस्फुटो बाणः कदम्बाभिमुखस्थितः ।
दृक्कर्म्मणा ध्रुवमुखः स्फुटः स्यात्तारकेषुवत् ॥ ७७ ॥
प्राक्पश्चाच्चलनाद्भानां क्रान्त्यन्तात् शरसाम्यतः ।
क्रान्तिभेदस्ततो रात्रिदिनमानं पृथग्भवेत् ॥ ७८ ॥
यस्य सौम्या स्फुटक्रान्तिर्लम्बांशेभ्योऽधिका स्वतः ।
तद्भं सदोदितं यस्य याम्या स्यात् तन्न दृश्यते ॥ ७९ ॥
ग्रहार्क्षान्तरजा लिप्ता ग्रहभुक्त्या विभाजिताः ।
दिनादिभिः फलैर्योगो ग्रहे हीनेऽधिके ध्रुवात् ॥ ८० ॥
एष्यो गतो वक्रगे तु गतैष्यत्वविपर्य्ययात् ।
असकृत्कर्म्मणा तुल्यकले स्यातां ग्रहोडुनी ॥ ८१ ॥
ग्रहस्यायनदृक्कर्म्म कृत्वाथ ग्रहतारयोः ।
कार्य्यं दिननिशामानं स्फुटक्रान्तिचरक्रमात् ॥ ८२ ॥

उदयेऽस्तमये समसूत्रत्वं प्रकल्प्य च ।
तत्समेऽर्के तदुदयसमयं ज्ञात्वान्तरांशकैः ॥ ८३ ॥
कार्य्या तत्समता प्राग्वद्दृक्षसौम्यान्तरं तयोः ।
बिम्बभेदश्च निर्णेतुं शक्यते ग्रहयुतिवत् ॥ ८४ ॥

अत्रो ज्यान्त्यचित्रविशाखद्विमयो भिन्नेन्दुयकाम्नयः
पौष्णाद्यः प्रतिविश्वदेव-
सलिला(४।८।३।१४।१०।७।१७।१८।१६।२७।२४।२१।२०)-
नीयुक्तमात् खेचरैः ।
भिद्यन्ते न पराणि(१।२।५।६।९।११।१२।१३।१५।१९।०।२२।२३।-
२५।२६) तत्र दितिभं (७) सर्व्वैः सदा भिद्यते
कादाचित्कतया जलान्त्यदहनाः(२०।२७।३)
शिष्टानि(४।८।१०।१४ १६।१७।१८।२१।२४) तैः प्रत्ययशः ॥ ८५ ॥

यस्य स्याद्वृषराशिषक१४लवगस्यावाक्शरोऽंशद्वयात्
सत्र्यंश२।२०द्धिको भिनत्ति शकटं स्वायम्भुवं सग्रहः ।
अन्यर्क्षाकृतिभेदभागकलनं यन्त्रेण कार्य्या बुधै-
र्याम्योदगमनर्क्षभेदजफलं ज्ञेयं श्रुताच्चैश्चिरात् ॥ ८६ ॥

प्राक्सिद्धानां ज्योतिषां स्थानमित्थं
प्रोक्तं व्यक्तं यानि भानीतराणि ।
खे लक्ष्यन्ते तत्तदाख्यापिसङ्ख्या
सङ्ख्यावद्भिः ख्यातिमाप्ता न पूर्व्वैः ॥ ८७ ॥

अथ व्योम्नि च्छायापथ इति च वैश्वानरपथो-
ऽभिजिन्मार्गः सूक्ष्मैर्घनतरभचक्रैर्निचुलितः ।
प्रकाशात्मा वक्राकृतिरनुमितो भ्राम्यति च य-
स्तदीयं संस्थानं कियदिह वदामि स्फुटतया ॥ ८८ ॥

क्रान्तिवृत्तमयनान्तयोः स्पृशन्नुत्तरायणजगोलसन्धितः ।
उत्तरे खरस६०भागदूरगस्त्वन्यगोलयुगसन्धिदक्षिणे ॥ ८९ ॥

वह्नितर्क६३लवदूरगोऽदिति(७)-
दक्षिणांशभिदवाग्दिशं गतः ।
मूल(१९)तोय(२०)भिदसौ तथाभिजि-
द्वैष्णवा(२२)न्तर उदग्दिशं गतः ॥ ९० ॥

याम्यायनान्तस्थलतो द्विफालभाक्
खनाग८०भागान्तमुदग्दिशि स्थितः ।
गोले विलिख्याकृतिमस्य पश्यतां
यथा सुबोधो न तथा भवेद्दिवि ॥ ९१ ॥

सम्यग्यन्त्रमिलद्विलोचनजुनाः पश्यन्ति तारामयं
तं मार्गं गुरुभं(८) च भास्वति शिखा नीलाभरेखाङ्कितः ।
चन्द्रे तोयगिरिद्रुमान् बुधसितौ शीतांशुवत्खण्डितौ
शौरेर्बाह्यगतं प्रकाशवलयं सूक्ष्मग्रहोपग्रहान् ॥ ९२ ॥

पटापटुरुचीकृतप्रकटहाटकश्रीर्जगत्
कटाहघटनास्फुटोत्कटकटाक्षपातक्रमः ।
वटद्रुमतटोद्भटद्युतिरनिष्टकूटाटवीं
छटाधरफटाच्छटानटनपाटवी पाटयेत् ॥ ९३ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
यातोऽत्र भग्रहयुगर्कमितः प्रकाशः ॥ ९४ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
भग्रहयोगवर्णनो नाम द्वादशः प्रकाशः ।

त्रयोदशः प्रकाशः ।

ग्रहोदयास्तमयवर्णनम् ।

अथ ग्रहाणामृक्षाणामुदयास्तमयौ ब्रुवे ।
स्थौल्यादुक्तौ स्वकेन्द्रांशैरेवं सूक्ष्मतया पुनः ॥ १ ॥
उदयास्तमयौ द्वेधा नित्यौ नैमित्तिकावपि ।
प्रवहाख्यमरुद्भ्रान्तज्योतिराक्रान्तवेश्मनाम् ॥ २ ॥
उदयास्तमयौ नित्यौ भवतः प्राक्पराशयोः ।
वक्ष्ये नैमित्तिकौ सूर्य्यसन्निकर्षभवाविमौ ॥ ३ ॥
सू—सूर्य्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः ।
ऊनाः प्रागुदयं यान्ति ज्ञशुक्रौ वक्रिणौ तथा । इति ॥ ४ ॥
अत्राधिको मता ज्ञेया निकटे प्राक्परस्थितेः ।
अधिको मेषगस्तस्मादूनो मीनगतो मतः ॥ ५ ॥
सू—ऊना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः ।
व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः ॥ ६ ॥
सूर्य्यास्तकालिकौ पश्चात् प्राच्यामुदयकालिकौ ।
दिवाकरग्रहौ कुर्य्याद्दृक्कर्म्मार्थं ग्रहस्य तु । इति ॥ ७ ॥
कृत्वायनजमाद्यन्तु वक्ष्ये विक्षेपलिप्तिकाः ।
अक्षभाघ्नाद्विभू१२भक्ताः खखाष्टविधु१८००ताडिताः ॥ ८ ॥
तत्कालोत्थविलग्नासु भक्ता धनमृणं खगे ।
प्राक्स्थेऽर्के याम्यसौम्योत्थशरयोर्व्यस्तमस्तगे ॥ ९ ॥
सू—तयोर्लग्नान्तरप्राणाः कालांशाः षष्टिभाजिताः ।
प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नान्तरासवः । इति ॥ १० ॥
सूक्ष्मेन्दोः स्फुटविक्षेपः स्पष्टावनतिसंस्कृतः ।
ग्राह्यस्तल्लम्बनकलाः प्राक्प्रत्यग्युतवर्जिताः ॥ ११ ॥

सूर्य्यादन्तरितो दृश्यो रुद्र११कालांशतोऽधिकः ।
न्यूनस्ततो न दृश्येत शीतरश्मिर्भुवि स्थितैः ॥ १२ ॥
भानां विक्षेपबाहुल्यात् प्राग्वद्विक्षेपतः स्फुटा ।
क्रान्तिः साध्या ततस्तेषां दिनमानासवस्तथा ॥ १३ ॥
नित्योदयास्तसमयौ लग्नौ तत्कालसम्भवौ ।
तत्सूर्य्यान्तरजासुभ्यः कालांशैर्मीलनोद्गमौ ॥ १४ ॥
पश्चादस्तमयं प्राच्यामुदयं यान्ति सर्व्वदा ।
भानि प्राग्गतिशून्यत्वात् सूर्य्याज्जीवकुजार्किवत् ॥ १५ ॥
पश्चादस्तमयात्पूर्व्वं येषां प्रागुदयो भवेत् ।
उदयास्तमयौ तेषां नेष्टौ प्रत्यहमीक्षणात् ॥ १६ ॥
यद्दृश्यमानविलिप्तानां भानामस्तोदयांशकाः ।
ये ये कालात्मकास्तेऽत्र कीर्त्त्यन्ते दृक्समाः क्रमात् ॥१७॥
या या बिम्बविलिप्तानां सङ्ख्या पद्यादिमार्द्धगा ।
तत्तदस्तोदयांशानां सङ्ख्यान्त्यार्द्धेषु दृश्यताम् ॥ १८ ॥
रूपं१ सपादं१।१५ सार्द्धञ्च१।३० सत्रिपादं१।४५ विलोचने२ ।
सिद्धा२४स्त्रिपक्षा२३ दृक्पक्षाः२२
क्षितिपक्षाः२१ खपक्षकाः२० ॥ १९ ॥
सार्द्धपक्षौ२।३० गुणा३ वेदा४ विशिखा५ ऋतवो६ऽद्रयः७ ।
अङ्कैके१९ धृतयो१८ऽत्यष्टि१७-
घ्नंना१७ भूपा१६ नृपा१६स्तथा ॥ २० ॥
अष्टा८ऽङ्का९ दिशो१० रुद्रा११
विवस्वन्तो१२ गुणेन्दवः१३ ।
तिथय१५स्तिथयो१५ऽर्थक्षाः१५
शक्राः१४ शक्राः१४ ऋतेन्दवः१४ ॥ २१ ॥

मनव१४स्तिथयो१५ भूपा१६ घनाः१७ सैका१८ नवेन्दवः१९ ।
विश्वे१३ विश्वे१३ विश्वपाणि१३
सूर्य्याः१२ सूर्य्याः१२ प्रभाकराः१२ ॥ २२ ॥
नखाः२० कुपक्षा२१ दृक्पक्षा२२-
स्त्र्यश्वाद्यष्टभुजात्मकाः२३ २४।२५ २६।२७।२८ ।
रुद्रा११ रुद्राः११ शिवा११श्चाथ हरितः१० परिकीर्त्तिताः ॥२३॥
त्र्योनत्रिंशत्चत्वारिंशदन्त-
विलिप्तिकाः२९।३०।३१।३२।३३'३४।३५।३६।३७।३८।३९।४० ।
नव९ कालांशकाः एवं श्लोकार्द्धैं रविभि१२र्मताः ॥ २४ ॥

अतः शुक्रेज्यसौम्यार्किभौमास्तोदयभागकाः ।
प्रायशोऽङ्काः९ शिवा११ विश्वे१३
तिथयो१५ऽद्रीन्दवः१७ क्रमात् ॥ २५ ॥
चक्रचक्रार्द्धनिकटस्थितस्य शशिजन्मनः ।
मनवो१४ भानवः१२ स्पष्टा विश्वे१३ मध्यतयोदिताः ॥ २६ ॥
चन्द्रार्कयोर्भार्कयोर्वा कथितांशाधिकेऽन्तरे ।
बिम्बौ दृश्यस्ततो न्यूने ग्रहर्क्षाणामदर्शनम् ॥ २७ ॥
अस्तादिश्यस्तभागेभ्यः कालांशोनाधिकत्वयोः ।
क्रमादस्तमयोऽतीतो भावी चेति विचार्य्यताम् ॥ २८ ॥
तेभ्यस्तूदयकाष्ठायामाधिक्यन्यूनभावयोः ।
अंशानामुदयो यातो भविष्यन्निति चिन्त्यताम् ॥ २९ ॥
चलांशसंस्कृतार्कान्यग्रहक्रान्त्योदयासुभिः ।
उदयेऽस्तमये तद्वत् सषड्भोदयजासुभिः ॥ ३० ॥
ग्रहार्कभुक्ती गुणिते खाभ्रनागेन्दुभि१८००र्हृते ।
स्यातां कालगती तत्तद्विवरेणोदयास्तजाः ॥ ३१ ॥

व्यक्षदृक्कर्म्मखेटार्कान्तरलग्ना सुसम्भवाः ।
कालभागाहतास्ते स्युर्गतगम्यदिनादयः ॥ ३२ ॥
ग्रहे वक्रिणि तत्सूर्य्यभुक्तियोगेन भाजिताः ।
नक्षत्रोदयकालार्कात्तदस्तमयकालिकम् ॥ ३३ ॥
प्रोज्झ्य स्फुटरविं शिष्टभागा लिप्तीकृताः,पुनः ।
भध्रुवस्थार्कभुक्त्याप्ता भवन्त्यन्तरवासराः ॥ ३४ ॥
स्फुटास्फुटक्रान्तिजयोरन्तरं यद्दिनार्द्धयोः ।
तत्प्राणा राशिलिप्ता१८००घ्नास्तदक्षोदयजासुभिः ॥ ३५ ॥
चलांशसंस्कृतैर्भक्ता लब्धा दृक्कर्म्मलिप्तिकाः ।
ऋक्षस्य सौम्यविक्षेपे क्रमात्प्राक्पश्चिमस्थितौ ॥ ३६ ॥
तद्ध्रुवे वियुता युक्ता याम्येषौ संयुतोनिताः ।
दृक्कर्म्म ध्रुव एवं स्यात्तत्र क्षेत्रांशसस्कृतिः ॥ ३७ ॥
कालांशा योगताराणां ये सिद्धा उदयास्तजाः ।
ते राशिकलिका१८००भ्यस्ताः प्राच्यां स्वोदयजासुभिः ॥ ३८ ॥
पश्चाद्द्यूनोदयप्राणैर्भक्ताः क्षेत्रांशका मताः ।
दृक्कर्म्मजध्रुवस्तैस्तु प्राक्प्रतीच्योर्युतोज्झितः ॥ ३९ ॥
भवेद्भयोगताराणामुदयास्तमयध्रुवः ।
स्फुटार्के तत्समे तेषामुदयोऽस्तमयस्तथा ॥ ४० ॥
उदक्स्थानामस्तमया पूर्व्वं स्वोदयसम्भवात् ।
नेष्टोऽप्यस्तमयस्तत्कालज्ञानाय केवलम् ॥ ४१ ॥
क्रत्वादीनामन्यभानां साध्यावस्तमयोदयौ ।
कुम्भोद्भवयमादीनां याम्यानामस्तभूरिता ॥ ४२ ॥
सर्व्वेषान्तु ग्रहर्क्षाणां दिनमानप्रबोधतः ।
तौ ज्ञेयावपि दाढ्यार्थं कृतो गणितविस्तरः ॥ ४३ ॥

उदयास्तमयौ प्रोक्तौ पूर्व्वसिद्धान्तसम्मतौ ।
दृक्सिद्ध्यै पुनरुच्येते निजकल्पनयागतौ ॥ ४४ ॥
अर्कगानां ग्रहाणामदृष्टौ कारणं यतः ।
रवेरंशुकिरणव्याप्तिः सा हि दृङ्मण्डलानुगा ॥ ४५ ॥
दृङ्मण्डललवास्त्रिज्याहता लम्बज्यया हृताः ।
त्रिज्याघ्ना द्युज्यया भक्ताः कालांशाः सूर्य्यतः स्फुटाः ॥ ४६ ॥
दृङ्मण्डलांशकालांशभेदस्तस्मादनल्पकः ।
भवेन्निरक्षदेशेऽपि द्युज्यात्रिज्यान्तरोत्थितः ॥ ४७ ॥
रसाङ्गा६६क्षांशके देशे मेषमासे झषस्थयोः ।
उद्यतोः सह सूर्य्येण क्षितिजे गुरुशुक्रयोः ॥ ४८ ॥
भास्वतो दूरवर्त्तित्वात् सिद्धे दर्शनसम्भवे ।
उदयान्तरकालांशसाधनं तत्र निष्फलम् ॥ ४९ ॥
तदादौ स्थूलकेन्द्रांशैः प्राग्वदस्तोदयोद्भवम् ।
कालमानीय तत्कालदोःफलञ्च विवस्वतः ॥ ५० ॥
धनर्णं सूर्य्यवत्तुर्य्यकेन्द्रे स्वस्वोदयास्तजे ।
जीवमन्दासृजां शुक्रबुधयोस्तु व्यतिक्रमात् ॥ ५१ ॥
स्फुटकेन्द्रमथो भानोरयनांशपरिष्कृतात् ।
ग्रहस्योनस्य पूर्व्वोक्तकालांशार्द्धं विशोध्य च ॥ ५२ ॥
अधिकस्य रवौ तस्मिन् योजयित्वा तदर्द्धकम् ।
यत्स्याद्राश्यादिकं भानौ प्राक्स्थे लग्नं तदेव हि ॥ ५३ ॥
प्रत्यक्स्थे षड्भयुक्कृत्वा तस्माद्वित्रिभतः पुनः ।
क्रान्तिमक्षांशसंस्कारान्नतांशानुन्नतांशकान् ॥ ५४ ॥
आनीयाथ नतानंशान् कृते४ष्व५ङ्गा६द्रि७दन्तिभिः८ ।
क्रमाद्विभज्य शुक्रेज्यबुधार्किक्ष्माभुवां कृते ॥ ५५ ॥

सत्फलाख्या उन्नतांशास्तेभ्यः साध्योन्नतज्यका ।
स्वस्वोदयास्तकालांशास्त्रिज्याघ्ना उन्नतज्यया ॥ ५६ ॥
हृता यत्फलमंशाद्यं ग्रहे तदपहृत्तगे ।
तत्सूर्य्यान्तरमेव स्याद्ध्रुवोऽस्तोदययोर्मतम् ॥ ५७ ॥
ध्रुवार्कसंस्कृते प्राग्वत् सायनार्कौ पुरःस्थिते ।
शून्यैकादिभगे तेषां हेचांशा उत्कले यथा ॥ ५८ ॥
शून्ये भे दश काव्यस्य कलाभिस्त्र्यब्धिभिर्युताः१०।४३ ।
एकस्मिन् षड्भुजैः काष्ठा१०।२६ द्वयोर्नव च भूशरैः९।५१ ॥५९॥
त्रिष्वङ्काः खभुजै९।२०र्भेषु चतुर्षु नव चाब्धिभिः९।४ ।
पञ्चस्वङ्काश्च९ षट्स्वङ्का भुवै९।१वं पञ्चभादिजाः ॥ ६० ॥
व्युत्क्रमात्सप्तभाद्येषु ज्ञेया भानौ तु पश्चिमे ।
संस्कृते प्राग्वदे तस्मात् सषड्भान्तेऽंशका मताः ॥ ६१ ॥
एकैकभध्रुवलवान्तरघ्नैः संस्कृतार्कजैः ।
अंशैः खाग्नि३०हृतैः स्पष्टा बह्वल्पा वियुता युताः ॥ ६२ ॥
अथ शून्यैकभाद्येषु हेचांशाः पूर्व्ववद्गुरोः ।
विश्वे भै१३।२७र्विश्वके दोर्भ्यां१३।२
सूर्य्या रुद्रैः१२।११ पिनाकिनः ॥ ६३ ॥
गजाश्विभिः११।२८ शिवा बाणै११।५
रुद्रा११ रुद्रा भुवे११।१ति च ।
बुधस्य भूपा गिरिशै१६।११स्तिथयो नववह्निभिः१५।३९॥६४॥
इन्द्रा रदै१४।३२र्गुणभुवोऽङ्गाग्निभि१३।३६र्विश्वके नगैः१३।७ ।
विश्वे१२ विश्वे भुवा१३।१र्कास्तु धृतयो रससायकैः१८।५६ ॥ ६५ ॥
धृतयश्च नृपै१८।१६र्भूपा गुणबाणैः१६।५३ शरेन्दवः ।
कृतवेदैश्च१५।४४ तिथयो दन्तिभि१५।८स्तिथयः१५ पुनः ॥ ६६ ॥

तिथयः क्ष्मा१५।१थ भौमस्य
भूदस्रो नयनाब्धिभिः२१।४२ ।
नखास्त्यक्षै२०।५२र्नवभुवः
शक्रै१९।१४र्बाहुशरैर्घनाः१७।५२ ॥ ६७ ॥
घना दिग्भि१७।१०र्घना१७ एव घना रूपेण१७।१ सम्मताः ।
अस्तोदयभुवाः स्पष्टा मध्यैः पञ्चभजाः समाः ॥ ६८ ॥
एवमन्येषु देशेषु स्वतज्ज्याक्रमतो बुधैः ।
ज्ञेया उदयास्तांशाः सूर्य्यखेटान्तरान्तरा ॥ ६९ ॥
स्फुटं भुवांशलिप्ताभिरन्तरं सूर्य्यखेटयोः ।
यदा तं समयं प्राग्वद्विकलीकृत्य भुक्तिभिः ॥ ७० ॥
शरादायनदृक्कर्मपरमाद्यं विधाय च ।
तत्परस्परसंस्काराल्लग्नांशादिकं तथा ॥ ७१ ॥
विकलीकृत्य खेटार्कगत्यन्तरकलाहृतम् ।
वक्रिशुक्रज्ञगत्यर्कगतियोगविभाजितम् ॥ ७२ ॥
दण्डादिकं फलं ग्राह्यं धने दृक्कर्मणि स्फुटे ।
समये पश्चिमास्तस्य योज्यं प्रागुदयस्य च ॥ ७३ ॥
प्राक्प्रत्यगस्तोदययोस्त्याज्यं दृक्कर्मणि त्वृणे ।
पश्चादस्तमयप्रागुदययोस्त्याज्यमन्ययोः* ॥ ७४ ॥
योज्यमेवं स्फुटतमः कालः स्यादुदयास्तयोः ।
स च भुक्तिवशाज्ज्ञेयः स्फुटचक्रार्द्धचक्रयोः ॥ ७५ ॥
स्फुटखेटार्कयोर्यत्र समये समता तदा ।
स्फुटं चक्रं कुजादीनां चक्रार्द्धञ्च सितज्ञयोः ॥ ७६ ॥

---

* प्रागस्तपश्चिमोदययोः इत्यर्थः

सायनार्कस्य यद्राशौ ये ये स्वास्तोदयांशकाः ।
कथितास्ते तदा त्वार्कग्रहमध्यन्तरोद्धृताः ॥ ७७ ॥
वक्रघ्नसितगत्यर्कगतियोगविभाजिताः ।
दिनादिभिः फलैः पूर्व्वमस्तं पश्चात्तथोदयः ॥ ७८ ॥
चक्रचक्रार्द्धकालः स्यात् पुनस्तात्कालिकार्कतः ।
सायनादुदयास्तांशलिप्ताः प्राग्वद्धृताः फलैः ॥ ७९ ॥
दिनाद्यैरस्तमुदयं कृत्वा तत्कालजां गतिम् ।
चक्रचक्रार्द्धजां त्यक्त्वा तद्योगार्द्धं ग्रहार्कयोः ॥ ८० ॥
कर्म्मयोग्या स्फुटगतिः स्यात्ततः पूर्व्ववद्दिनैः ।
प्राक्पश्चादागतौ कालौ स्यातां वास्तोदयस्फुटौ ॥ ८१ ॥
किन्तूक्ताः पटुचक्षुर्भिर्गुर्व्वाद्यस्तोदयांशकाः ।
एकोनाः सप्त७ चाङ्काश्च९ वक्रावक्रकवेर्मताः ॥ ८२ ॥

नास्ते वास्तवमस्तमस्ति हि समस्तानामधस्तात् पुरः-
पश्चादूर्द्ध्वनभस्तलस्थितिरविश्रान्तं यदेषां भ्रमात् ।
खद्योतद्युतिभाञ्जि भान्यपटुभिः प्रद्योतनज्योतिषा
लक्ष्यन्तेऽक्षिभि ऋक्षराड्गुरुसिता लक्ष्या दिवाऽसौच्चग्रहः ॥८३॥
भानोरुद्गमतः पुरोऽस्तमयतः पश्चात्प्रकाशोऽम्बरे
दृश्यः स्यात् समयांशकैर्दलयुतैर्व्यह्ने हि पञ्चाक्षिभि:२१।२०।
अन्यत्र त्रिगुणाहतैः स्फुरति तैर्लम्बज्यया भाजितैः
पूर्णेन्दोर्वसुभिः८ कलाक्षयवशादल्पैर्भृगोरिन्दुना१ ॥ ८४ ॥

वन्दामहे हरिहयद्रुहिणाहिराज-
हेरम्बशम्बरहरारिहिमांशुहंसैः ।
अर्हासदीकृतपदाम्बुरुहं सहस्र-
वाराम्महेन्द्रमणिहारि महो महीयः ॥ ८५ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
सास्तदयो व्यरचि विश्रमितः प्रकाशः ॥ ८६ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
ग्रहोदयास्तमयवर्णनो नाम त्रयोदशः प्रकाशः ।

चतुर्दशः प्रकाशः ।

चन्द्रशृङ्गोन्नतिवर्णनम् ।

शृङ्गोन्नतिं विधोर्वच्मे सनित्यास्तमयोदयाम् ।
दृक्सिद्धां वासनावद्भिः सुबोधां छेदकान्विताम् ॥ १ ॥
उदयास्तमयौ नित्यावानेयौ प्रथमं विधोः ।
दृक्कर्मद्वयसंस्कारस्पष्टसूक्ष्मेन्दुभास्वतोः ॥ २ ॥
अयनांशैः संस्कृतयोः सूर्यास्तसमयोत्थयोः ।
सषड्भयोः काललवाः साध्या लग्नान्तरासुभिः ॥ ३ ॥
तयोरूनस्य भोग्यासून् भुक्तासूनधिकस्य च ।
तदन्तरोत्थलग्नासून् संयोज्याभ्ररसो६०द्धृतेः ॥ ४ ॥
स्युः स्फुटान्तरकालांशा रसा६घ्ना घटिकादयः ।
तन्नाडिकाहते भुक्ती रवीन्द्वोः षष्टिभाजिते ॥ ५ ॥
तत्फलान्वितयोर्भूयः कर्त्तव्या विवरासवः ।
असकृत्कर्मभिस्ते तु स्थिराः स्यू रविचन्द्रयोः ॥ ६ ॥
अत्र चन्द्रस्य दृक्कर्मद्वयङ्कार्य्यं पुनः पुनः ।
यतः स्फुटेन्दोः पातस्य भेदाद्विक्षेपभिन्नता ॥ ७ ॥

तदन्तरोत्थप्राणेषु स्थिरेष्वित्थं विधोः पुनः ।
नतिं वित्रिभलग्नोत्थां स्फुटेषुं दृष्टिकर्म्मणी ॥ ८ ॥
कुर्य्यात्स्पष्टगतीन्द्रां१४शस्त्रिज्याघ्नो लम्बयोद्धृतः ।
प्राणात्मकस्तदूनाः स्युर्दृक्सिद्धास्तेऽन्तरासवः ॥ ९ ॥
तैः प्राणैरस्तमेतीन्दुः शुक्लेऽर्कास्तमयात्परम् ।
अत्रार्कसावनत्वं हि द्वयोस्तात्कालिकीकृतौ ॥ १० ॥
तत्कृतौ केवलस्येन्दोः प्राणानामार्क्षता मता ।
सूर्य्यास्तकालिकौ तौ चेद्ग्राह्यौ ते चन्द्रसावनाः ॥ ११ ॥
भगणार्द्धं रवौ दत्त्वा कार्य्यास्तद्विवरासवः ।
तैः प्राणैः कृष्णपक्षे तु शीतांशुरुदयं व्रजेत् ॥ १२ ॥
अत्राप्यर्कास्तकालोत्थौ रवीन्दू दृक्क्रिये विधोः ।
उदये लम्बनासूनां धनत्वं स्थिरतोक्तवत् ॥ १३ ॥
उदयेऽस्तमये वापि स्वदिने यत्र कुत्र वा ।
यदा दृक्चन्द्रमाः साध्यस्तदायं क्रम उच्यते ॥ १४ ॥
षष्ठप्रकाशविधिना कृत्वा सूक्ष्मस्फुटं विधुम् ।
स्वेष्टकालिकमानीय पूर्व्वापरकपालयोः ॥ १५ ॥
लग्नं तात्कालिकङ्कृत्वा वित्रिभं दृग्गतिं ततः ।
नतज्यां प्राक्परोद्भूतां सा दृग्गतिगुणाहता ॥ १६ ॥
त्रिज्याप्ताद्येन्दुभुक्तिघ्नी मनु१४घ्नत्रिज्ययो४८१३२द्धृता ।
फललिप्ता युतोनः स्याद्वित्रिभोदयतो विधुः ॥ १७ ॥
प्राक्प्रत्यक्स्थस्ततः प्राग्वन्नतिस्तत्संस्कृतात् शरात् ।
दृक्कर्म्मायनमाक्षञ्च स्यात्ततो दृग्विधुर्भवेत् ॥ १८ ॥
शृङ्गोन्नतिर्द्विधा शुक्लकृष्णभेदात्तयोः सिता ।
दृश्यत्वात्सम्मता सर्व्वैः कैश्चित्कृष्णानुमानतः ॥ १९ ॥

चन्द्रोदयद्वयान्तःस्थोऽहोरात्रश्चान्द्रसावनः ।
क्रान्तेस्तद्दिनमानञ्च साध्यमिष्टं नतं ततः ॥ २० ॥
पूर्व्वार्द्धे शुक्लपक्षस्य कृष्णस्यान्यदले विधोः ।
शुक्ला शृङ्गोन्नतिः कृष्णा कृष्णशुक्लमुखान्तयोः ॥ २१ ॥
विमण्डलस्थिते चन्द्रमण्डलेऽर्कांशुसंक्रमात् ।
अपवृत्तस्थितिभवा द्विविधाकृतिसम्भवः ॥ २२ ॥
अप्यर्कात्समदूरस्थमिन्दुशृङ्गद्वयं सदा ।
देशान्तरवशाद्वक्रं तारतम्येन दृश्यते ॥ २३ ॥
सौम्यायनान्तगो भानुर्दिनार्द्धे मस्तकोपरि ।
दृश्यते यत्र तद्देशे मेषादिस्थे विवस्वति ॥ २४ ॥
सममण्डलवद्दृश्यं दिवसान्तेऽपमण्डलम् ।
तत्राविच्छिन्नशीतांशुप्राग्गतिः सरलेक्ष्यते ॥ २५ ॥
समता शृङ्गयोस्तस्मात् क्रान्तिवृत्तक्रमाद्भवेत् ।
सन्निवेशो गतिश्चेन्दोः किन्तु भेदः शरोद्भवः ॥ २६ ॥
चन्द्रग्रहणवत्साध्यमत्रापि वलनद्वयम् ।
आयनं पलजं स्पष्टं वैक्षेपाख्यमिहोच्यते ॥ २७ ॥
चन्द्रार्कान्तरजीवास्मिन् कोटीर्विक्षेपको भुजः ।
दोःकोटीवर्गयोर्योगात् पदं स्यात्कर्णसंज्ञकम् ॥ २८ ॥
त्रिज्या भुजघ्नी कर्णाप्ता फलञ्चापीकृतङ्कलाः ।
पञ्चाप्ता वलनांशाः स्युर्वैक्षेपास्तेऽङ्गुलात्मकाः ॥ २९ ॥
खवृत्तमादौ पूर्व्वोक्तमानं दिक्चिह्नितं लिखेत् ।
षडङ्गुलगुणेनेन्दुं तन्मध्ये द्वादशाङ्गुलम् ॥ ३० ॥
खवृत्ते वलनं स्पष्टं प्राच्यां प्राक्स्थे स्वदिश्यदः ।
इन्दौ प्रत्यक्कपालस्थे पश्चाद्दिग्भेदतो न्यसेत् ॥ ३१ ॥

तच्चिह्नतः सौम्ययाम्यवैक्षेपवलनाङ्गुलम् ।
दिग्वैपरीत्यतो न्यस्येत् कपालद्वितयेऽप्यदः ॥ ३२ ॥
तदग्रस्थायिनं बिन्दुं निश्चित्यार्कतया ततः ।
सूत्रं प्रसारितं चन्द्रविम्बमध्यान्तमानयेत् ॥ ३३ ॥
तत्सूत्रमिन्दुविम्बान्तं यत्र स्पृशति सूर्य्यतः ।
ज्योत्स्नोत्पत्तिक्षयौ तत्र भवेतां पर्व्वसन्धिजौ ॥ ३४ ॥
चन्द्रार्कान्तरजा लिप्ताः खखनन्द९००हृताः फलम् ।
शुक्लाङ्गुलं तदिन्द्वन्तादन्तर्देयं रवेर्दिशः ॥ ३५ ॥
शुक्लाग्रे विन्यसेद्बिन्दुमथ सूर्य्यात् खहस्तके ।
नवत्यंशान्तरे बिन्दू पार्श्वयोर्न्यस्य तद्युगात् ॥ ३६ ॥
प्राग्वत्सूत्रे प्रसार्य्येन्दौ तत्स्पर्शस्थानयोरुभौ ।
बिन्दू दत्त्वा लिखेद्बिन्दुत्रयाद्वृत्तत्रयं बुधः ॥ ३७ ॥
पञ्चाङ्गुलगुणेनात्र स्यातां मत्स्यौ तदन्तरे ।
तत्पुच्छमुखसंसक्तसूत्रयोर्यत्र संयुतिः ॥ ३८ ॥
ततो बिन्दुत्रयस्पर्शिधनुश्चन्द्रान्तरे लिखेत् ।
तस्माद्बिम्बान्तरस्थानं शुक्लीकृत्येक्षतां विधुम् ॥ ३९ ॥
प्रत्यक्स्थे शुक्लपक्षेऽस्मिन् कृष्णे चन्द्रे पुरःस्थिते ।
तदर्कान्तरलिप्ताभ्यो वलनार्कदिशो द्युतेः ॥ ४० ॥
व्याप्तिर्यथोदिता तद्वत्प्राक्प्रत्यक्स्थे सितेऽसिते ।
वलनात्सार्कतः कार्य्यः शुक्लस्याव्याप्तिनिर्णयः ॥ ४१ ॥
अर्द्धौ नेन्दोः सिते पक्षे प्रत्यग्भित्तौ विलिख्य तम् ।
छेदकं दर्शयेच्छृङ्गमुन्नतं सौम्ययाम्यगम् ॥ ४२ ॥
प्राग्भित्तौ कृष्णपक्षान्तेऽप्यथार्द्धाधिकशीतगोः ।
उन्नयेदसितां शृङ्गोन्नतिं तद्वलनार्कतः ॥ ४३ ॥

सिद्धान्तक्रमतः प्रोक्तश्चन्द्रेऽसौ नैत्यसंक्रमः ।
अथ युक्त्यनुभूतिभ्यां प्रसिद्धोऽत्रानुवर्ण्यते ॥ ४४ ॥
चन्द्रयोजनकर्णघ्नी त्र्यर्केन्दुज्यार्ककर्णहृत् ।
तत्कलाद्योन्नतिः कार्य्या स्वौः शुक्लाशुक्लपक्षयोः ॥ ४५ ॥
तस्य सूक्ष्मस्फुटेन्दोर्या त्र्यर्कस्योत्क्रमदोर्ज्यका ।
सा गुणाद्रिशरै५७३र्भक्ता लब्धं शुक्लाङ्गुलादिकम् ॥ ४६ ॥
षड्भोनेन्दोरथैतस्यात् कृष्णमर्द्धाधिकस्य च ।
क्षीणे शुक्लाङ्गुलं देयं द्वादशाङ्गुलमण्डले ॥ ४७ ॥
पुष्टे षडङ्गुलाद्योज्झ्य कृष्णं शिष्टं सिताङ्गुलम् ।
योज्यं बिम्बदले चेत्स्याद्दलनार्कदिशः स्फुटः ॥ ४८ ॥
आकारश्चन्द्रबिम्बस्य प्राग्वद्बिन्दुत्रयोद्भवात् ।
मत्स्यद्वयात् सूत्रसक्तात् सिद्धः साक्षात् स लक्ष्यते ॥ ४९ ॥
सार्द्धाङ्गुलाल्पशुक्लस्य शृङ्गान्तावतिसौक्ष्म्यतः ।
न दृश्यौ दर्शनं तद्वत्सम्भवेत्तदुपान्तयोः ॥ ५० ॥
कला द्वित्रयावस्य दृश्यतां परिलेखके ।
शुक्लपक्षस्य पादान्ते सूर्य्यास्तमयकालिकः ॥ ५१ ॥
चन्द्रोऽर्काङ्गुलको लेख्य उत्तरास्येन भूतले ।
तन्मध्ये दिक्षु कोणेषु देयं रेखाचतुष्टयम् ॥ ५२ ॥
तन्मध्यानां यथा योगो बिम्बमध्ये भवेत्तथा ।
चन्द्रात्पश्चिमगो दूरे कल्पनीयो दिवाकरः ॥ ५३ ॥
बिम्बार्द्धं पश्चिमं भाव्यं सातपं बिन्दुरिन्दुतः ।
भूसंस्थः पूर्वहस्तान्ते देयोऽग्निदिशि दृष्टये ॥ ५४ ॥
उत्तराशा-महीबिन्द्वोः कल्पनीयोऽर्द्धमम्बरम् ।
तिर्य्यक्स्थत्वात्तनुः प्रेक्ष्यः समोऽपीन्दौ सदातपः ॥ ५५ ॥

ईशाननैर्ऋतदिशोरायता याच रेखिका ।
सा ज्ञेया भूस्थितैर्दृश्या चन्द्रमण्डलविस्तृतिः ॥ ५६ ॥
दक्षिणोत्तररेखान्तव्यापिपश्चिमशुक्लतः ।
अधःस्थो दक्षिणो भागो दृश्यतामेति यत् क्षितौ ॥ ५७ ॥
तद्भूमेर्निर्गतं सूत्रं याम्यरेखाग्रसङ्गतम् ।
लग्नं पश्चिमरेखान्ते नैर्ऋतैशान्यरेखिकाम् ॥ ५८ ॥
यत्र स्पृशेत्ततस्तस्यां नैर्ऋतान्तं सितस्थितिः ।
ऐशान्यान्तं सिताभावः कर्णसूत्रेण लक्ष्यते ॥ ५९ ॥
सार्द्धराश्यन्तरेऽर्केन्दोः शास्त्रोक्तस्त्र्यङ्गुलः सितः ।
साक्षादत्रागतो यस्मात् पादोनद्व्यङ्गुला१।४५त्मकः ॥ ६० ॥
अतश्चन्द्रस्य सर्व्वत्र शौक्ल्यमुत्क्रमजीवया ।
साध्यं बुधैर्यतो दृश्यो गोलांशः कर्णवर्त्मना ॥ ६१ ॥
एवं शुक्रज्ञयोः शृङ्गे चक्रार्द्धान्तिकवर्त्तिनोः ।
यन्त्रेण विदुषा दृश्ये चन्द्रवद्दूरदर्शिना ॥ ६२ ॥
वर्षेऽस्मिन् भारते सौम्यं प्रायशः शृङ्गमुन्नतम् ।
कपालद्वितये दृश्यं कदाचिद्दक्षिणं विधोः ॥ ६३ ॥

छायाकर्णवशाद्विधो रविशशिकान्त्यन्तरोत्थोदिता
या शृङ्गोन्नतिरादिभिः किल मया सा त्याज्यसिद्धेर्दृशः ।
यद्भानौ विषुवस्थिते सितरुचेर्याम्यायनान्तस्थितेः
खार्द्धेऽर्द्धं ध्रुवसूत्रखण्डितमिवावक्रं सदा लक्ष्यते ॥ ६४ ॥
व्यर्केन्दूत्क्रमदोर्ज्यकादिमगतिघ्नाप्ता खबाणाब्धि-
त्रिग्रावेन्दु१७३४५०हृता फलं शशभृतो ज्योत्स्नाकलाबिम्बजाः ।
अर्द्धोनस्य दलाधिकस्य तु दलं तद्धीनमर्द्धान्वितं
प्राक् पश्चात् सितबिम्बमानमुदितं लिप्तात्मकं दृक्समम् ॥ ६५ ॥

क्वांभू११कालसमान्तरेऽर्कशशिनोः शुभ्रांशुबिम्बद्युतिः
प्रायेण क्षितिभृत्तपेश१७विकलामानादनूना बुधात् ।
न्यूना यद्गुरुबिम्बतो भवति तद्यामौ तदस्तोदयौ
वक्रां११शैर्के तु सितस्ततोऽपरमतश्चोतप्रवेशक्रमात् ॥ ६६ ॥

बिम्बस्याष्टोत्तरशत१०८लवः प्रेक्ष्यते शुक्लपक्षे
प्रातिपद्यन्ते१ तनुरपि विधोः षष्ठभागश्चतुर्थ्याम् ।
षष्ठ्यन्तेऽङ्घ्रिरथ दशमीप्रान्तभागे त्रिपादाः
पञ्चान्ते१५ऽर्द्धं८ऽखिलदलभृतिर्वैष्णवान्ते११ऽरसांशः ॥ ६७ ॥

क्षारोदरोधसि धरोपरि रोचमानः
सारोजबान्धवि-सरोषतरोक्तिरोपात् ।
नारोपमोपमपरोऽरिधरो विरोधि-
सारोत्थरोमनिकरोपरतिं करोतु ॥ ६८ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाह्वितबालबोधे
शृङ्गोन्नतिर्व्यगमदिन्द्रमितः प्रकाशः ॥ ६९ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
चन्द्रशृङ्गोन्नतिवर्णनो नाम चतुर्दशः प्रकाशः ।

पञ्चदशः प्रकाशः ।

महापातवर्णनम् ।

यात्रादीनां शुभफलमलं कर्म्मणां सत्कृतानां
यस्मिन् भस्मीभवति गणका यत्र मुह्यन्ति भूयः ।
तं योगेन्द्रं वितरणजपाद्येषु सूर्य्योपराग-
प्रख्यं वक्ष्याम्यहमिह महापातमातत्य तत्त्वात् ॥ १ ॥
वैधृतव्यतिपाताख्यौ भेदौ पातस्य कीर्त्तितौ ।
गोलायनक्रान्तिभेदसम्भवौ रविचन्द्रयोः ॥ २ ॥
स्याद्गोलसन्धिरर्केन्द्वोर्विषुवद्वलयस्थयोः ।
सन्धिरायन एव स्यात् परमापक्रमस्थयोः ॥ ३ ॥
क्रान्तिसाम्यं यदा भिन्नायनयोरेकगोलयोः ।
योगः स्याद्व्यतिपाताख्यस्तदा चन्द्रविवस्वतोः ॥ ४ ॥
विभिन्नगोलयोरेकायनयोः क्रान्तितुल्यता ।
यदा तदा वैधृताख्यः सम्भवेद्दृष्टियोगजः ॥ ५ ॥
सू—तुल्यांशुजालसम्पर्कात्तयोस्तु प्रवहाहतः ।
तद्दृक्क्षेपोद्भवो वह्निर्लोकाभावाय जायते ॥ ६ ॥
विनाशयत्यतिपातोऽस्य लोकानामसकृद्यतः ।
व्यतिपातः प्रसिद्धोऽतः संज्ञाभेदेन वैधृतः ॥ ७ ॥
स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः ।
सर्व्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते । इति ॥ ८ ॥
चलांशसंस्कृतार्केन्द्वोर्योगचक्रं यदा भवेत् ।
तदा सन्निहितो योगो वैधृतः पुनरेतयोः ॥ ९ ॥
योगात् षड्भवनान्यष्टादशवांसं भवन्ति चेत् ।
व्यतिपातस्तदासन्नो भिन्नपादस्थयोस्तु तौ ॥ १० ॥

प्रायस्तत्सम्भवो मासे द्विर्भवेन्न क्वचिद्भवेत् ।
क्वचित्सन्निहिते काले द्विः स्याद्विक्षेपभेदतः ॥ ११ ॥
पातसम्भवकालोत्थयोगान् वक्ष्येऽयनांशकैः ।
कलीकृतैर्द्विगुणितैश्चक्र२१६००चक्रार्द्ध१०८००जाः कलाः ॥ १२ ॥
विलोमसंस्कृताश्चक्राधिकाश्चेच्चक्रशोधिताः ।
खखाष्टा८००प्तागता योगा विष्कुम्भाद्याः सरूपकाः ॥ १३ ॥
वर्त्तमानास्ततः शेषात् षष्टिघ्ना खशराष्टभिः८५० ।
भाजितात् फलनाड्याढ्या यदा सूक्ष्मा भवन्ति हि ॥ १४ ॥
तदैवेन्दुशराभावे स्यान्मध्यसमयः शरात् ।
प्राक्पश्चात्सम्भवेत्पातः साध्यतां प्रथमं ततः ॥ १५ ॥
अथेदानीं शुक्ल२४ह्वयोस्तृतीया३दिम१पादयोः ।
भवति प्रायशो मध्यं वैधृतव्यतिपातयोः ॥ १६ ॥
अतोऽनुमाय तत्कालं चक्रचक्रार्द्धजं युतेः ।
तद्युयोगदिनजौ कार्य्यौ सूक्ष्मौ सूर्य्यनिशाकरौ ॥ १७ ॥
न्यूनाधिकविलिप्तास्तु तद्भुक्त्यन्तरभाजिताः ।
लब्धैर्दण्डादिभिः कालः पूर्व्वः कार्य्यौ युतोनितः ॥ १८ ॥
एवं स्यादसकृत्कालश्चक्रभार्द्धसमीकृतेः ।
ततस्तत्कालजात्पातात्साध्यः सूक्ष्मेन्दुसायकः ॥ १९ ॥
भूपृष्ठनिष्ठदृष्टीनामत्राप्यनुपयोगतः ।
नैव कार्य्येन्दुदृक्कर्म्मलम्बनावनतिक्रिया ॥ २० ॥
सू—अथौजपदगस्येन्दोः क्रान्तिर्विक्षेपसंस्कृता ।
यदा स्यादधिका भानोः क्रान्तेः पातो गतस्तदा ॥ २१ ॥
ऊना चेत्स्यात्ततो भावी वामं युग्मपदस्य च ।
यदान्यत्वं विधोः क्रान्तिर्विक्षेपाच्चेद्विशुद्ध्यति । इति ॥ २२ ॥

गोलज्ञैः सकलं ज्ञेयं गणकैर्वासनाबलात् ।
गतैष्यत्वं हि बालानां बोधाय गणितक्रमः ॥ २३ ॥
योगभार्द्धान्तयोः सिद्धा यदा समकलीकृतिः ।
तत्कालतो गतं पाते संशोध्याः षष्टिनाड़िकाः ॥ २४ ॥
गम्येतास्तत्र संयोज्याः पुनस्तत्कालसम्भवैः ।
सूर्य्येन्दुपातविशिखैः साध्यं क्रान्त्यन्तरं तयोः ॥ २५ ॥
तदा प्राक्कालतश्चेत्स्याद्गतैष्यत्वविपर्य्ययः ।
तदा तत् षष्टिदण्डान्तर्मध्यं पातस्य सम्भवेत् ॥ २६ ॥
यदा गतस्य गतता गम्यता च भविष्यतः ।
तदा दूरे भवेद्योगो न तु तद्दिवसान्तरा ॥ २७ ॥
तत्सिद्धये गतिः साध्या याम्यसौम्यापमोद्भवा ।
प्राक्पश्चात्कालयोः पातयातैष्यत्वविपर्य्यये ॥ २८ ॥
तत्क्रान्त्यन्तरयोर्योगस्त्यागस्तदविपर्य्यये ।
भवेत्क्रान्तिगतिः साद्या पातार्थं कलिकात्मिका ॥ २९ ॥
आद्यक्रान्त्यन्तरकलाः षष्टिघ्ना गतिभाजिताः ।
फलं नाड्यादिसंस्कार्य्यं काले समकलोद्भवे ॥ ३० ॥
गतैष्यतावशाद्भूयस्तत्कालक्रान्तितः पुनः ।
साध्यं क्रान्त्यन्तरं प्राग्वद्गतैष्यत्वाद्गतेः कलाः ॥ ३१ ॥
कालेन यावता यावल्लभ्यतेऽपक्रमान्तरम् ।
तत् षष्टिगुणितं तत्तत्कालनाड़ीहृतं गतिः ॥ ३२ ॥
असकृत्कर्म्मसंसिद्धकालभुक्त्यपमान्तरैः ।
क्रान्त्योः साम्यं यदा स स्यान्मध्यः कालोऽक्रिमा गतिः ॥३३॥
पूर्णो योगस्तदैव स्याद्बिम्बयोर्मध्यबिन्दुजः ।
स्थितिकालावगतये स्पर्शमोक्षौ ब्रुवेऽधुना ॥ ३४ ॥

पूर्व्ववद्बिम्बयोर्मानयोगार्द्धं रविचन्द्रयोः ।
आनीयाभ्ररसा६०भ्यस्तं क्रान्तिगत्यान्त्यया भजेत् ॥ ३५ ॥
लब्धा भवन्ति घातस्य मध्यस्थित्यर्द्धनाड़िकाः ।
मध्यकालस्तदूनाढ्यः स्पर्शो मोक्षश्च मध्यमः ॥ ३६ ॥
तत्कालप्रभवार्केन्दुस्फुटक्रान्त्योर्यदन्तरम् ।
तन्मानयोगदलतो न्यूनं चेत् स्पर्शको गतः ॥ ३७ ॥
मोक्षो भावी यदा तस्माद्धहुक्रान्तिद्वयान्तरम् ।
स्पर्शो भावी गतो मोक्षस्तत्क्रान्त्यन्तरलिप्तिकाः ॥ ३८ ॥
खरसै६०र्गुणिता मध्यस्थित्यर्द्धघटिकाहृताः ।
लब्धा भुक्तिकलाः स्पर्शमोक्षोत्थाः प्रथमा मताः ॥ ३९ ॥
मानयोगार्द्धविकलास्तद्भक्ताः स्पर्शमोक्षजाः ।
स्थित्यर्द्धनाड़िकामध्ये हीनाढ्याः समये पुनः ॥ ४० ॥
तत्कालक्रान्तिविवरलिप्तिकाः षष्टिताड़िताः ।
द्वितीयस्थितिखण्डाप्ता लब्धा भुक्तिरिति क्रमात् ॥ ४१ ॥
तत्क्रान्त्यन्तरयोगार्द्धसाम्ये स्पर्शविनिर्गमौ ।
भवेतां सुस्थिरौ स्पष्टौ दण्डाश्च स्थितिखण्डजाः ॥ ४२ ॥
सू– आद्यन्तकालयोर्मध्ये कालो ज्ञेयोऽतिदारुणः ।
प्रज्वलज्ज्वलनाकारः सर्व्वकर्म्मसु गर्हितः ॥ ४३ ॥
एककाष्ठागतं यावदर्केन्द्वोर्मण्डलान्तरम् ।
सम्भवस्तावदेवास्य सर्व्वकर्म्मविनाशकृत् ॥ ४४ ॥
स्नानदानजपश्राद्धव्रतहोमादिकर्म्मभिः ।
प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा । इति ॥ ४५ ॥
मध्यमः स्थितिकालोऽस्य प्रहरद्वितयं भवेत् ।
नवदण्डात्मको न्यूनः सत्र्यंशाहद्वयं२ २० महान् ॥ ४६ ॥

चक्रान्ते चन्द्रपातोच्चौ रविश्चक्रान्तसन्निधौ ।
चन्द्रश्चेन्नाडिगस्तत्र पातस्याल्पा स्थितिर्भवेत् ॥ ४७ ॥
चन्द्रोच्चपातशशिनो यदि स्युः कर्कटादिगाः ।
धनुरन्त्याङ्घ्रिगो भानुस्तदा स्यात्सुचिरस्थितिः ॥ ४८ ॥
पातोऽत्र द्वित्रिभागोनः स्याच्चेद्द्विः सन्निधौ भवेत् ।
अयनान्ते विधोर्न स्याद्गजाश्व्यं२८शाधिकेऽपमे ॥ ४९ ॥
अत्र विक्षेपजो ग्राह्यो गोलभेदः सितद्युतेः ।
न ग्राह्योऽयनभेदोऽस्य स्वायनाभिमुखस्थितेः ॥ ५० ॥
गोलसन्धौ क्रान्तिगतिर्बह्वीषोर्येन भिद्यते ।
अल्पासायनसन्धौ तु गत्येषोर्भिद्यते क्वचित् ॥ ५१ ॥
याम्ये सौम्येऽयने चन्द्रसौम्ययाम्यगतिः शरात् ।
दृष्टाप्ययनसाम्मुख्याभावान्नायनभिन्नता ॥ ५२ ॥
पातेन दूरतः खेटो विक्षिप्तोऽपि स्वपार्श्वयोः ।
न त्यजेत्क्रान्तिवृत्तस्य साम्मुख्यं हि कदाचन ॥ ५३ ॥
वराहमिहिराचार्य्यैर्बृहद्यात्राह्वये स्तुते ।
व्यवस्था विहिता सैव बहुयुक्तिपुरःसरम् ॥ ५४ ॥
रवीन्दुयोगतो योगा ये सप्तविंशतिः पुरा ।
साधितास्तत्र यौ सप्तविंशसप्तदशाविमौ ॥ ५५ ॥
वैधृतव्यतिपाताख्यौ योगावत्यन्तदारुणौ ।
तौ हि खार्जूरचक्रैकार्गलगार्केन्दुदृग्भवौ ॥ ५६ ॥
सू—सार्पै९न्द्र१८पौष्ण२७धिष्ण्यानामन्त्याः पादाभसन्धयः ।
तदग्रभा१०।१९।१व्यपादार्द्धं गण्डान्तं नाम कीर्त्यते । इति॥५७॥
दृष्टा लग्ननवांशका इह मयोच्यन्ते कुलीरे झषे
कीटेऽन्त्या हरिचापमेषमुखगा मीनाजसम्बन्धिनः ।

ते गण्डान्तभसन्धिपातसदृशाः सर्व्वेषु कर्म्मस्वपि
त्याज्या विष्टिमुखास्त्वनिष्टनिकरा होरागमोक्ताः पुनः ॥ ५८ ॥
प्राक्कल्पे भूग्रहादिस्थिरचरसृजतः खाभ्रवेदाब्धिवेदा४७४००
दिव्याब्दा ये व्यतीयुः सरसिजजनुषः प्रत्यहं पर्य्ययाणाम् ।
तावत्कालाप्रवृत्तेरितरदिनमुखाद्यातसौराब्दसङ्घाः
सृष्ट्यब्दाः सृष्टिकालव्यवकलनवशादुक्तपूर्व्वा मयेति ॥ ५९ ॥
सृष्ट्यन्ते चैत्रशुक्लप्रतिपदि यवकोट्युद्गमे तिग्मभानो-
स्तद्वारे सोच्चपाताखिलगगनचराश्चक्रवक्त्रे नियुक्ताः ।
तस्माद्वर्षाब्दमासापमभगणमुखा यौगपद्यात्प्रवृत्ताः
किञ्च ब्रह्माहरादेर्युगमनुघटिकामात्रमन्यन्न किञ्चित् ॥ ६० ॥
ये प्रोक्ताः सदसत्फलाय जगतः श्रीव्यासपित्रादिभी
राजाद्या जलदाः सदाढ़िपतयो भागाः सुयोगादयः ।
भावाभावजुषामदृष्टवशतस्तत्तत्फलानां मया
कादाचित्कतया न तेऽत्र गदितास्त्यक्ताश्च सिद्धान्तिभिः ॥ ६१ ॥
यत्सूर्य्येन्द्वोर्भगणविरतिः स्याद्युगे तत्कृतांशे
निःशेषत्वं क्षितिदिनततेर्द्वापरान्तप्रसिद्धाः ।
सृष्टेरब्दा युगकृत४लवे१०८००००नोद्धृताः शेषशून्या-
स्तस्माच्चोक्तास्तपनशशिनोर्द्वापरान्तभुवोऽत्र ॥ ६२ ॥
सृष्ट्यब्दानां कलिगतसमानां दिनौघः सुमेलः
स्यान्मध्यार्कक्रियमुखगतावत्र तत्पूर्व्वघस्रे ।
चैत्राद्युक्ता दिनगतियुतास्ते ध्रुवाः पञ्जिकादौ
सौरे तुल्याः करणशरदां तद्दिनाद्यार३वारात् ॥ ६३ ॥
चान्द्रे वारे व्यरचि करणाब्दादिराद्या१ तिथिर्या
सा वैशाखे यदपि मलिने स्पष्टसूर्य्येन्दुजेऽभूत् ।

मध्यार्केन्दूद्भवमलिनमासस्य पूर्व्वं गतत्वा-
त्तस्याः खेटध्रुवसमुचितः शुद्धचैत्रादिभावः ॥ ६४ ॥
एतत्पूर्व्वं सपदकृतदेवार्थभूधृत्यहोभि१८१५३२४।१५-
र्यां कल्यादौ मधुमुखतिथिस्तुल्यमध्येन्दिनोत्था ।
प्राग्भिः प्रोक्ता ध्रुवगणयुता सा स्फुटे माधवेऽभू-
त्तत् खेटादिध्रुवनिगमने मध्यमध्यादिरिष्टः ॥ ६५ ॥
कल्यब्दा वेदकृतखगुणै३०४४रूनिता विक्रमाब्दा-
स्ते शाकाब्दाः शरगुणकुभि१३५स्ते कुपक्षाभ्रचन्द्रैः१०२१ ।
शास्त्राब्दास्तेऽपि च विधुशरै५१र्भास्करीयाब्दकाः स्यु-
स्ते नागेन्द्रै१४८रतिधृतिनगैः७१८ कौचनादार्पणाब्दाः ॥६६॥
यस्मिन् खेटानयनमुदितं सृष्टिजाहर्गणेभ्यः
सिद्धान्तोऽसौ युगदिनगणाद्यत्र तन्त्रं तदेव ।
यस्मिन् शाकाद्यभिमतसमा वासरेभ्यस्तदुक्तं
शास्त्रं प्राज्ञैः करणमिति तत्कार्य्यमत्रास्ति सर्व्वम् ॥ ६७ ॥
नृणां पापं दशदिनकृतं हन्ति सिद्धान्तवेत्ता
दृष्टः सद्यस्त्रिदिनजनितं तन्त्रवेत्ता निहन्ति ।
एकाह्नोत्थं करणनिपुणो यस्तु शास्त्रानभिज्ञः
कालं ब्रूते बहुद्दजिनदः सोऽत्र नक्षत्रसूची ॥ ६८ ॥
चन्द्रं मन्दाक्षिभसमधिकं प्रेक्ष्य पक्षार्द्धसिद्धं
द्विचांशाक्या यदिह गदिता मध्रुवा भास्कराद्यैः ।
चक्रेऽजादिस्थितिरपि पृथक्सम्मता यत्तथान्यै-
रप्रामाण्यात्तदखिलमुपादत्त नो वित्तमाग्राः ॥ ६९ ॥
कैश्चित्प्रोक्तं नलिनजनुषः स्वायुषोऽर्द्धं व्यतीतं
कैरप्येतत् प्रतनमुनिभिः सार्द्धवर्षाष्टका८।६ढ्यम्५८॥ ७०॥

तद्वैतद्वा भवतु न ततः कोऽपि लौकोपयोगः
कल्पस्यास्य द्युचरगणितं स्यादिदं तन्मुदे वः ॥ ७० ॥
यस्येच्छा मे निजभजनतो दूरमुत्सार्य्य बुद्धिं
दैवाधीनां गणितविपणौ पातयत्याततायाम् ।
सङ्ख्यातीताशुगतपतितोद्धारकारुण्यसिन्धुः
स स्याच्चेतःशरणचरणः सिन्धुजाप्राणबन्धुः ॥ ७१ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽब्धिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
यातः सपात इह पञ्चदशः प्रकाशः ॥ ७२ ॥

इति मुदितसुधीरे शुद्धसिद्धान्तपूर्व्वे
नयनविषयसिद्धव्योमगे दर्पणेऽस्मिन् ।
त्रिभिरिदमधिकारैः३ पञ्चभूभिः१५ प्रकाशै-
र्ग्रहगणितसमाख्यं पूर्व्वमर्द्धं समाप्तम् ॥ ७३ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे त्रिप्रश्नाधिकारे
महापातवर्णनो नाम पञ्चदशः प्रकाशः ।

गोलाधिकारः ।

षोडशः प्रकाशः ।

प्रश्नवर्णनम् ।

यत्पादाम्बुरुहप्रसक्तहृदया ब्रह्मादयोऽनास्थया
कालेऽन्यत्र च नैजसाम्यविरहात्तत्कर्हिरागाय वा ।
शिष्यप्रश्नवशादसूक्ष्मवचसा सिद्धान्तजातं जगुः
सर्व्वज्ञा अपि मादृशा इव नमस्तस्मै जगत्स्वामिने ॥ १ ॥
यश्चक्षुर्ग्रहणातिगोऽपि गगने गृह्णन् ग्रहाणां गणं
भूगोलं परिगच्छति ग्रहपतिः सर्व्वाग्रिमो मध्यमः ।
लोकालोकविशोकतावनकृते स्पष्टस्त्रयीमूर्त्तिमान्
यच्चक्षुर्जगदात्मनो भगवतस्तस्मै सवित्रे नमः ॥ २ ॥
प्राक्सिद्धान्तचयं प्रमायनयनानर्घं महार्हाम्बरं
यः सिद्धान्तशिरोमणिं प्रणिमदन्प्रीणयत्प्राणिनः ।
आत्मीयावसरप्रणीतभगणप्रत्यर्चितैः खेचरै-
रास्माकीनमहोपकारकृतिनं वन्दे गुरुं भास्करम् ॥ ३ ॥
महः किञ्चिन्नीलाचलनिलयिलीलाकृतजग-
ज्जगन्नाथाख्यं तन्मनसि विनिधायाधनिधनम् ।
तदीयानुक्रोशाद्ग्रहगणितमाख्याय रभसा-
दृढं कुर्व्वे पूर्व्वैरितमतिततं गोलगणितम् ॥ ४ ॥
सिद्धान्तजातोद्धृतवाक्यचक्रसन्दर्भितात्मग्रथिताग्र्यपद्यैः ।
गोलं ब्रुवे बालविबोधनाय वाचं पुरस्कृत्य च भास्करीयाम् ॥ ५ ॥

सिद्धान्तशिरोमणी - मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम्।
गोले सा विमला करामलकवत्प्रत्यक्षतो दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः ॥६॥

भोज्यं यथा सर्व्वरसं विनाज्यं राज्यं यथा राजविवर्ज्जितञ्च।
सभा न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथैव ॥ ७ ॥

वाग्मी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः सभां
जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूभङ्गवक्रोक्तिभिः।
ह्रीतः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्वित्सदसि प्रगल्भगणकप्रश्नप्रपञ्चोक्तिभिः ॥ ८ ॥

दृष्टान्त एवावनिभग्रहाणां संस्थानमानप्रतिपादनार्थम्।
गोलः स्मृतः क्षेत्रविशेष एष प्राज्ञैरतः स्याद्गणकेन गम्यः ॥ ९ ॥

ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितं पुनरिदं तत् स्पष्टखेटाश्रयम्।
ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते
तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ॥१०॥

द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः।
यदि भवति तदेवं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारोऽस्यान्यथा नामधारी । इति ॥ ११ ॥

गुर्व्वन्तेवासिसंवादव्याजेनाथ विविच्यते।
तत्त्वं खभूभगोलानां वासनावगतिर्यतः ॥ १२ ॥
तत्र भोः श्रीमदाचार्य्य निजवागमृतेन यत्।
त्वयोक्तं खेटगणितं गोलाख्यं यच्च सूचितम् ॥ १३ ॥

तेन मे द्वापरलता ह्रस्वैव न तु वर्द्धिता ।
नानामतद्रुमालम्बबहुशाखीकृता यतः ॥ १४ ॥
निवासाय पुरास्माकं या सृष्टा विष्णुना धरा ।
युज्यते प्रथमं तस्याः स्वरूपं परिशीलितुम् ॥ १५ ॥
गोलं ज्ञात्वा ततस्तस्मिन्निःसन्देहं नभःसदाम् ।
गणितस्यानुभूतिर्मे भूयाद्भवदनुग्रहात् ॥ १६ ॥
चक्राकारां वसुमतीं कथयन्ति पुराविदः ।
धृतां क्रोडाहिकूर्म्माद्यैः पञ्चाशत्कोटियोजनाम् ॥ १७ ॥
तन्मध्ये जाम्बवो द्वीपो लक्षयोजनविस्तृतः ।
तावता लवणोदेन वेष्टितो नववर्षभृत् ॥ १८ ॥
मध्ये तस्य स्थितो मेरुः खखखाब्ध्यष्ट८४०००योजनैः ।
*उच्छ्रितो भूप्रविष्टोऽसौ खाभ्राभ्राङ्गेन्दु१६०००योजनैः ॥ १९ ॥
जम्बूद्वीपाद्बहिर्द्वीपाः परितः स्वसमैर्वृताः ।
सिन्धुभिस्ते पुराणोक्ताः क्रमद्विगुणविस्तृताः ॥ २० ॥
प्रान्तस्थपुष्करद्वीपमध्यगे वलयाकृतौ ।
भ्रमत्यर्करथार्यूर्द्ध्वं मानसोत्तरपर्व्वते ॥ २१ ॥
द्वीपाब्धीनां बहिः स्वर्णभूलोकालोकपर्व्वतौ ।
गर्भोदस्तद्बहिर्ब्रह्मकटाहः क्ष्मादिभिर्वृतः ॥ २२ ॥
भानुर्भ्रमति भूपृष्ठाल्लक्षयोजनदूरगः ।
मज्जन्नुदधिवाभाति तिर्य्यङ्ङत्यन्तदूरगः ॥ २३ ॥
भ्राम्यन्ति चन्द्रभौमाद्या उपर्य्युपरि सूर्य्यतः ।
ध्रुवान्ताः स च मेरूर्द्ध्वं ततो लोकाः स्थिता इति ॥ २४ ॥
बौद्धास्तु भभ्रमालोकान्निराधारां कुमब्रुवन् ।
खेऽधो यान्तीक्ष्य खस्थस्यादर्शनाद्गुरुवस्तुनः ॥ २५ ॥

जैना वदन्ति सूर्य्येन्दू द्वौ द्वौ च भगणौ तथा ।
चतुष्कोणस्तम्भरूपं मेरुं मध्यगतं स्थिरम् ॥ २६ ॥
पर्य्येति भूर्जलान्तःस्था तस्मादर्कोदयो जनैः ।
त एकान्तरमुद्यन्तो दृश्यन्ते मेरुकोणतः ॥ २७ ॥
इंलण्डपण्डिताः सूक्ष्ममतयः कथयन्ति च ।
भूगोलो वर्त्तुलः क्षुद्रो भौमादिग्रहवद्दिवि ॥ २८ ॥
खमध्यस्थवृहत्सूर्य्यविम्बस्यावयवभ्रमैः ।
आकृष्टश्चक्रवद्भ्रान्तिं क्रान्तिवृत्ते व्रजत्यसौ ॥ २९ ॥
सपादाशुगषड्भि३६५।१५दिनैः पूर्व्वगतिक्रमात् ।
भगणः स्वतनूद्भ्रान्त्या द्युरात्रं चास्य सम्भवेत् ॥ ३० ॥
इत्थं गतिर्द्विधा भूमेराह्निकी वार्षिकीति च ।
भ्रमन्त्याः स्वतनोर्यस्मान्नित्यं स्थानान्तरस्थितिः ॥ ३१ ॥
न पतन्ति जना भूमेर्मध्याकर्षणशक्तितः ।
पश्यन्त्यर्कादिकान् भ्रान्तान्नाविका हि नगानिव ॥ ३२ ॥
भुवि मेषादिनिष्ठायां तुलादौ दृश्यते रविः ।
दक्षिणोत्तरगायान्तु सौम्ययाम्यापमौ तथा ॥ ३२ ॥
बुधशुक्रावनीभौमगुरुमन्दाः क्रमाद्रवेः ।
दूरत्वान्मन्दगतयः परिगच्छन्ति तं प्रति ॥ ३४ ॥
तान् प्रत्युपग्रहाः क्षुद्रा भ्रमन्तस्तैः समं पुनः ।
भ्रमन्त्यर्कं यथाकृष्टो भुवेन्दुस्तां प्रति भ्रमन् ॥ ३५ ॥
भ्रान्तिरुत्ताप आलोक ऋतुभेदाश्च सूर्य्यतः ।
भुवि ग्रहेषु कार्य्याणि सर्व्वाणि स्युरभेदतः ॥ ३६ ॥
इति स्थिते ग्रहगतिग्रहणाद्यत्र दृक्समम् ।
वृहदाकर्षणात्क्षुद्रभ्रान्तिर्न्याय्या भवत्यपि ॥ ३७ ॥

सिद्धान्तेषु स्थिरा पृथ्वी गदिता व्योममध्यगा ।
हृतेन्दुज्ञसितार्कारगुरुमन्दर्क्षवर्त्मभिः ॥ ३८ ॥
आर्य्यभट्टोऽब्रवीद्भूः खे स्वस्थानस्था भ्रमत्यतः ।
प्रत्यग्गतिर्भचक्रस्य प्राग्यातेर्दृश्यते जनैः ॥ ३९ ॥
साम्प्रतं भवता सोक्ता सूर्याभिभ्रमकारिभिः ।
ग्रहैस्तेन परीतास्ते भ्रमता विधुनेति च ॥ ४० ॥
ग्रहाणां योजनगतिस्तुल्येति प्राज्ञया श्रुता ।
त्वत्तस्तु विषमेत्यत्र केयं सृष्टिर्नवा तव ॥ ४१ ॥
विविधा श्रूयते सृष्टिरैश्वरी तत्र का सती ।
केन क्रमेण रचिता ग्रहाद्या वसुमत्यपि ॥ ४२ ॥
किमाकारा किमाधारा सा धरा कतिसागरा ।
द्वीपैर्धराधरैर्व्योम्ना कथं कतिनराश्रिता ॥ ४३ ॥
कियन्तौ परिधिव्यासौ किं फलं पृष्ठजं घनम् ।
ऊर्द्ध्वाधरस्थलोकानां ज्योतिषां कीदृशी स्थितिः ॥ ४४ ॥
चेतनाचेतनावासो यथा भूपृष्ठगर्भयोः ।
चन्द्रभौमादिबिम्बेषु तथास्ते किं न वा स्थितिः ॥ ४५ ॥
ग्रहाणां कल्पभगणा ये सिद्धान्तेषु कीर्त्तिताः ।
तेषां दृक्सिद्धिराहित्यादार्य्यभट्टादिभिः पुनः ॥ ४६ ॥
कल्पिता दृक्समास्ते ते भास्कराद्यैर्निराकृताः ।
तैर्यैः स्थिरीकृतास्तेभ्यो भगणा भवदीरिताः ॥ ४७ ॥
विषमाश्चेत्तदामीषां स्थैर्य्यं किं मानमुच्यताम् ।
विपर्य्येष्यन्ति चेदेते भवित्री का गतिस्तदा ॥ ४८ ॥
यदि संवत्सराः षष्टिर्मध्येज्यग्रहभोगजाः ।
तदा तस्मिन्नजादिस्थे कथं न प्रभवादयः ॥ ४९ ॥

पदकानां कथं सृष्टिः खेटानान्तु स्फुटीकृतिः ।
भूमावेव समा किंवा यत्र कुत्रापि सा भवेत् ॥ ५० ॥
पूर्व्वैः कृतं कुजादीनां सिद्धौ कर्म्मचतुष्टयम् ।
अधिकं यत्त्वयोक्तं तत् किं नाम ज्ञार्किभूभुवाम् ॥ ५१ ॥
सम्भवः परिधीनां स्यात् कथं द्राङ्मन्दजन्मनाम् ।
वैषम्यं स्यात् कथं तेषामोजयुग्मपदान्तयोः ॥ ५२ ॥
केन्द्रभ्रमः कथं बाह्वोः फलं मेषतुलादिजम् ।
धनर्णाख्यं कथं भुक्तेः कर्किनक्रादिजं तथा ॥ ५३ ॥
सिद्धांश२४सम्मिता क्रान्तिः सिद्धान्तेष्वखिलेष्वपि ।
त्वयोक्तार्द्धांशहीना किं सौम्ये याम्येऽपमे कथम् ॥ ५४ ॥
क्षयवृद्धिविपर्य्यासो दिनरात्र्योर्भवेद्भुवि ।
क्रान्तिवृत्तस्थराशीनामुदया न समाः कुतः ॥ ५५ ॥
तपर्त्तौ दुःसहः किं स्यादातपः शिशिरे सुखः ।
ग्रीष्मान्ते किम्प्रवर्षन्ति नान्यर्त्तौ किं तथा घनाः ॥ ५६ ॥
मानं सूर्य्यस्य पूर्व्वोक्तादेकादशगुणं कथम् ।
ऊनं चन्द्रस्य किं ब्रूषे कथं तद्ग्रहणद्वयम् ॥ ५७ ॥
चन्द्रग्रहणवत्पर्व्वसन्धौ मध्यग्रहो रवेः ।
न स्याद्यस्माद्वदास्यापि लम्बनस्याल्पभूरिताम् ॥ ५८ ॥
विज्ञातुं परमग्रासं पर्व्वलम्बनसंस्कृतम् ।
सिद्धं चेत्तस्य किं प्रोक्तः संस्कारः शरजः पुनः ॥ ५९ ॥
लम्बनेऽवनती मध्यलग्नवित्रिभलग्नयोः ।
कः साधुः साधितः कस्मात् शराच्चः प्राङ्नु विश्रुतः ॥ ६० ॥
आदिमध्यावसानेषु द्युमणिग्रहणस्य ते ।
शङ्कुः किं कल्पितोऽपूर्व्वस्तमोमण्डलाश्रये ॥ ६१ ॥

किं नार्कग्रहवच्चान्द्रे ग्रासबाणदिगेकता ।
वलनस्यापि दिग्भेदः किं प्राक्प्रत्यक्कपालयोः ॥ ६२ ॥
येषां येषां युतिर्दृष्टा खेटानां भूमिपृष्ठगैः ।
कियद्भिर्योजनैरिष्टं तत्तत्कक्षान्तरं त्वया ॥ ६३ ॥
दृक्कर्मण्यायने मध्यविशिखस्य स्फुटीकृतौ ।
न्यूनतायाति सर्व्वत्र पुरावित्साधनक्रमात् ॥ ६४ ॥
भवन्मते तु सूक्ष्मस्य स्फुटस्य विशिखस्य किम् ।
क्रान्तिसंस्कारयोग्यस्य मध्यतोऽधिकतेष्यते ॥ ६५ ॥
ग्रहोडुभिर्बहुतरैर्विहायसि महीयसि ।
व्याप्तेऽपि निशि किं न स्यादह्नीव तमोहतिः ॥ ६६ ॥
सूर्य्यस्य किरणव्याप्तिः कतियोजनसम्मिता ।
कियती सा ग्रहर्क्षाणां कियद्दूरे च दृश्यता ॥ ६७ ॥
खखानि कुदिनानि स्युर्ग्रहाणां गतियोजनैः ।
खकक्षायोजनानीति श्रुतं यत्तदिह त्वया ॥ ६८ ॥
निरस्तकृतिवैषम्याद्यदि तद्वेष्टनं दिवः ।
भवन्मते कियन्मानं ब्रह्माण्डोदरनामकम् ॥ ६९ ॥
ग्रहर्क्षास्तोदयौ यद्दृक्कर्मभ्यां त्वयोदितौ ।
तथा किं भवतो भेदौ न वा तन्निर्णयं वद ॥ ७० ॥
क्षीयमाणाः कला दैवैः पीयन्तेऽमृतदीधितेः ।
इति वादः पुराणानामनृतः किमृतो मतः ॥ ७१ ॥
पूर्व्वस्यां पश्चिमस्याञ्च प्रायशः शशिनो दिशि ।
उन्नतिः सौम्यशृङ्गस्य दृश्यते भारते कथम् ॥ ७२ ॥
रवीन्दुमार्गयोर्भूरिविप्रकर्षात् कथं भवेत् ।
भूदृष्टक्रान्तिसाम्योत्थपाते तद्दृक्सङ्गतिः ॥ ७३ ॥

किम्भ्रमन्ति न वा लोकाः प्रवहाद्ग्रहरादयः ।
दिनाब्दमासहोराणामधिपानां क्रमश्च कः ॥ ७४ ॥

स्यातां भानोर्यदि दिननिशे दर्शनादर्शनाभ्यां
नाड़ीषष्ट्या द्युनिशमवनौ युक्तमासीत्तदा नः ।
पैत्रं मासा किमु शशिभुवा दैवमर्काब्दतः किं
ब्राह्मं खाभ्राम्बरभुजमितै.२००० किं युगैः स्यात्तदेव ॥ ७५ ॥

कतिविधः प्रलयः कतिधाः समाः समयबोधकयन्त्रमहो कथम् ।
नभसि भग्रहभांशकलामितौ भवति किं करणं भवदीप्सितः ॥७६॥

षड़ृतवः प्रभवन्ति कथं क्षितौ
किमु समा न समाः किमु सर्व्वतः ।
उपकृतिर्भगणाज्जगतोऽस्ति का
जगदिदं गमनादिति नास्तिकाः ॥ ७७ ॥

यदवदन्नद उत्तरमस्ति किं
शशितनावसितं किमुतेच्यते ।
किमसमाधिमतामपि मोक्षदं
यदनुगैः सुलभं परमं पदम् ॥ ७८ ॥

श्रमभृते कलयन्ति कथं जना-
स्तिथिमुखाङ्गमतीतमनागतम् ।
कथय सर्व्वमिदं यदवेत्थ मे
श्रमचयः शममेष्यति दुर्द्दमः ॥ ७९ ॥

जलजनाभिविभूषणविग्रहो
जलजसम्भवराजदनुग्रहः ।
जलजनाजनिकारणदर्शनो
जलजनाभिरभीतिकरोऽस्तु नः ॥ ८० ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृती गणितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाहितवान् [illegible]
प्रश्नान्वितो व्यरचि षोडशकः प्रकाशः ॥ ८१ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे गोलाधिकारे
प्रश्नवर्णनो नाम षोड़शः प्रकाशः ।

सप्तदशः प्रकाशः ।

भूगोलस्थितिवर्णनम् ।

सच्छास्त्रगुच्छात्कतिचिद्विशेषान् सच्छात्रपृच्छाच्छलतः प्रदर्श्य ।
तत्सारभूतोत्तरमार्य्यवाचा यच्छामि वत्सावहिताः सतत्त्वाः ॥ १ ॥
प्रत्यक्षशब्दानुमितिप्रमाणैर्व्यवस्थया* च स्थिरता स्थिरायाः ।
अहस्करादेश्चलताखिलानां गोलाकृतित्वं प्रतिपाद्यतेऽत्र ॥ २ ॥
भूगोलः सौम्यशुक्रावनितनयसुराचार्य्यसूर्य्यात्मजानां
कक्षावृत्तैर्वृतश्चास्फुटदिवसकृतः कक्षया वेष्टितोऽयम् ।
मध्ये† दूरेऽन्तिके च स्फुटरविभगणर्क्षेशकक्षापरीत-
स्तिष्ठत्यण्डस्य मध्ये नभसि किल सदाधारशून्यः स्वशक्त्या ॥ ३ ॥
शिरोमणौ—सर्व्वतः पर्व्वतारामग्रामचैत्यचयैश्चितः ।
कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव । इति ॥ ४ ॥

---

* परपक्षनिषेधपूर्व्वकस्वपक्षस्थापनेन ; यथोक्तकथनं नाम व्यवस्था ।

† मध्यसूर्य्यस्य ।

समायमेव सिद्धान्तो मतान्तरविधायकान् ।
कांश्चित्प्रत्युत्तरं यच्छन्निमं कुर्व्वे सुनिर्म्मलम् ॥ ५ ॥

सूर्य्यसिद्धान्ते—मध्ये सम[illegible]ण्डस्य भूगोलो व्योम्नि तिष्ठति ।
बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् । इति ॥ ६ ॥

शि –मूर्त्तो धर्त्ता चेद्धरित्र्यास्तदन्य-
स्तस्याप्यन्योऽप्येवमत्रानवस्था ।
अन्त्ये कल्प्या चेन्न शक्तिः किमाद्ये
किं नो भूमिः साष्टमूर्त्तेश्च मूर्त्तिः । इति ॥ ७ ॥

कूर्म्मादीनामतो भूमेर्यत्किञ्चित्खण्डधारणात् ।
सङ्गच्छते धारकत्वं न तु कृत्स्नमहीधृतेः ॥ ८ ॥
भूधृताः पर्व्वता यद्वद्भूधरा इति कीर्त्तिताः ।
तथाधारत्वमेतेषामुक्तं भूधायिनामपि ॥ ९ ॥
भूभारखिन्ननागेन्द्रशीर्षविश्रामसम्भवः ।
भूकम्प इति यद्वाक्यं तत् क्वचित् खण्डधारणे ॥ १० ॥
समाधेयं हि भूगोले लोकादृष्टवशात् क्वचित् ।
अङ्गस्फुरणवत्कम्पो जातोऽस्त्युपचर्य्यते ॥ ११ ॥
यथा स्वमध्यं प्रति सन्निकृष्टमाकृष्यमाणं* परमाणुभूम्नः ।
क्रमेण वेगात्पततीव भाति द्रव्यं परासौ क्व पतत्वनन्ते ॥ १२ ॥

ब्रह्मसिद्धान्ते – पञ्चाशत्कोटिविस्तीर्णा केवलं कल्पिता मही ।
अल्पराज्यमदान्धानां विषादाय विरक्तये ॥ १३ ॥
सा कल्पना न च वृथा सत्या पीठादिपूजने । इति ।
सर्व्वत्र विषयारोपादेव सिद्धादुपासना ॥ १४ ॥

---

* द्रव्यम् ।

ब्रह्माण्डत्वं यथा देहे धमन्यामादिशक्तिता ।
आत्मनोंशस्य दासीत्वं तथैव स्थूलता क्षितेः ॥ १५ ॥
मण्डूकादिक्रमश्चेति सर्व्वमारोपितं बुधैः ।
ध्यानपूजाजपादीनां स्यात्पुष्टिस्तत्क्रमाद्यतः ॥ १६ ॥
सू—स्वल्पकायतया लोकाः स्वस्थानात्सर्व्वतो दिशम् ।
पश्यन्ति वृत्तामप्येतां चक्राकारां वसुन्धराम् । इति ॥१७॥
श्रि—यदि समा मुकुरोदरसन्निभा भगवती धरणी तरणिः क्षितेः ।
उपरि दूरगतोऽपि परिभ्रमन् किमु नरैरमरैरिव नेक्ष्यते ॥१८॥
यदि निशाजनकः कनकाचलः किमु तदन्तरगः स न दृश्यते ।
उदगयन्ननु मेरुरथांशुमान् कथमुदेति च दक्षिणभागके ॥ १९ ॥
समो यतः स्यात्परिधेः शतांशः पृथ्वी च पृथ्वी नितरां तनीयान् ।
नरश्च तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा ॥ २० ॥
पुरान्तरं चेदिदमुत्तरं स्यात् तदक्षविश्लेषलवैस्तदा किम् ।
चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः प्रमाणम् ॥ २१ ॥
निरक्षदेशात् क्षितिषोडशांशे भवेदवन्ती गणितेन यस्मात् ।
तदन्तरं षोडशसंगुणं स्याद्भूमानमस्मात् बहु किं तदुक्तम् । इति॥२२॥
भूमौ समायामतिदूरगस्य प्राच्यां रवेः स्याच्च गतिर्न दृश्या ।
ततोऽल्पदूरस्य विलम्बिता सा शीघ्रा खमध्ये जलदस्य यद्वत्॥२३॥
असङ्गतेयं यदहस्करादेर्गतिः पुरःपश्चिमभागयोः सा ।
पानीययन्त्रद्रुतशातकुम्भकुम्भभ्रमाभेक्षत एव साक्षात् ॥ २४ ॥
समुद्रमध्यादटतस्तटान्तं स्थूणाग्रमादौ तटगेन दृष्टम् ।
नरेण पोतस्य ततस्तदर्द्धं सर्व्वं क्रमादन्तिकवर्त्तिनः स्यात् ॥ २५ ॥
वृत्ता न चेत् क्ष्मा समवारिमध्ये दृक्पोतयोस्तद्व्यवधापि न स्यात्।
चन्द्रग्रहे तद्गतभूप्रभाया न वृत्तता स्यात् समयेऽखिलेऽपि ॥ २६ ॥

न स्याच्च देशान्तरनाड़िकाद्यमथ क्षयर्द्धीक्षणतः सुधांशोः।
गोलत्वमायाति भभानुमुख्या गोलाः पुरोक्ताः श्रुतिदृष्टिमद्भिः॥२७॥
वदन्त्यनन्तेति धरां नरा ये भाषा च तेषाममृषा मता मे।
परार्द्धवारान् भ्रमतामरेण यद्गोलपृष्ठस्य न लभ्यतेऽन्तः ॥ २८ ॥
सूर्य्योपरीन्दोः स्थितिरन्यखेटस्थानं भचक्रोपरि या पुरोक्तिः।
स्वर्गस्थतत्तत्पुरपेक्षया सा न तु भ्रमज्ज्योतिरपेक्षयैव ॥ २९ ॥
किं वा कुरुक्षेत्र उपेन्द्र इन्द्रपुत्राय सन्दर्शितविश्वरूपः।
एकार्णवीभूतमहीतले च मृकण्डपुत्राय निजोदरस्थम् ॥ ३० ॥
अदर्शयद्विश्वमसौ सभायां स्वविश्वरूपं धृतराष्ट्रपुत्रे।
यद्भूमिपृष्ठे घटवत्सुदृष्टं क्वचित्प्रदेशे किल विश्वरूपम् ॥ २१ ॥
तदस्मदावासभुवस्तदेव प्रभिद्यते तत्र पुराणसिद्धाः।
भूभूधराम्भोनिधिभानुभाद्यास्तिष्ठन्तु सिद्धान्तभुवः क्षतिः का॥२२॥
शि—भूः खेऽध. खलु यातीति बुद्धिर्बौद्ध मुधा कथम्।
यातायातन्तु दृष्ट्वापि खे यत्क्षिप्तगुरु क्षितिम् ॥ ३३ ॥
किं चान्यत्तव वैगुण्यं द्वैगुण्यं यो वृथा कृथाः।
भार्केन्दूनां विलोक्याज्ञा ध्रुवमत्स्यपरिभ्रमम्। इति ॥ ३४ ॥
सौम्ये मीनाकृतिर्भानां ध्रुवमत्स्य इति श्रुता।
ध्रुवस्तन्मुखदेशस्थः पुच्छे तारा ततोऽवरा ॥ ३५ ॥
विशाखा समसूत्रे सा तिष्ठत्यङ्केन्दु१९भागके।
मुखपुच्छान्तरे बह्व्यस्ताराः पङ्क्तिद्वये स्थिताः ॥ ३६ ॥
विशाखास्थोऽस्तमेत्यर्को यदा तत्पुच्छगा तदा।
तारका पश्चिमस्था स्यान्निशार्द्धेऽधो गता ध्रुवात् ॥ ३७ ॥
प्रातरुद्यद्रवेः सूत्रे प्राच्यां तिष्ठति सा यतः।
तदर्कद्वितयं कुत्र सम्भवेद्भ्रातरुच्यताम् ॥ ३८ ॥

अतिसूक्ष्ममते यदि तेऽस्ति मते स्थिरता तरणेश्चलता धरणेः ।
निजवाक्यखण्डितपण्डित तच्छृणु मद्गिरमाहृण चात्मवचः ॥ ३८ ॥

इयं भूर्निश्चला साक्षाल्लक्ष्यते निखिलैर्जनैः ।
भ्रान्तिश्च रविबिम्बस्य किं फलं ते विपर्य्ययात् ॥ ४० ॥

चलत्तरणिगो जनः स्ववसतिं स्थिरां मन्यते
तटस्थविटपिव्रजं स विपरिव्रजन्तं पुनः ।
उदस्तमपि हस्तगं गगनतः पतत्कन्दुकं
प्रप[illegible]र तथा क्षितिगता इतीच्चास्ति चेत् ॥ ४१ ॥

तदा [illegible]रिम्मुखप्रजविना विना चेत् करे
बिभर्त्त्युपरि यष्टिकां शिखरजुष्टचीनांशुकाम् ।
पुरः प्रवहदाशुगप्रचलितं तदालोक्यते
सदा वरुणदिङ्मुखं किमवनौ पराशामरुत् ॥ ४२ ॥

यदि प्रवहकर्षणात् व्रजति पश्चिमाशां ग्रहः
तदा कथमसौ पुरो गतिमवाप्तुमीष्टे ततः ।
इदं वदसि चेद्धराभ्रमणपूर्व्वकृष्टा घनाः
खगाश्च कथमीशते प्रचलितुं प्रतीचीं प्रति ॥ ४३ ॥

पुराणसिद्धान्तिभिराप्तपूरुषैः
स्थिरेति शब्दो धरणादुरीकृतः ।
न चेत्प्रमाणीक्रियते त्वयाप्तवाक्
कथं प्रवृत्तिर्भवति स्वकर्मसु ॥ ४४ ॥

प्रतिक्षणं गच्छति यत्ततो जग-
ज्जगाद चेदित्थमदोऽर्थविद्भवान् ।
चतुर्व्विधं याति लयं जगत्त्रयं
ततोऽपि किं नार्थसमन्वयं व्रजेत् ॥ ४५ ॥

इतोऽन्यथार्थैः क्रियते यदा तदा स्थिरेति किं भूरचलेति कथ्यते ।
चराचराधारतयाथवा धरा जगत्स्थिरेत्येव समीरिता बुधैः ॥ ४६ ॥
न शब्दमङ्गीकुरुतेऽनुमानवानमानवाचारलवाङ्गवान् यदि ।
तदा तदाविष्क्रियया मया स्यात्प्रमा समाधानकृते प्रतायते ॥४७॥

यथार्थ्यमाकृष्टबुधादयो ग्रहा
भ्रमत्स्वदेहाः परियान्ति सन्ततम् ।
स्वकक्षयापक्रमयुक्तया तथा
यथात्मनः क्ष्मा भ्रमतीति ते [illegible] ॥

न स्याद्गतिः शक्तिमतेऽखिलस्य साकर्षविक्षेपवश[illegible]वा चेत् ।
केन्द्राभिकर्षिण्यभिधा तदाद्या केन्द्रापसारिण्यपरोच्यते सा ॥ ४९ ॥
पराणुबाहुल्यसमुद्भवाद्या दृष्टा गुरुत्वावगमाद्धरित्र्याम् ।
तत्रापतद्गोलकपिण्डशश्वत्परिभ्रमोऽस्माभिरलक्षि नैव ॥ ५० ॥
प्रक्षिप्तलोष्टे क्षणतोऽपरस्यां शक्तौ च गोलभ्रमसम्भवो न ।
समक्षितौ क्षेपवशेन गोलः किन्त्वीक्ष्यते यान् परिवर्त्तमानः ॥ ५१ ॥
स चेद्वरत्राग्रथितः करेण क्षिप्येत शश्वद्भ्रमता तदाभ्रे ।
शक्तिद्वयाकर्षवशान्न केन्द्रे लगेन्न निर्याति परिभ्रमेत्तु ॥ ५२ ॥
इत्थं स्वकेन्द्रार्य्यमशक्तियुग्मनद्धा परिभ्राम्यति चेद्धरित्री ।
सूर्य्याभिमुख्येन विना तदास्या न स्यात्कदाचिद्गतिरन्यथैव ॥ ५३
आस्तां तदित्यात्थ यदि त्वमस्या व्यक्तैकदेशे रविसम्मुखस्थे ।
यत्राहरत्रापि भवेन्न रात्रिः सा यत्र तत्रेत्थमहः कदाचित् ॥ ५४ ॥
किंवा समक्ष्मापरिवर्त्तमानसद्वृत्तपिण्डोपमया पृथिव्याः ।
स्वभ्रान्तिवादस्तव चेदियं तत्प्राप्नोतु चक्रभ्रमिमन्तरीक्षे ॥ ५५ ॥

स्ववेष्टनं यावदियं हि तावत्
दिने दिने यातु पुरःप्रदेशम् ।

स्यात्त्वन्मते स्वभ्रमणं दिनेऽभ्र-
खाभ्राक्षिभू१२०००क्रोशपरिध्यवन्याः ॥ ५६ ॥
पुरोगतिश्चाष्टखनिघ्नलक्ष८०००००-
क्रोशप्रमा सा कथमत्र युक्ता ।
सा वास्तु तस्याः समपूर्व्वदेह-
भ्रान्तौ कथं क्रान्तिपथे गतिः स्यात् ॥ ५७ ॥
ईशानदिङ्मुखे मार्गे गच्छतः पुरुषस्य हि ।
पूर्व्वाभिमुखता भ्रातः कथं सङ्गच्छते वद ॥ ५८ ॥
किंवा पार्श्वगतिं भूमेः कर्कटस्येव मन्यसे ।
उपपन्ना न सा युक्तिर्निसर्गोपाधिभेदतः ॥ ५९ ॥
नैसर्गिकी कुलीरस्य सार्काकर्षणजा भुवः ।
तद्वते क्रान्तिसाम्मुख्याद्गतिरन्या न सम्भवेत् ॥ ६० ॥
विषुवद्वलयस्थेन्दुकलङ्को दक्षिणेऽयने ।
आग्नेयदिङ्मुखो दृष्टः सौम्ये त्वैशान्यदिङ्मुखः ॥ ६१ ॥
तत्कक्षान्तर्गतच्छाया ग्रहवद्भ्रान्तिरस्ति चेत् ।
सदा स्वायनसाम्मुख्यं ध्रुवं भवितुमर्हति ॥ ६२ ॥
स्वायनव्यस्तविक्षेपसद्भावपि न चेद्विधुः ।
जहाति क्रान्तिसाम्मुख्यं स्वानिषुस्तत्कथं त्यजेत् ॥ ६३ ॥
खे वा क्षिप्तं व्रजतु कुशलैर्घूर्णमानं दधित्थं
चक्रं च क्राम्यतु भुवि दिवि स्यन्दनस्थं करस्थम् ।
पृथ्वीपृष्ठे लुठतु कठिनीगोलकः खेलया वा
देहभ्रान्तिर्न भवति विना स्वस्वमार्गाभिमुख्यात् ॥ ६४ ॥
यदि भ्रामं भ्रामं भ्रमति धरणी क्रान्तिपथगा
तिरश्चीना भानां पतिरिव तदा वासिपुरुषैः ।

स्वपूर्व्वाद्याशास्थद्रुमधरणिभृत्कोणगमने
सुलक्ष्यो दिग्भेदः प्रतिदिनमुडूनां तदुदये ॥ ६५ ॥
स्वकक्षावृत्ते भवतु सवितुर्भूरभिमुखी
मयास्याः क्रान्त्यृज्वावपवलयदैर्घ्याद्गतिपथः ।
दिशोर्याम्योदीच्योर्गुरुवदृजुरिष्टो वदसि चेत्
इति क्ष्मायां दृश्यस्तनुरयनसन्धौ दिनकरः ॥ ६६ ॥
विदूरोऽथ स्थूलो विषुवति भुवः सन्निधिवशा-
न्निशानाथस्येत्थं शरसुसरलेऽपक्रमपथे ।
क्व साम्मुख्यासख्यं प्रतिरजनि लक्ष्म क्षितिगतै-
र्विभिन्नाकारं यत्तदवनिगतिर्नात्र घटते ॥ ६७ ॥
केन्द्राभिमुख्यघटनाकृष्टस्यास्तां तथापि भूर्भ्रमति ।
अदिनकराभिमुख्यतया स्रष्टुः स्वेच्छावशात्क्रान्तौ ॥ ६८ ॥
इति यदि वदसि तदिच्छाप्रामाण्ये मन्यतां मही स्थाणुः ।
आकर्षणमुरु भानोः स्याच्चेत्किं नास्ति तत्क्ष्मायाः ॥ ६९ ॥
स्थिराश्मकान्तेन कृशेन यस्मादाकृष्यते तत् पृथुलोहपिण्डः ।
आकर्षणे कारणमेव शक्तिर्निसर्गजा नो पृथुता न तेजः ॥ ७० ॥
यदि क्षुद्रद्रव्यं भ्रमति बृहदाकर्षणबला-
न्न तु क्षुद्रं स्थूलभ्रमणकृदियं वास्तव तदा ।
स्वतन्त्रत्वे सा सम्भवति न पराधीनबलयो-
र्यतः सर्व्वाकर्षिण्युत भगवदिच्छा बलवती ॥ ७१ ॥
तडागान्तर्यष्टिं कृशतनुमनुक्रामति यथा
महानौः कैवर्त्ताचरणपरतन्त्रा जगदिदम् ।
तथा पर्य्येत्यर्कः पृथुरपि महेशाशयवशात्
त्रिलोकीलोकानामवनविधये सग्रहगणः ॥ ७२ ॥

सूर्यो वान्यग्रहो वा निजतनुपरितो भ्रान्तिमाप्नोतु तस्याः
का हानिर्भूस्थिरत्वे भवति वद सखे यस्य योऽस्ति स्वभावः ।
सोऽन्येषां दर्शनाप्तिं व्यभिचरति भवान् यन्त्रसाहाय्यवत्त्वात्
सर्वेषां भ्रान्तिदर्शी न किमुडुपतनोः पश्यति भ्रान्तिमारात् ॥७३॥
भ्रान्तिर्नीचग्रहाणां प्रभवति महतां खेचराणामिवेति
ब्रूते चेद्बुधानामिह दिवसकृता योऽस्ति सम्बन्ध एषः ।
चन्द्रादीनां स एव स्फुरति समतया ज्ञादिना किन्तु तेषा-
मर्थ्यमृणा कोऽपि नास्ते भ्रमणकरणमालोकतापद्वयान्यः ॥ ७४ ॥
किञ्चास्या विश्वधात्र्या रविसविधजुषः क्षुद्रमूर्तेः स्वदेह-
भ्रान्तिः षष्ट्या६० घटीभिर्विशिखरसगुणै३६५र्वासरैः पर्य्ययश्चेत् ।
तर्हि भानोर्दवीयान् कुपृथुरिन१२शरत्पर्य्ययस्तत्त्व२५दण्डैः
स्वाङ्गं पर्य्येति जीवस्तदिह मम मतः स्रष्टृदत्तः स्वभावः ॥ ७५ ॥
इच्छ्रुद्दलावयवभ्रमक्रमो भवेज्जवेनाल्पतनोः स नो इति ।
ब्रवीषि चेत्तत्त्वदिनैः कथं शनै रविः स्वबिम्बभ्रमभृन्महानहो ॥७६॥

शि—यथोष्णतार्कानलयोश्च शीतता
विधौ द्रुतिः के कठिनत्वमश्मनि ।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्रा वत वस्तुशक्तयः । इति ॥ ७७ ॥

जले यथा मृत्कण एति मज्जनं
महावहित्रं प्लवते हि दारवम् ।
स्थिराऽनिले स्थास्नुरियं तथा स्थिरा
निसर्गलघ्वर्कमुखाः खगाम्बराः ॥ ७८ ॥

किममूलः समूलो वा ग्रहाणां भगणक्रमः ।
सृष्ट्यादिमूलकोऽस्माभिरुक्तो युष्मतः स चेत् ॥ ७९ ॥

स्थाने निर्मूलकस्त्वेष मन्यते वा तथापि या ।
चक्रभोगाद्दिनगतिः सिद्धा सोभयथा समा ॥ ८० ॥
सर्व्वखेचरकक्षाणां केन्द्रं चेत्सूर्य्यमण्डलम् ।
तदा तस्य ज्ञसितयोः कुजेज्यार्कभुवां क्रमात् ॥ ८१ ॥
मध्यता शीघ्रतापातः सोऽस्त्विति त्वं ब्रवीषि चेत् ।
तदा परिधिभिः स्वीयैर्दृक्सिद्धैः शीघ्रमन्दजैः ॥ ८२ ॥
सर्व्वसंस्कारशालिन्यां विहितायां स्फुटीकृतौ ।
कन्यामीनस्थिते भानौ केन्द्रचक्रान्तिकस्थयोः ॥ ८३ ॥
भौमभार्गवयोर्दृश्यः प्रभेदः स्वस्थितेः क्रमात् ।
कलाभिर्द्विशरै(म५२)रब्धिसायकैः(शु५४) पुनरेतयोः ॥ ८४ ॥
चक्रार्द्धस्थितयोर्द्विरङ्गबाहुभि(म२६२)र्विशिखामरैः(शु३३५) ।
प्रभेदश्चेत्थमन्येषां दृश्येत परिधिक्रमात् ॥ ८५ ॥
तत्कथं सूर्य्यबिम्बस्य सम्भवेन्मध्यशीघ्रता ।
तमुरीकुर्व्वतः सर्व्वमध्यस्थत्वेन यत्नतः ॥ ८६ ॥
काकतालीयवत्क्वापि दृक्सिद्धावपि ते मतम् ।
नास्माभिर्मन्यते साधु कदाचित्कं प्रमादभिः ॥ ८७ ॥
सर्व्वग्रहाणां भ्रमिकृत्केन्द्रस्थो मध्यमो रविः ।
स्वीकार्य्यश्चेत्तदैव स्याद्दृक्सिद्धिः सार्व्वकालिकी ॥ ८८ ॥
स्फुटार्कस्येति केन्द्रत्वासिद्धावाकृष्यभावतः ।
निजोच्चदेवताकृष्टश्चन्द्रवत्क्रान्तिमेति सः ॥ ८९ ॥

चक्रार्द्धयोगाद्भृगुजस्य मन्दे फलाल्पभावादथ भूमिजस्य ।
परोच्चमन्दोच्चफलाल्पभेदात्तौ दृक्समौ वा भवदुक्तितः स्ताम् ॥९०॥
स्थित्वा खमध्येऽपममण्डलानुसारात्तनुभ्रान्तिमता सवित्रा ।
चाकृष्टकक्षाः सुतरां प्रयान्तु बुधादयः क्रान्तिपथेन खेटाः ॥ ९१ ॥

तयार्य्यमाकर्षितकक्षया भुवा विधुः समाकृष्टतनुः प्रयाति चेत् ।
तदा कुगोलभ्रमिसिद्धया दिशा प्रयातुमेवार्हति नान्यथा क्वचित्॥९२॥
क्षितिस्तथा क्रान्तिपथाभिमुख्यतो विदिक्ष्वपि स्याद्विषुवे ध्रुवेक्षणम् ।
न चापमस्तद्ध्रुवपार्श्वकभ्रमे भवेद्विधोरित्यचला चला कथम्॥९३॥
मन्दोच्चपातप्रभवा धरोर्द्ध्वयाम्योत्तरावस्थितिदृष्टिहेतोः ।
प्रतिव्यपादिभ्रममण्डलानां यौगाद्यदुत्पद्यत एव वृत्तम् ॥ ९४ ॥
त्वया तदेवोदितमत्र वृत्ताभासो ग्रहाणां सरणिर्यदेतत् ।
युक्ताश्च पातोच्चगतीक्षणात्ते क्षेपाभिकर्षात्मसुराः प्रदिष्टाः ॥ ९५ ॥
भवन्मते भूमिरियं ग्रहेभ्यो न भिद्यते तुल्यगुणाश्रितत्वात् ।
तथा सति स्थूलतराः पृथिव्या जीवादयः पातवशाद्विदूरम् ॥ ९६ ॥
विक्षेपमृच्छन्ति कथं क्षमा किं न क्षिप्यते शुक्रसमा त्वदुक्त्या ।
बिम्बानपेक्षो यदिषुस्तदस्या गुरोरपि क्षुद्र इतीर्य्यते चेत् ॥ ९७ ॥
क्षित्यां तदापि त्रिकलेषुसत्त्यां क्रान्तिप्रभेदाद्विषुवायनेषु ।
दृक्सिद्धभावात्तरणेर्न हि स्याद्ग्रहप्रभाकालविलग्नसिद्धिः ॥ ९८ ॥
अतः शराभावत एव साक्षान्निश्चीयते निश्चलताचलायाः ।
यद्गोलयोः सायनभागभानोर्न क्रान्तिभेदोऽपि तनुर्भुजैक्ये ॥ ९९ ॥
यथा रवेर्नास्ति शरो मते ते तथा भुवो मन्मत एवमात्थ ।
चेत् खेटकक्षोदरपार्श्वकेन्द्रस्थितेर्महत्त्वादतिभास्वरत्वात् ॥ १०० ॥
भानोर्ग्रहेभ्यो बहुभेदलाभात् प्रत्यक्षतोऽमानि मयेष्वभावः ।
बुधादिसाधर्म्म्यजुषः पृथिव्याः स चेन्निसर्गादचलैव सास्ताम्॥१०१॥
भूधर्म्मिणो भौममुखा यदि स्युः सर्व्वर्त्तुमन्तस्तदिमान् किमन्तः ।
स्ववारिवाष्पोद्भवमेघसङ्घानाच्छादयन्त्यर्कममाप्रभीव ॥ १०२ ॥
मृण्मय्यसौ भूर्महती ग्रहास्ते तोयात्मकाः क्षुद्रनिजप्रमाणाः ।
विरुद्धधर्म्मावत एव पृथ्वीताराग्रहौ स्थास्नुचलौ क्रमात् स्तः॥१०३॥

भास्वत्करोत्तप्तमृदन्तिकस्थादुद्गत्य बाष्पाणि जलाद्घनाः स्युः ।
न केवलात्तोयमयग्रहेषु तत्सम्भवो वस्तुत एव नास्ते ॥ १०४ ॥
यष्ट्यग्रयुग्मग्रथिताल्पभूरिमूर्त्तिपिण्डयोर्यत्र धृतौ तुला स्यात् ।
तद्भारकेन्द्राख्यमुदीर्य्यतेऽस्याः स्थानभ्रमे तद्ग्रहणात्प्रवृत्ते ॥ १०५ ॥
क्षुद्रस्य पिण्डस्य बृहत्प्रमाणं स्यान्मण्डलं भ्रान्तिभवं गुरोस्तु ।
अल्पायतं तद्धरणीतरण्योरस्यां क्रियायां परिकल्पितायाम् ॥१०६॥
तद्भारकेन्द्रं रविबिम्बमध्ये पतत्यतस्तिष्ठति तत् खमध्ये ।
क्ष्मा दूरगा भ्राम्यति युक्तिरेषा तवास्ति चेत्सापि भवेत् सदोषा॥१०७॥
यत्त्वन्मते घनफलेन५१२३४२००४६७७०७ गुरो४६०८२र्विभक्ताद्-
भास्वद्घनात्४५९२६४६२९१२३५३८८२फलमभूद्रसगोऽष्ट८९६सङ्ख्यं।
सैकैत८९७दाममुभयान्तरवर्त्म२४५००००००लब्धं
क्रोशात्मकं धृतिनखाचलबाहु२७२०१८सङ्ख्यम् ॥ १०८ ॥

यन्मध्यतो रवितनोरियतान्तरेण
स्याद्भारकेन्द्रमधिकं रविमण्डलार्द्धात् ।
सार्द्धेन्दुभूपभुजदृग्भुज२२१६१॥सम्मितात्तद्-
बाह्ये पतत्यत इनस्य कथं स्थिरत्वम् ॥ १०९ ॥

अत्रापि सूर्य्याभिमुखत्वसिद्धिः सर्व्वग्रहाणां समकालता च ।
कक्षाभ्रमे सम्भवतीत्यसिद्धा तत्कल्पनानल्पमते कृता किम् ॥११०॥
न वास्तवी तद्घटना ग्रहेषु भवेद्गुरुत्वं यदमीषु नास्ते ।
केन्द्राभिकृष्टे गुरुतैव वस्तुन्युक्तं प्रसङ्गात्पठतां हिताय ॥ १११ ॥
भ्राम्यद्धरापृष्ठगतुङ्गवेश्मशृङ्गस्य रेखाभ्रमिमण्डलोत्था ।
महत्यतस्तत्पतदश्मखण्डभूसङ्गतिः स्यात् पुरतश्च किञ्चित् ॥ ११२ ॥
भूभ्रान्त्यभावे पतनं न हीत्थं स्यादित्यवादीर्यदि तन्न युक्तम् ।
भूवायुरत्रावहनामधेयः प्रत्यग्दिशो वाति सदैव धीरः ॥ ११३ ॥

यत्प्रेर्य्यमाणास्तृणराजवृक्षा प्रायेण पूर्व्वानतभावलक्ष्याः ।
पुनर्म्महीमध्यगरेखिकायाः प्रायो नतः प्राग्गतभूमिभागः ॥ ११४ ॥
अतः क्वचित्प्राचि पतेत्कदाचिदश्मादिकं न त्ववनिभ्रमेण ।
समे स्थले सावरणे तु सर्व्वस्याधोगतिः स्यादृजुरेखयैव ॥ ११५ ॥

यावद्दूरे यस्य यस्य ग्रहस्य
ब्रघ्नान्मध्यस्थानमास्ते तथैव ।
कालेन स्याद्यावता यस्य पूर्णो
भास्वद्बिम्बाभिभ्रमः पर्य्ययाख्यः ॥ ११६ ॥

तत्खेटार्कान्तःस्फुरद्योजनानां ये स्युर्घातद्वन्द्वजाता घनाङ्काः ।
तत्तत्कालस्यापि वर्गाङ्कका ये वर्गस्य स्याद्यो घनेनानुपातः ॥ ११७ ॥

अन्योऽन्यं स्यात् सर्व्वखेटस्य तुल्य
सोऽयं यद्वद्भूः शराङ्गाग्नि३६५वर्षैः ।
सप्ताष्टाङ्कै६८७र्मङ्गलोऽभिभ्रमेत् तद्-
वर्गद्वन्द्वस्याभवद्योऽनुपातः३।२१ ॥ ११८ ॥
सोऽयं खखखुखपञ्चाद्रिवेद४७५०००००-
क्रोशक्षोणीपद्धतेर्मध्यमायाः ।
खाभ्रव्योमाकाशतत्त्वाक्षिशैल७२२५००००-
क्रोशक्षोणीपुत्रमार्गस्य चापि ॥ ११९ ॥

सम्बन्धः३।२१ स्यात्क्ष्मेन्द्रसूर्य्याद्विनाङ्कद्वन्द्व*स्येत्थं तथ्यवद्युक्तमात्थ ।
व्यर्थीकर्त्तुं कम्पते तन्मनीषादोषाभासाद्दुष्यते क्वापि भाषा ॥१२०॥
न कार्य्यमुन्मीलति कारणादृते रविभ्रमादेव खगा भ्रमन्ति ते ।
अतोऽनुपातः किल कालमार्गयोर्ग्रहैः समं कर्त्तुमिनस्य युज्यते॥१२१॥

---

* भू १०७१७१८७५०००००००००००००००००, म१७७१४८५१५६२५००००००००००००।

यदोनबिम्बातिसमीपगो ग्रहः प्रकल्प्यते कश्चिदसौ भुवोऽम्बवत् ।
स यन्त्रबद्धकिरदखरांशुमण्डलभ्रमक्रमात्तत्त्व२५दिनैर्भ्रमेद्भुवम्॥१२२॥

तदन्तरं भास्करमध्यकेन्द्रतस्तदीयबिम्बार्द्धमितं भवेद्द्युतः ।
ततोऽत्र केन्द्रं सवितेति कल्पितं
स्वगोलपृष्ठं ग्रहकक्षिकेत्यपि ॥ १२३ ॥

तदन्तरालस्य* घनाङ्क†भाजिताद्बुधादिमार्गस्य घनाङ्कतः फलम् ।
यदेव तेन ज्ञसितादिकालजा कृतिर्हृता तत्फलतः पदं हि यत्॥१२४॥

भवेद्रवेः स्वभ्रमकाल एव तत्सपञ्चनाराचपलाङ्गनाडिकम्६।५२ ।
तदेकघस्रे नववारवेष्टनं विपादकं दृष्टिविरुद्धमापतेत् ॥ १२५ ॥

अथेषुपक्षा२५ भ्रमणस्य वासराः समत्वभावाद्यदि ते मताः स्थिराः।
तदान्यखेटभ्रमिकालवर्गतो रविभ्रमीवासरवर्गभाजितात् ॥ १२६ ॥

फलेन खेटान्तरदूरताघने हृते फलात् यद्घनमूलमागतम् ।
तदर्कबिम्बार्द्धमतोऽर्कविस्तृतिः
स्वमानतोऽङ्काग्नि३९गुणाधिका पतेत् ॥ १२७ ॥

स्वमानसिद्धौ भ्रमणं विरुध्यते भ्रमस्य सिद्धौ च विरुध्यते मितिः ।
स्वकारणस्योभयथेत्य सिद्धितः किमन्यकार्य्यभ्रमणानुपाततः ॥१२८॥

मध्यं रविं पर्य्ययतां ग्रहाणां स्यातः क्रमादन्तिकदूरवर्त्ती ।
चक्रार्द्धचक्रे चलकेन्द्र उक्ते ते मन्दकेन्द्रे रवितस्तथैव ॥ १२९ ॥

स्वीयैरेकविधैः सदा परिधिभिर्भौमादिकानां फलं
शैघ्र्यं मान्दभवं सुसिद्धमवनौ दृक्तुल्यतां याति चेत् ।
तन्नो भानुमता सह ग्रहगणः पर्य्येतु सर्व्वंसहां
भूसूर्य्यद्वयदिग्विशेषवशतोद्राक्केन्द्रतामिश्रयात् ॥ १३० ॥

---

* २२२१११॥० ।   † १०८६४८४१४७२९९८०७८९।४१२।१० ।

ओजाङ्घ्रगस्तनुषः कुजस्य परिधिस्त्र्यंशाधिको दृश्यते
सूर्य्याद्दूदिशि तत्परोच्चगत् इदं मन्द' समाकृष्यते ।
तेनाकर्षितविम्बतो मृदुफलं कौजं स्फुटं दृक्समं
शीघ्रोत्थेन फलेन किञ्चिदधिकं यन्मन्दकेन्द्राच्च तत् ॥ १२१ ॥

स्वौजमन्दचलफलोपचयात्फलस्य
मान्द्यस्य चापचयनिश्चयतश्चलस्य ।
मन्दोच्चकेन्द्रवशतो बहुताल्पता यत्
तत्सर्व्वमर्कबुयुगास्य तु केवलार्कात् ॥ १२२ ॥

इति क्षितिजसौम्ययोः क्षितिरविद्वयानुभ्रमे
स्फुटेऽल्पफलभेदतो भवति हि भुवोऽन्यभ्रमः ।
तथा रविरतः परिभ्रमति सर्व्वदिक्षु क्षितेर्ध्रुवं
खचरकक्षिका न घटतेऽन्यथा दृक्फलम् ॥ १२३ ॥

अतिदूरमृक्षमण्डलं तदवस्थाः खलु तारकाः स्थिराः ।
असमोर्ह्नभस्यवस्थिता रवयश्चेति बुधैः सुनिश्चिताः ॥ १३४ ॥
खगणैः परिवारितास्ततस्तलगा याश्च दिशास्तदन्तरम् ।
क्षितिभार्कमध्यमागतः खखखाभ्राष्ट८००००गुणाधिकं भवेत्॥१३५
रवितोऽपि बृहत्तनूधरा कथमेतामनुरूपिणीं भुवम् ।
उडवः परियान्तु तत्क्षमाभ्रमतस्त्वहतिरीक्ष्यते जनैः ॥ १३६ ॥
इति चेच्छृणु मन्यते तु तास्तलगा दक्षमुखाः कुमध्यतः ।
खरसाग्नि३६०गुणार्कमध्यमश्रुतितुल्ये पथि यान्ति नित्यशः॥१३७॥

यद्युग्मौजपदान्तशीघ्रपरिधेर्भागान्तरं दृश्यते
साक्षात् शीघ्रफले ततोऽस्मदुदिता सिद्धा भचक्रश्रुतिः ।
भूमेः कर्कटकक्रमात्स्वदुदितात् सा प्राङ्मुखी चेत् भ्रमत्यत्रापि
प्रभवत्यसङ्गतिरतः क्ष्माव्यत्ययोस्तर्कितः ॥ १३८ ॥

भूविम्बे धनुरन्तगे यदुदयद्युनर्क्षमालक्ष्यते
तस्मात् सप्तचतु४७र्लवान्तरगते युग्मान्तगेऽस्मिन्निदम् ।
दृश्येताष्टकलान्तरे यमदिशि स्थानात्ततस्तुल्यता
लोकादप्यवनिः स्थिरेति मयका निर्णीयते सर्व्वतः ॥ १३९ ॥

भानां चक्रं चलनरहितं चेत्तदा किं चलांशाः
साक्षाद्गच्छत्यनुभवमुदग्दक्षिणक्रान्त्यसाम्यात् ।
त्वं चेद्ब्रूषे तदपि चलनं क्रान्तिवृत्तस्य सिद्धं
न त्वृक्षाणामिति शृणु तदा तस्य सिद्धान्तमस्मात् ॥ १४० ॥

पूर्व्वाचार्य्यैर्ध्रुवशरलवा दृष्टिसिद्धा य उक्ता-
स्तत्तत्साम्यं त्वपमचलनाद्धिस्थिरत्वेन सिद्धेयत् ।
प्राक्कालोक्ता य इह विशिखाः सम्प्रतीष्यन्त एते
तस्माच्चक्रं प्रचलदभितो भाति सक्रान्तिवृत्तम् ॥ १४१ ॥

इत्थं भानामयनचलने निश्चिते सिद्धमेव
प्रत्यग्यानं प्रतिदिनमतो निश्चलैषा धरित्री ।
दिव्यज्योतिर्यदि भवलये सूर्य्यवद्द्योतमानं
तत्किं ध्वान्तं निशि न विलयं यात्यसङ्ख्योडुसत्त्वे ॥ १४२ ॥

यन्त्रे यस्मिन् शतगुणदृग्दृश्यते बिम्बमारात्
तस्मिन् दृष्टाद्वसु८कलमितैर्लुब्धकान्तैस्त्वग्रभाजः ।
द्रष्टुर्दृष्टिप्रतिहतिरपि स्यादिव स्वाङ्घ्रिमानाद्-
भानोर्यन्त्रान्तरगततनोर्यद्द्वयोः साम्यलाभः ॥ १४३ ॥

दूराधिक्याद्यदि हिमरुचो वाष्पसङ्घातजाता
तादृग्ज्योतिः क्षतिरितिमतिर्भाति भानां ततस्ते ।
तत्खेटानां विविधसरणिभ्राजतां बिम्बतुल्या-
स्तारा: किं तत्समरुचिभृतो भ्रान्तिकृतं हिमाद्यम् ॥ १४४ ॥

मेदीयस्त्वाद् यदि कुजमुखाः सुस्थिरालोकवन्त-
स्तारा दूराचलहिमसुखैरावृताः कम्प्रवत्यः ।
दृश्यन्ते तत् क्वचिदतिघनैश्छादिताः सन्तु लुप्ताः
स्वज्वालानां स्फुरणकरणं सिद्धमग्नेरिवातः ॥ १४५ ॥
व्यक्ते स्फीतविपिट उभयोः केन्द्रयोर्भ्रान्तिभूम्या
गोलस्थित्ते स्फुरति तव चेदार्द्रमृत्पिण्डतुल्यः ।
तद्द्वयेनायं* सदृगिति मतस्तत्फलं किं तथाभूत्
स्रष्टुः सृष्टिर्विसदृशगुणा किं मृषाभ्रान्तिकृतिः ॥ १४६ ॥
भूभ्रान्त्यैव भचक्रपश्चिमगमे सिद्धे किमायासतो
भभ्रान्त्यै प्रवहाख्यमारुतकृतिर्विष्णोरिदं वच्मि चेत् ।
ईशः सर्षपपर्व्वतौ स्थिरचलौ कर्त्तुं समर्थां निजां
शक्तिं व्यक्तुमिमां क्षमामचलयत्यत्रास्ति किं दूषणम् ॥ १४७ ॥
धर्म्माधर्म्मफलप्रदानविषये नृणां त्रिलोकेशितु-
र्निन्द्या दुर्घटना न तूपकरणैः खेलासु लीलाम्बुधेः ।
लोकस्य क्षणभङ्गुराल्पतनवे पाषाणरत्नादिभिः
प्राज्यायासकृतालयेष्वपि यतो दृष्टा प्रवृत्तिर्मुहुः ॥ १४८ ॥
यज्ञानाम्मनुजस्तथा विदधतु ज्ञानी तु सर्व्वेश्वरो
युतया क्रीडितुमर्हतीति तव चेदुक्तिर्मयात्रोच्यते ।
द्राक्षत्वीक्षगजादिनश्वरतया स्रष्टुः किमास्ते फलं
तेभ्यः काकशृगालकादिसुचिरस्थित्यास्ति कार्यञ्च किम् ॥१४९॥
यास्ते धरेभवहिरङ्गतटस्थशक्ति-
शुम्भाद्धुवरा निखिलसद्गुणजीवसद्म ।

---

* येन जलदम्बुविशेषफलेन ।

सच्छक्तिरान्तरतनुः परमेश्वरस्य
सांशैर्ग्रहैः परिवृतास्ति किमत्र चित्रम् ॥ १५० ॥

दिगाव्द्कान्त्युत्था त्रिविधगतिरित्याभिरवने-
रसिद्धा सिद्धान्तद्रुमफलनिभाभिर्भणितिभिः ।
रसास्वादादासां भवतु भवतां तुष्टमनसां
रसाभ्रान्तिक्षान्तिक्षतिरतितरामारतगिराम् ॥ १५१ ॥

तुल्यर्क्षोदयदर्शनाज्ज्ञकुजमान्द्यद्राक्फलप्रेक्षणा-
च्चन्द्राङ्कस्थितिदर्शनाद्गुरुलघुद्रव्यस्वभावेक्षणात् ।
आकृष्टस्य च कर्षकाभिमुखतासिद्धेः शरादर्शना-
दुष्णांशोरिति साधितं बहुविधैर्लिङ्गैः स्थिरत्वं क्षितौ ॥१५२॥

सिद्धान्तशेखरे — नभस्ययस्कान्तमहामणीनां
मध्यस्थितो लोहगुणो यथास्ते ।
आधारशून्योऽपि तथैव सर्वा-
धारो धरित्र्या ध्रुव एष गोलः । इति ॥ १५३ ॥

वाराहेऽपि — पञ्चमहाभूतमयस्तारागणपञ्जरे महीगोलः ।
खेऽयस्कान्तान्तःस्थो लोह इवावस्थितो वृत्तः । इति ॥१५४॥

तस्मात्तिष्ठति भूः प्रयाति सविता मूर्त्या स्वमध्याख्यया
बिभ्रत् खेचरचक्रमक्रमगतीर्वैतत् क्षितावीक्ष्यते ।
मत्सिद्धान्तमिमं विविच्य सकलं सन्तः प्रशंसन्तु वा
निन्दन्तु श्रमवेदिनो ह्युभयथा मंस्ये कृतार्थां कृतिम् ॥१५५॥

हे धीरा गणकाः समस्तसुहृदो बद्धाञ्जलिर्वच्म्यहं
या मेऽस्मिन्नजनिष्ट धार्ष्ट्यपटुता तां मार्ष्टुमिच्छास्तु वः ।
बालानां प्रतिपत्तये किल मया संवाददम्भादियं
भूनिष्ठा गदिता यथामति भवत्तोषात्सदोषा न वै ॥ १५६ ॥

आक्षोत्कर्षैः पूरुषैः सर्व्वथेष्टो
देवाकारे केनचिद्वक्ष्यमाने ।
तस्य स्याच्चेत्कर्कटाकारसिद्धि-
र्दैवाधीनो नास्ति दोषस्तदेषः ॥ १५७ ॥

ब्रह्माण्डं कारणाब्धौ चलतु जलबलाद्वा महावातवेगात्
किंवास्तामम्बरस्थं तदुपरि परितस्तात्पुराणादिसिद्धम् ।
सप्ताब्धिद्वीपभूभृत्प्रभृति सुविततं नास्ति तत्रास्मदुक्ति-
र्व्यक्तीभूततदण्डोदरगतधरणीनाद्यमुद्दिश्य दृश्यम् ॥ १५८ ॥

भूगोलभ्रान्तिवादो गतचरसमये न श्रुतोऽस्माद्युगाङ्घ्रेः
खाब्धीन्द्राब्दे१४४ व्यतीते सुविरल उदितः सौगतास्यावटाद्यः ।
तस्य प्रत्युक्तिमार्य्याः प्रतनु विदधिरे युक्तिभिर्भास्कराद्याः
सम्प्रत्यस्यातनुत्वात्प्रचुरमकरवं वाङ्मयं तत्प्रशान्त्यै ॥ १५९ ॥

सूर्य्यस्थैर्य्योक्तिसूतैः क्षितिगतिकृतिनां व्याजराजत्वमाप्तः
सिद्धान्तस्वर्णगोत्रः प्रकृतिमुपगतो यत्कृपास्पर्शनोत्थैः ।
अस्मज्जिह्वाग्रजाग्रत्कलनिधिवसनास्येमसद्युक्तिवह्नि-
ज्वालैर्भूयोऽपि सोऽयं कलयतु कुशलं श्रीलनीलाचलेन्दुः ॥ १६० ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
क्ष्माभ्रस्थितिर्व्यरचि सप्तदशप्रकाशः ॥ १६१ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे गोलाधिकारे
भूगोलस्थितिवर्णनो नाम सप्तदशप्रकाशः ।

अष्टादशः प्रकाशः ।

भूगोलविवरणम् ।

यम्प्रोचुर्भगवानिति श्रितजनाः साङ्ख्याश्च पातञ्जला
निर्लेपः पुरुषः परः शिव इति ब्रह्मेति वेदान्तिनः ।
न्यायज्ञाः परमात्मशब्दितमृतं कर्म्मेति मीमांसकाः
सौराद्याः कुलदैवतं किमपि तत्कृष्णाख्यतत्त्वं भजे ॥१॥
सृष्टिः प्राग्बहुधोदिता मुनिवरैस्तत्सारभूतां तदा
वक्ष्येऽन्यत्र कृतौ भविष्यति यदा सृष्टिं तदीया दया ।
सिद्धान्तग्रथनोचितामिह पुनः सौरोक्तरीत्या ब्रुवे
पूर्व्वप्रश्नगणानुवादविधिना संस्थानमानादि च ॥ २ ॥
सूर्य्यसिद्धान्ते - शृणुष्वैकमनास्तत्त्वं गुह्यमध्यात्मसंज्ञितम् ।
प्रवक्ष्याम्येव भक्तानां नादेयं विद्यते मम ॥ ३ ॥
वासुदेवः परं ब्रह्म तन्मूर्त्तिः पुरुषः परः ।
अव्यक्तो निर्गुणः शान्तः पञ्चविंशात्परोऽव्ययः ॥ ४ ॥
प्रकृत्यन्तर्गतो देही बोध्यमानस्तु सर्व्वगः ।
सङ्कर्षणोऽपः सृष्ट्वादौ तासु वीजमथासृजत् ॥ ५ ॥
तदण्डमभवद्धैमं सर्व्वमन्तस्तमोवृतम् ।
तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः ॥ ६ ॥
हिरण्यगर्भो भगवानेष छन्दसि पठ्यते ।
आदित्यो ह्यादिभूतत्वात्प्रसूत्या सूर्य्य उच्यते ॥ ७ ॥
परं ज्योतिस्तमःपारे सूर्य्योऽयं सवितेति च ।
पर्य्येति भुवनान्येष भावयन् भूतभावनः ॥ ८ ॥
प्रकाशात्मा तमोहन्ता महानित्येष विश्रुतः ।
ऋचोऽस्य मण्डलं सामान्युस्रा मूर्त्तिर्यजूंषि च ॥ ९ ॥

त्रयीमयोऽयं भगवान् कालात्मा कालकृद्विभुः ।
सर्व्वात्मा सर्व्वगः सूक्ष्मः सर्व्वमस्मिन् प्रतिष्ठितम् ॥ १० ॥
रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकम् ।
छन्दांस्यश्वाः सप्तयुक्ताः पर्य्यत्येष वशी सदा ॥ ११ ॥
त्रिपादममृतं गुह्यं पादोऽयं प्रकटोऽभवत् ।
सोऽहङ्कारं जगत् सृष्टुं ब्रह्माणमसृजत्प्रभुः ॥ १२ ॥
तस्मै वेदान् वरान् दत्त्वा सर्व्वलोकपितामहम् ।
प्रतिष्ठाप्याण्डमध्येऽथ स्वयं पर्य्येति भासयन् ॥ १३ ॥
अथ सृष्ट्यै मनश्चक्रे ब्रह्माहङ्कारमूर्त्तिमान् ।
मनसश्चन्द्रमा जज्ञे सूर्य्योऽग्नेस्तेजसां निधिः ॥ १४ ॥
मनसः खं ततो वायुरग्निरापो धरा क्रमात् ।
गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे ॥ १५ ॥
अग्निरापो भानुचन्द्रौ ततश्चाङ्गारकादयः ।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे ॥ १६ ॥
पुनर्द्वादशधात्मानं विदधे राशिसंज्ञकम् ।
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ॥ १७ ॥
ततश्चराचरं विश्वं निर्म्ममे देवपूर्व्वकम् ।
ऊर्द्ध्वमध्याधरेभ्यश्च स्रोतोभ्यः प्रकृतिं सृजत् ॥ १८ ॥
गुणकर्म्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात् ।
विभागं कल्पयामास यथास्वं वेददर्शनात् ॥ १९ ॥
ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः ।
देवासुरमनुष्याणां सिद्धानाञ्च यथाक्रमम् ॥ २० ॥
ब्रह्माण्डमन्तःशुषिरं यत्रेदं भूर्भुवादिकम् ।
कटाहद्वितयस्यैव सम्पुटं गोलकाकृति ॥ २१ ॥

ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानां क्रमशोऽधः क्रमादधः । इति ॥ २२ ॥
इति सौरोक्तपद्यानां विंशत्या सूचितः क्रमः ।
अथैतदुक्तसूर्य्यादिस्वरूपं प्रविविच्यते ॥ २३ ॥
चतुर्व्यूहप्रकारेण कृतिः सर्व्वत्र सर्व्वदा । इति ।
इति श्रीनारदीयोक्तेः प्रद्युम्नोऽत्रैव पद्मभूः ॥ २४ ॥
तत्कारणं महत्तत्त्वरूपी यः सूर्य्य उच्यते ।
ततोऽन्यः कथ्यते भूयः कार्य्यरूपी स्वयम्भुवः ॥ २५ ॥
अतो द्वैरूप्यमर्कस्य ब्रह्माण्डान्तः प्रतीयते ।
तत्राद्यस्यात्मभूपद्मकर्त्तृत्वं सम्भवत्यतः ॥ २६ ॥
द्वितीयस्यासुरामर्त्यपितृमर्त्यदिनेशता ।
विश्वदेवात्मकत्वाच्च सूर्य्यादीनां द्विरूपता ॥ २७ ॥
तैजसं भास्वतो विम्बमुद्भूतं स्पर्शरूपकम् ।
पाञ्चभौतिकमप्येतद्भास्वरत्वात् प्रदीपवत् ॥ २८ ॥
अस्याष्टौ भानुविम्बस्यारम्भका भूतभागकाः ।
चत्वारस्तेजसोऽन्येषामेकैकोऽंशः प्रकीर्त्तितः ॥ २९ ॥
तेजःप्राधान्यतः सूर्य्यस्तैजसः प्रोच्यतेऽखिलैः ।
किन्तु दिव्यं रवेस्तेजो भौमाच्छतगुणाधिकम् ॥ ३० ॥
शीतस्पर्शाधिकरणं विम्बमाप्यं हिमद्युतेः ।
करकावत्तदारब्धं चतुर्भिर्जलभागकैः ॥ ३१ ॥
एकैकभागैरन्येषां भूतानां तत्र यत् पुनः ।
परप्रकाशकत्वं तद्भानुमद्भानुसंक्रमात् ॥ ३२ ॥
प्रथमां पिबते वह्निः कलामित्यादि यत् स्मृतेः ।
वाक्यं शौक्ल्यापचयतो नैवेदं पारमार्थिकम् ॥ ३३ ॥

तेजसः स्यात्कथं पानं दृष्टिभोगोऽत्र केवलः ।
देवदत्तेन भुज्यन्ते ग्रामाः सम्भृतिवन्मतः ॥ ३४ ॥
कालाशब्देन तद्द्विषयाभ्यामुपलक्षितः ।
काल एवोच्यते नो चेत्पतेद्दर्शेऽखिलक्षतिः ॥ ३५ ॥
भूयसाल्पस्य बाधः स्यादिति न्यायेन शीतगोः ।
शैत्येनास्तोष्णतानुष्णा शीतस्पर्शोऽन्यथा भवेत् ॥ ३६ ॥
जलप्राये विधोः पृष्ठे निष्ठाह्वादयो जनैः ।
कलङ्कत्वेन वर्ण्यन्ते नानाप्राचीनवाङ्मयैः ॥ ३७ ॥
चन्द्रवन्मङ्गलाद्यास्ते प्रागुक्ता भानि तु स्वतः ।
तैजसानीत्यहं वच्मि जगुराप्यानि केचन ॥ ३८ ॥
आप्यत्वे तु भकक्षायां दृश्यतेऽर्कस्य विस्तृतिः ।
विकलापञ्चकं यस्मात्ततस्तत्करसंक्रमात् ॥ ३९ ॥
तादृगुज्ज्वलता भानां न सम्भवति तान्यथ ।
यद्यर्कसमतेजांसि तदा न स्यात्तमो निशि ॥ ४० ॥
तत्तेष्वङ्गीकृतं भौमज्योतिरौपाधिकोपमम् ।
सूर्यांशूपाधिजं तेजो यद्ग्रहेषु तथेष्यते ॥ ४१ ॥
वर्णभेदो यथा वह्नेः स्यादाधारविशेषतः ।
तथा भेषु ग्रहेषु स्याद्भिन्ना स्वौपाधिकी द्युतिः ॥ ४२ ॥
पितरश्चन्द्रबिम्बस्य श्रूयन्ते पृष्ठवासिनः ।
यथा तथान्यग्रहभेष्वपि स्थानं प्रतीयते ॥ ४३ ॥
यद्यद्भूतमया लोकास्तत्र तन्मयदेहिनः ।
वर्त्तन्ते पार्थिवांशस्य सम्पर्काद्व्यवहारिणः ॥ ४४ ॥
ब्रह्माण्डमध्यसंस्थानो भूगोलः पाञ्चभौतिकः ।
तदारम्भकतामाप्तं भूमिभागचतुष्टयम् ॥ ४५ ॥

जलादिभूतभागानां चतुष्कं पूर्व्वसम्मतम् ।
पृष्ठमस्याब्धिभागं सज्जलभागत्रयान्वितम् ॥ ४६ ॥
एकेन स्थलभागेन लक्ष्यते प्रायशो जनैः ।
गोलपृष्ठचतुर्थांशस्थलेऽखिलजनस्थितिः ॥ ४७ ॥
लवणोदधिमध्यस्थं महाद्वीपद्वयं पृथक् ।
ऊर्द्ध्वाधराभिधं तत्र महानूर्द्ध्वोऽधरस्तनुः ॥ ४८ ॥
अधःस्थस्योत्तरार्द्धेन सहोर्द्ध्वः कथितो बुधैः ।
जम्बूद्वीपाख्ययाधःस्थद्वीपस्यार्द्धन्तु दक्षिणम् ॥ ४९ ॥
कथ्यते ह्यासुरी भूमिर्भागैर्द्वादशभिर्युतम् ।
तत्र षट् सागरा द्वीपा ह्रददेशोपमाः स्थिताः ॥ ५० ॥
जम्बूद्वीपस्तु बहुधा विभक्तो वर्षपर्व्वतैः ।
तत्तन्मानानि नोक्तानि बृहत्सूर्य्यांशभास्करैः ॥ ५१ ॥
यत्तु विस्तृतगोलादौ वर्णितं भूधरादिकम् ।
तत्तद्दृष्टिविरुद्धत्वान्नाम्नैव गदितं बुधैः ॥ ५२ ॥
तत्तच्छास्त्रोदितो मेरुः कृताष्ट८४योजनोच्छ्रितः ।
कलाकृति२५६मितो मूल ऊर्द्ध्वस्थल्यां नखाग्निभिः३२० ॥ ५३ ॥
वर्षाचला हिमाद्र्याद्याः पञ्चाशद्योजनोच्छ्रिताः ।
तावत्प्रस्थाश्च तत्रायं क्रियते गणितक्रमः ॥ ५४ ॥
यस्माद्गोलस्थशैलादिशङ्कूनां दूरवर्त्तिनाम् ।
व्यवधा दृश्यतामानं दृष्टिसीमा च बोध्यते ॥ ५५ ॥
अभीष्टमानके गोले भचक्रत्वेन कल्पिते ।
स्थाप्यः स्वेच्छामितः शङ्कुः सचक्रकलिका२१६००हृतः ॥ ५६ ॥
गोलवेष्टनमानेन हृतः संस्कृतनामकः ।
सद्विधोर्द्ध्वस्त्रिजीवा३४३८घ्नस्त्रिज्यायुक्ताधरोद्धृतः ॥ ५७ ॥

फलमुत्क्रमजीवा तच्चापं दृष्टार्गलिप्तिकाः ।
ता गोलपरिधिक्षुण्णा भचक्रकलिकोद्धृताः ॥ ५८ ॥
शङ्कुदर्शनसीमा स्युस्ततो दूरे स नेक्ष्यते ।
उत्क्रमज्या नगोच्चा चेत्तदूनत्रिज्यकाकृतिम् ११८१९८४४ ॥५९॥
त्रिज्याकृतेर्विशोध्यातः पदमुत्क्रमकार्मुकम् ।
परमाद्योत्क्रमज्याया धनुर्यल्लिप्तिकाधिकम् ॥ ६० ॥
ग्राह्याल्पोत्क्रमज्याच तद्विलिप्तादिभिः समम् ।
हिमाद्रिः कल्पितः शङ्कुः पञ्चाशद्योजनोच्छ्रितः ॥ ६१ ॥
षड्भुजाब्धेषु५०२६मानेऽस्मिन् भूगोलपरिधौ स्थितः ।
स प्राग्वत्संस्कृतः शङ्कुस्तिथिदृक्२१५कलिकोऽभवत् ॥ ६२ ॥
द्विःखार्दस्मादुत्क्रमज्या दृङ्नखा२०२स्तद्धनुःकलाः ।
दृङ्नागेशा११८२ दृष्टिसीमा शरभै२७५र्योजनैर्मता ॥ ६३ ॥
द्रष्टृशङ्क्वन्तरधरामानं चक्रकला२१६००हतम् ।
हृतं परिधिमानेन लब्धा भुजकलास्ततः ॥ ६४ ॥
द्रष्टृदृश्यान्तरे राशित्रयोने दृष्टिसम्भवः ।
भुजलिप्ताख्यकार्मुकोनत्रिज्याकृतेः पदम् ॥ ६५ ॥
कोटीज्यात्रिघ्नभा३४३भक्तोऽस्या शेषः स्यादुत्क्रमज्यका ।
अथ कोटीज्ययाभ्यस्तात्त्रिज्याप्तः संस्कृतो नरः ॥ ६६ ॥
स्फुटशङ्कुः स चेदल्प उत्क्रमज्याप्रमाणतः ।
तदा न दृश्यते भूयात् दृश्यते व्यवधानभित् ॥ ६७ ॥
उत्क्रमज्योज्झितः स्पष्टशङ्कुर्दृश्यज्यका भवेत् ।
सा त्रिज्याघ्नान्तरस्थोत्थभुजज्यांशोन्नतज्यका ॥ ६८ ॥
तद्धनुर्दृश्यलिप्ताः स्युस्तच्छङ्कोः क्षितिजोपरि ।
दृश्यज्यापरिधिक्षुण्णा चक्रलिप्तोद्धृता फलम् ॥ ६९ ॥

शङ्कोर्दृश्योन्नतिः साथ त्रिज्याघ्नी कोटिभाजिता ।
दृश्यभागः स्फुटः शङ्कोः स्याद्योजनकरादिकः ॥ ७० ॥
परिधिघ्नोत्क्रमज्याथ भचक्रकलिकोद्धृता ।
त्रिज्याघ्नी कोटिजीवाप्ता लुप्तांशप्रमितिर्भवेत् ॥ ७१ ॥
हिमाद्रिशृङ्गतलतः कुनृपै१६१र्योजनैः स्थिते ।
दक्षिणे नीलशैलेऽत्र द्रष्टुः स्थानं प्रकल्प्यते ॥ ७२ ॥
तदन्तरोत्थदोर्लिप्ता द्व्यङ्काङ्का६९२न्युत्क्रमज्यका ।
सप्ततिः७० कोटिजीवाष्टरसाग्न्यग्निमिता३३६८भवत् ॥७३॥
पूर्वोक्तः संस्कृतः शङ्कुः२१५ स्फुटो रुद्राक्षि२११सम्मितः ।
दृश्यज्या धरणीशक्रा१४१ उन्नतज्येषुखाद्रयः७०५ ॥ ७४ ॥
दिगश्वा७१० उन्नतकला देवा३३ दृश्योन्नतिस्तथा ।
स्फुटदृश्योन्नतिर्वेदगुण३४योजनसम्मिता ॥ ७५ ॥
षोडशादृश्यमानानि योजनानि गिरेर्यतः ।
क्षितिजाद्द्वादशांशोच्चस्तत्र दृश्यो हिमालयः ॥ ७६ ॥
धूमधूलीहिमघनैरदृष्टेऽपीह दूरगे ।
छदनाद्भुवमत्यस्थभानां स्यात्तत्समक्षता ॥ ७७ ॥
अतो न तावदौन्नत्यं सिद्धं नायामविस्तृती ।
प्रत्यक्षे तस्य तूच्चत्वं खार्णवां४०शमितं ततः ॥ ७८ ॥
सोऽयुतद्वय२००००हस्तोच्चः शङ्कुस्तेत्संस्कृतः पुनः ।
दृग्दन्त३२२विकलस्तावत्युत्क्रमज्या५।२२थ तद्धनुः ॥ ७९ ॥
द्विनवेन्दु१९२कला दृष्टिसीमा क्रोशा नवद्विपाः८९ ।
स्वकूटतलतस्तावद्दूरे दृश्योऽधिके न सः ॥ ८० ॥
हिमालयाष्टमांशोच्चो महेन्द्राख्यः कुलाचलः ।
स्वमूलतो हि भूनिष्ठैरात्रिंशत्क्रोशमीक्ष्यते ॥ ८१ ॥

यदि मेरोस्तथोच्छ्राय*विस्तारौ भवतस्तदा ।
प्राक्स्थानाममरावत्या याम्यगोल: कथं निशा ॥ ८२ ॥
सार्द्धेशा११।३०स्तत्र लम्बांशा दृश्यंशा: पञ्चविंशति:२५ ।
तच्चापान्तर्गत: सूर्य्यंक्षितिजाद्विश्व१३भागकै: ॥ ८३ ॥
उच्चस्थो दृश्यते देवै: षण्मासास्तमय: कथम् ।
विषुवत्कालजे खण्डग्रहणे शीतगोस्तथा ॥ ८४ ॥
अदृश्यत कुभान्त:स्था मेरुच्छाया चतु:कला ।
अतो मेरून्नतिर्न्यूना मन्यतां हिमवन्मिते: ॥ ८५ ॥
पश्यद्भिर्नाविकै: सिन्धौ मस्तकोर्द्धगतं ध्रुवम् ॥
हैमाद्रिर्नोन्नतोऽप्यस्य स्थितिर्वाच्या मृषेति नो ॥ ८६ ॥
लङ्का तन्मायया साक्षाच्च देवासुरभूर्नृभि: ।
अन्तर्ह्यद्यपि मर्त्यानां यदुपासनयेक्ष्यते ॥ ८७ ॥
खाद्रिदृग्२७०योजनव्यासवार्द्धिमध्यान्निरक्षत: ।
जम्बूद्वीपान्तरं तुर्य्यं न सर्व्वत्रोपलभ्यते ॥ ८८ ॥
नीलाद्रेर्नैर्ऋताशायां कुमार्य्यस्या मरुद्दिशि ।
द्वारकास्याश्च नीलाद्रि: प्राच्यां वेलास्थितं त्रयम् ॥ ८९ ॥
अतो भारतवर्षस्य याम्यभागे त्रिकोणता ।
प्राक्पश्चान्मध्यदेशानामन्तरज्ञानतोऽपि च ॥ ९० ॥
शङ्काग्राकारतासिद्धिस्तद्द्वीपेऽस्मिन्न वृत्तता ।
तन्मानता न चैवाब्धौ न चापि वलयाकृति: ॥ ९१ ॥
तत्ततोऽधिकमानोऽसौ सागरो विविधाकृति: ।
प्राक्पश्चाद्याम्यसौम्याख्यो नानाख्य: स्थानभेदत: ॥ ९२ ॥

---

* तथेति विस्तृतगोलाद्युक्तप्रकारेण ।

लवणार्णवमध्यस्था द्वीपभेदाः परःशताः ।
दशार्व्वुदाधिका सङ्ख्या मनुष्याणां भुवि श्रुता ॥ ९३ ॥
समन्ताद्योजनं कल्पे भूगोलः किल वर्द्धते ।
इति सिद्धान्ततो वृद्धैर्वैषम्याद्देशभेदतः ॥ ९४ ॥
बहुदिक्प्रसरद्वातक्षुब्धाम्भोधिजलाहतेः ।
वर्षोद्रेकान्नदीवेगान्मृदां नानाविधस्थितेः ॥ ९५ ॥
उन्मज्जन्ति निमज्जन्ति केचित्केचित्कदा कदा ।
क्षुद्रा द्वीपा महान्तास्तु भिन्नाकारा भवन्ति हि ॥ ९६ ॥
तथापि वृत्तता भूमेर्मृद्भिस्तोयैर्न भिद्यते ।
मृदामपाञ्च संस्थानान्याप्नुवन्ति सदा भिदाम् ॥ ९७ ॥
लवणोदेन सम्पृक्ताः क्षीरोदाद्या क्वचित् क्वचित् ।
दधति क्षीरदध्यादि न स्वरूपन्तु कार्त्स्न्यतः ॥ ९८ ॥
तत्प्राक्सिद्धान्तसम्प्रोक्तसृष्टिकालकुसंस्थितेः ।
वर्त्तते वर्त्तमानक्ष्मासंस्थितेश्चान्तरं महत् ॥ ९९ ॥
आदियामले- यस्य शृङ्गैकदेशस्था देवास्त्रिंशत्त्रिकोटयः ।
स मेरुः पृथिवीमध्ये श्रूयते न च दृश्यते । इति ॥१००॥
सूर्य्यसिद्धान्ते—अनेकरत्ननिचयो जाम्बूनदमयो गिरिः ।
भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः ॥ १०१ ॥
उपरिष्टात्स्थितास्तस्य सेन्द्रा देवा महर्षयः ।
अधस्तादसुरास्तद्वद्द्विषन्तोऽन्योऽन्यमाश्रिताः ॥ १०२ ॥
ततः समन्तात्परिधिक्रमेणायं महार्णवः ।
मेखलेव स्थितो धात्र्या देवासुरविभागकृत् । इति ॥ १०३ ॥
देवावासः सुमेर्वाख्यः कुमेरुरसुराश्रयः ।
तत्समान्तरगा रेखा व्यक्षाख्या परिधिर्महान् ॥ १०४ ॥

अक्षांशा मेरुपर्य्यन्तं क्रमोना वृत्तरेखिकाः ।
तद्भिदो मेरुयुक्तास्ता द्राघिमाख्याः समा मताः ॥ १०५ ॥
इत्थमाकाशवद्भूमावपि सर्व्वं प्रकल्प्यते ।
भूमध्यात् खस्थितिर्यस्मात् पृष्ठे सूत्रसमा भवेत् ॥ १०६ ॥
ब्रह्माण्डात्मविराड्देहमेरुदण्डायिते स्थिरे ।
वायौ भूरादयः स्यूताश्चक्राणीव तनौ नृणाम् ॥ १०७ ॥
खमेरुः समरुत्प्रोक्तो लोकाधारतयागमैः ।
गर्भोदसिन्धुयुग्मूलः षोड़शाधारभृच्छिखः ॥ १०८ ॥
लोकालोकतया प्रोक्ता कटाहप्रथमा वृतिः ।
हिरण्मयी भूमिसंज्ञा ततो दशगुणोत्तराः ॥ १०९ ॥
क्रमाज्जलादयः प्रोक्ताः प्रकृत्यन्ताः प्रसङ्गतः ।
यत्साधारणभूगोलशास्त्रे देशादिवर्णना ॥ ११० ॥
कर्त्तुमर्हा तदेतस्मिन् गणिते दिक् प्रदर्शिता ।
पश्चाद्ग्रामादिगोलस्य वाच्यं दृक्शास्त्रसम्मतम् ॥ १११ ॥
अथ भूभागसंस्थानपरिचित्यै कुतूहलात् ।
लिख्यन्ते कतिचिच्छ्लोकाः सत्सिद्धान्तशिरोमणेः ॥ ११२ ॥

शि—लङ्का कुमध्ये यमकोटिरस्याः प्राक् पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये वड़वानलश्च ॥११३॥
कुवृत्तपादान्तरितानि यानि स्थानानि षड्गोलविदो वदन्ति ।
वसन्ति मेरौ सुरसिद्धसङ्घा और्व्वे च सर्व्वे नरकाः सदैत्याः ॥११४॥
यो यत्र तिष्ठत्यवनीं तलस्थामात्मानमस्या उपरिस्थितञ्च ।
स मन्यतेऽतः कुचतुर्थसंस्था अधश्च ते तिर्य्यगिवामनन्ति ॥ ११५ ॥
अधःशिरस्काः कुदलान्तरस्थाश्छायामनुष्या इव नीरतीरे ।
अनाकुलास्तिर्य्यगधःस्थिताश्च तिष्ठन्ति ते तत्र वयं यथात्र ॥११६॥

भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥ ११७ ॥

लवणजलधिरादौ दुग्धसिन्धुश्च तस्मा-
दमृतममृतरश्मिः श्रीश्च यस्माद्बभूव ।
महितचरणपद्मः पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र ॥ ११८ ॥

दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः ।
स्वादूदकान्तर्वड़वानलोऽसौ पाताललोकाः पृथिवीपुटानि ॥११९॥

चञ्चत्फणामणिगणाङ्कितप्रकाशा
एतेषु सासुरगणाः फणिनो वसन्ति ।
दीव्यन्ति दिव्यरमणीरमणीयदेहैः
सिद्धाश्च तत्र चलसत्कनकावभासैः ॥ १२० ॥

शाकं ततः शाल्मलमत्र कौशं क्रौञ्चञ्च गोमेदक*पुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति ॥ १२१ ॥

लङ्कादेशाद्धिमगिरिरुदग्घेमकूटोऽथ तस्मात्
तस्माच्चान्यो निषध इति ते सिन्धुपर्य्यन्तदैर्घ्याः ।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला
वर्षाख्येषा जगुरिह बुधा अन्तरे द्रोणिदेशान् ॥१२२॥

भारतवर्षमिदं ह्युदगस्मात् किन्नरवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्माद्धिद्धि हिरण्मयरम्यकवर्षौ ॥१२३॥

---

* प्लक्षद्वीपस्य गोमेदकमिति नामान्तरम् ।

माल्यवांश्च यवकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः ।
नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृतम् ॥ १२४ ॥
माल्यवज्जलधिमध्यवर्ति यत्तत्तु भद्रतुरगं जगुर्बुधाः ।
गन्धशैलजलराशिमध्यगं केतुमालकमिलाकलाविदः ॥ १२५ ॥
निषधनीलसुगन्धसुमाल्यकैरवमिलावृतमावृतमाबभौ ।
अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम् ॥ १२६ ॥
इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयस्त्रिदशालयः ।
द्रुहिणजन्मकुपद्मजकर्णिकेति च पुराणविदोऽमुमवर्णयन् ॥१२७ ॥
विष्कम्भशैलाः खलु मन्दरोऽस्य सुगन्धशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात् सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलाख्याः ॥१२८॥

जम्बूफलामलगलद्रसतः प्रवृत्ता
जम्बूनदीरसयुतैर्मृदभूत् सुवर्णम् ।
जाम्बूनदं हि तदपः सुरसिद्धसङ्घाः
अश्नन्त्यिबन्त्यमृतपानपराङ्मुखास्ते ॥ १२९ ॥

वनं तथा चैत्ररथं विचित्रं तेष्वप्सरोनन्दननन्दनञ्च ।
धृत्याह्वयं यद्धृतिकृत्सुराणां भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् ॥१३०॥
सरांस्यथैतेष्वरुणञ्च मानसं महाह्रदं श्वेतजलं यथाक्रमम् ।
सरस्सु रामारमणश्रमालसाः सुरा रमन्ते जलकेलिलालसाः ॥१३१॥

सद्रत्नकाञ्चनमयं शिखरत्रयञ्च
मेरौ मुरारिकपुरारिपुराणि तेषु ।
तेषामधः शतमखज्वलनान्तकाख्य-
रक्षोऽम्बुपानिलधनेशपुराणि चाष्टौ ॥ १३२ ॥

विष्णुपदी विष्णुपदात्पतिता मेरौ चतुर्धास्मात् ।
विष्कम्भाचलमस्तकस्थसरःसङ्गता वियता ॥ १३३ ॥

शीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम् ।
वंक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून् याता ॥ १३४ ॥
याकर्णिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता ।
उक्ता स्मृता स्तुता वा पुनाति बहुधापि पापिनः पुरुषान् ॥ १३५ ॥
यास्वलिते दलिताखिलबन्धो गच्छति बलाति तत्पिहसङ्गः ।
प्राप्ततटे विजितान्तकदूतो याति नरे निरयात्सुरलोकम् ॥ १३६ ॥

ऐन्द्रं कशेरुसकलं किल ताम्रपर्ण-
मन्यद्गभस्तिमदतश्च कुमारिकाख्यम् ।
नागञ्च सौम्यमिह वारुणमन्त्यखण्डं
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥ १३७ ॥
वर्णव्यवस्थितिरिहैव कुमारिकाख्ये
शेषेषु चान्त्यजजना निवसन्ति सर्व्वे ।
माहेन्द्रशुक्तिमलयर्क्षकपरियात्राः
सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः ॥ १३८ ॥
भूर्लोकाख्यो दक्षिणे व्यक्षदेशात्
तस्मात् सौम्योऽयं भुवः स्वश्च मेरुः ।
लभ्यः पुण्यैस्तैर्महोऽस्माज्जनोऽतो
लभ्योऽनल्पैस्तैस्तपः सत्यमन्त्यः ॥ १३९ ॥

लङ्कापुरेऽर्कस्य यदोदयः स्यात्तदा दिनार्द्धं यवकोटिपुर्य्याम् ।
अधस्तदा सिद्धपुरेऽस्तकालः स्याद्रोमके रात्रिदलं तदैव ॥ १४० ॥
यत्रोदितोऽर्कः किल तत्र पूर्व्वा तत्रापरा यत्र गतः प्रतिष्ठाम् ।
तन्मध्यतोऽन्ये च ततोऽखिलानामुदक्स्थितो मेरुरिति प्रसिद्धिः ॥ १४१ ॥
अथोज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि स्याद्यवकोटिरेव ।
ततश्च पश्चान्न भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम् ॥ १४२ ॥

तथैव सर्व्वत्र यतो हि यत्स्यात्प्राची ततस्तत्र भवेत्प्रतीच्याम् ।
निरक्षदेशादितरत्र तस्मात्प्राचीप्रतीच्यौ च विचित्रसंस्थे ॥ १४३ ॥
निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत्तथा भ्रमद्भचक्रं निजमस्तकोपरि ॥ १४४ ॥

उदग्दिशं याति यथा यथा नर-
स्तथा तथा खान्नतमृक्षमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः फलांशकाः ॥ १४५ ॥

योजनसङ्ख्या भांशै३६०र्गुणिता स्वपरिधिहृता भवन्त्यंशाः ।
भूमौ कक्षायां वा भागेभ्यो योजनानि च व्यस्तम् ॥ १४६ ॥
सौम्यं ध्रुवं मेरुगताः खमध्ये याम्यञ्च दैत्या निजमस्तकोर्द्ध्वे ।
सव्यापसव्यं भ्रमदृक्षचक्रं विलोकयन्ति क्षितिजप्रसक्तम् ॥ १४७ ॥
वृद्धिर्व्विधेरह्नि भुवः समन्तात् स्याद्योजनं भूभवभूतपूर्व्वैः ।
ब्राह्मे लये योजनमात्रवृद्धेर्नाशो भुवः प्राकृतिकेऽखिलायाः ॥१४८॥
दिने दिने यन्म्रियते हि भूतैर्दैनन्दिनं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले भूतानि यद्ब्रह्मतनुं व्रजन्ति ॥ १४९ ॥
ब्रह्मात्यये यत्प्रकृतिं प्रयान्ति सर्व्वाण्यतः प्राकृतिकं कृतीन्द्राः ।
लीनान्यतः कर्म्मपुटान्तरत्वात् पृथक्क्रियन्ते प्रकृतेर्विकारैः ॥ १५० ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्त्यनिवृत्तिमस्मादात्यन्तिकश्चेति लयश्चतुर्द्धा ॥ १५१ ॥

भूभूधरत्रिदशदानवमानवाद्या
ये याश्च धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकव्यवस्थितिरुपर्य्युपरि प्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् । इति ॥ १५२ ॥

भूव्यासः खखभूप१६००योजनमितः सोऽद्र्यक्षिनन्दाग्निभिः३९२७
क्षुण्णः खाशुगसूर्य१२५०हृत्स्वपरिधिः सूक्ष्मोऽपि कक्षावली ।
खेटानां भुवि लिप्तिकांशघटनासौकर्यहेतोरिह
व्यासः खाभ्ररसा६००हतः कुनवभू१९१भक्तो मतो वेष्टनम् ॥१५३॥

तस्माद्योजनसङ्ख्यया कुपरिधिः षट्पञ्चशून्याशुगाः५०२६
षष्ट्यंशैर्दशभि१०स्ततः क्षितिकृतैः४१
सार्द्धं मयाचोदिताः५०२६।१०।४१ ।
व्यासघ्नः परिधिः कुपृष्ठजफलं बाणाष्टनागावनी-
वेदाभ्रद्विरदा८०४१८८५स्ततो घनफलं
व्यासाङ्ग६भागाहतेः२१४४५०२६६६।४० ॥ १५४ ॥

क्ष्मापृष्ठस्य निरक्षदेशत उदग्भागे स्थलं योजनै-
र्बाणाद्रीन्दुशरेषुबाणविधुभि१५५५१७५स्तोयं मितञ्चाम्बुधेः ।
शून्यद्व्यग्निरसेषुसागरभुजै२४५६३२०र्याम्ये दले शून्यगो-
रामाक्षीषुशरैः५५२३९० स्थलञ्च खखखा-
ष्टाद्र्यब्धिरामै३४७८०००र्जलम् ॥ १५५ ॥

शि—वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं तत्-
क्षुण्णं वेदैरुपरि परितः कन्दुकस्येव जालम् ।
गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं
षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम् । इति ॥१५६॥

केचिद्वदन्त्यत्र वेष्टनार्द्धं व्यासं प्रकल्प्यास्य भुजाक्षि२घातात् ।
नगो७द्धृतात्तत्परिधिर्विधेयस्तद्युग्म*घातस्य चतुर्थभागः ॥ १५७ ॥
क्षेत्रस्य वृत्तस्य फलं यदेतद्गोलार्द्धतुल्यस्य ततो द्विनिघ्नम् ।
तद्गोलपृष्ठस्य फलं पुरोक्तात्पादाधिकं सम्भवतीति तन्न ॥ १५८ ॥

---

* व्यासपरिधिवधयुग्मस्य ।

वक्ष्ये स्फुटं साधनमिष्टगोलं भचक्रलिप्ता२१६००सममारचय्य ।
त्रिज्यामितं३४३८ व्यासदलं प्रकल्प्य दद्यात्तदूर्ध्वाधरकेन्द्रविन्दू ॥ १५९ ॥

निरक्षवृत्तं विलिखेत्तदन्तस्तदूर्ध्वकेन्द्रावधि गोलकार्द्धे ।
तत्त्वाश्वि२२५लिप्ताप्रमितानि वृत्ता-
न्यब्धाश्वि२४सङ्ख्यानि विलिख्य तानि ॥ १६० ॥

भवन्ति तस्मिन् वलयाभिधानि क्षेत्राणि तेषां क्रमतो निरक्षात् ।
व्यासः समानः परिधिः क्रमोनः प्रत्येकमध्यं प्रतिलम्बजीवाः ॥ १६१ ॥

खखाश्विलिप्ताः क्रमतः प्रसाध्याः पुनः पुनस्तत्कृतिवर्ज्जितायाः ।
त्रिज्याकृते११८१९८४४मूलतया गृहीताः
स्थिरीकृताः स्युश्च परस्परं ताः ॥ १६२ ॥

तासां युतिर्दन्तशराश्विबाणाः
षष्ट्यंशकैरष्टगुणैश्च सिद्धैः५२५३२।३८।२४ ।
समं भवेयुः पुनरक्षपक्ष-
पक्षा२२५ हृताश्चक्रकला२१६०० निरक्षे ॥ १६३ ॥

फलं बृहत् क्षेत्रभवं भवन्ति
खखाभ्रशून्याङ्गगजाब्धिसङ्ख्याः४८६०००० ।
तत्सङ्गुणात्खाश्वगुणैक्यतो यत्-
त्रिज्याविभक्तात् फलमेतदेव ॥ १६४ ॥

खखाष्टषड्श्विकृताद्रितुल्यं७४२६०८००
स्याद्गोलपृष्ठार्द्धफलं कलाद्यम् ।
द्विनिघ्नमेतत् सकलं फलं स्यात्१४८५२१६००
पृष्ठोद्भवं चक्रकलाख्यगोले ॥ १६५ ॥

द्विघ्नत्रिजीवा६८७६गुणितं भचक्रलिप्ता समं तद्भवतीह यस्मात् ।
तद्वेष्टनव्यासहतेः प्रसिद्धं पृष्ठे फलं तच्चतुरस्ररूपम् ॥ १६६ ॥

प्रत्येकमेषां* वलयाभिधानां फलानि तद्वदुद्धृतः फलेन ।
निघ्नाच्च लम्बात्त्रिगुणोद्धृतात् स्युस्तद्योगतः पृष्ठफलं तदेव ॥१६७॥

कृत्वा मृत्तिकया सुवर्त्तुलचतुष्कोणौ पृथक्पिण्डकौ
तुल्यव्यासतया तयोर्गुरुतयोः स्याद्योऽनुपातः पुनः ।
तत्पृष्ठच्छदनांशुकद्वयतुलाजातोऽनुपातश्च य-
स्ताभ्यामुक्तघनाख्यपृष्ठजफले बोध्ये हि बालैरपि ॥ १६८ ॥

मात्राङ्गुलं वसु८यवोदरसम्मितं तै-
र्मुष्टिः कृतै४श्च रस६मुष्टिभिरेव हस्तः ।
हस्तैश्चतुर्भिरिह दण्ड उदीरितस्तैः
क्रोशः खखाभ्रनयनै२०००रथ तद्युगेन ॥ १६९ ॥

गव्यूतिरेतदुभयं किल योजनं स्यात्
केचित् खभूपगजलोचन२८१६०हस्तमूचुः ।
गच्छत्समाङ्कनृणां खखतर्कबाणैः५६००
क्रोशः पदैर्भवति वेगविलम्बहीनैः ॥ १७० ॥

ज्यार्द्धं ज्येति यथाश्रुतेष्वविहितं लोकेशसूर्यादिभि-
र्गव्यूतिर्गदिता च योजनमिति क्ष्मार्कादिमाने तथा ।
तस्माद्वास्तवभूमिविस्तृतिरसौ खाभ्राष्टभिः८०० सम्मिता
सेन्दोर्द्विद्विभुजै२२२ रवेः खखनभःषड्वह्निभिर्योजनैः ॥ १७१ ॥

शङ्कुः सूर्य१२मिताङ्गुलस्तदुभयं हस्तश्चतुर्भिर्धनु-
स्तैः क्रोशो धनुषां सहस्रमिति वा स्याद्विष्णुधर्मोत्तरात् ।
तस्माद्देशविशेषसिद्धमितिभिस्तद्योजनैः सम्मिताः
पूर्वोक्ता रवि७२०००चन्द्र४४४भू१६००प्रभृतयः
सिद्धास्तु वा वस्तुतः ॥ १७२ ॥

---

* चतुर्विंशतिवृत्तानाम् ।

विष्णुधर्मोत्तरे—द्वादशाङ्गुलकः शङ्कुस्तद्द्वयञ्च शयः स्मृतः ।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रकम् ।इति॥१७३॥

उद्बाहोः प्रपदोत्थितस्य पुरुषस्यार्थां५शहस्तैः खषड्-
भूनागाग्नि२८१६०मितैर्मितं सुमतिभिर्यद्‌योजनं तैः पुनः ।
त्र्यंशोनैः कृतनन्दखाग्निभि२०९३।४०रिलागोलस्य चेदिष्टनं
व्यासो व्यङ्घ्रिशराष्टगोभि९८४।४५रुभयाघातात् फलं पृष्ठजम् ॥१७४॥

नागाष्टाब्धिरसाब्धिखानल३०४६४८८मितं पञ्चाशता कोटिभिः
स्यादल्पाभ्यधिकैर्घनाभिधफलं गर्भेऽस्य तद्योजनैः५००००४८४३ ।
तुल्यं खाशुग५०कोटिभिश्च विकलाद्यानां वियोगाद्भवे-
दित्थं भूविहृतिः कृताथ नभसि ज्योतिःक्रमो वक्ष्यते ॥ १७५ ॥

नीलारविन्दसुमिलिन्दकलिन्दजेन्द्र-
नीलाम्बुदालिदलिताञ्जनपुञ्जमञ्जुम् ।
नीलाचलाधरशिरोमुकुटायमानं
नीलाम्बरानुजमजं शरणं व्रजामः ॥ १७६ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽत्रिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
ह्यष्टादशो गत इलाविहृतिः प्रकाशः ॥ १७७ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे गोलाधिकारे
भूगोलविवरणो नामाष्टादशः प्रकाशः ।

ऊनविंशः प्रकाशः ।

भगोलखगोलवर्णनम् ।

स्रष्टुर्या या शरीरेन्द्रियविषयमयी भूतसृष्टिः पुरासी-
त्तद्वीजं द्विधान्तर्वहिरभवदितः पञ्चकं मण्डलानाम् ।
वाह्यं ब्रह्माण्डभाण्डावृतिरुदरसमाकारमन्तः खवायो-
र्विम्बवृन्दं रवीन्दुत्रितय इह महस्तोयभूमण्डलानि ॥ १ ॥
योऽसावाकाशमेरुर्मरुदिति गदितो वृत्तयष्टिस्वरूप-
स्तत्स्यूतिस्थास्नुलोकप्रकरविटपिनो मूलतुल्यात् कुगोलात् ।
वायुस्कन्धाः समन्ताद्वहिरुपचयिनः सन्ति सप्तावहाद्या
आब्रह्माण्डादिहास्ते स्थिरचरमखिलं भग्रहाम्भोधराद्यम् ॥२॥

शिरोमणौ—भूवायुरावह इह प्रवहस्तदूर्ध्वः
स्यादुद्वहस्तदनु संवहसंज्ञकश्च ।
अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्माद्-
वाह्यः परावह इमे पवनाः प्रसिद्धाः ॥ ३ ॥

भूमेर्वहिर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युदाद्यम् ।
तदूर्ध्वगो यः प्रवहः स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था ॥ ४ ॥
नक्षत्रकक्षाखचरैः समेतो यस्मादतस्तेन समाहतोऽयम् ।
भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन ॥ ५ ॥

यान्तो भचक्रे लघुपूर्वगत्या
खेटास्तु तस्यापरशीघ्रगत्या ।
कुलालचक्रे भ्रमिवामगत्या
यान्तो न कीटा इव भान्ति यान्तः । इति ॥ ६ ॥

प्राग्यायिमध्यमरवेः परितो भसूचे
मन्दोच्चकृष्टतनवः खचरा भ्रमन्तः ।

तिष्ठन्ति यावति भुवोऽन्तर एव तस्मात्
पश्चाद्यतां बहुविधा भवति स्वकक्षा ॥ ७ ॥
अथावनीवेष्टनवद्ग्रमीन्द्वोर्न्यूनाधिकाकर्षणतो मृदूत्यात् ।
कक्षा निजा स्यादतएव मध्या लेख्याग्रतः कर्म्म ततः स्फुटानाम् ॥८॥
भूसूर्य्यबाह्याम्बरसञ्चराणां दवीयसां जीवकुजार्कजानाम् ।
गत्यल्पभावान्निजमध्यकक्षामध्यार्कतो मध्यरवेस्तु कक्षा ॥ ९ ॥
तेषां चलाख्या भवति क्षितीनमध्याभ्रसञ्चारिसितज्ञयोश्च ।
अनल्पगत्यो रविमध्यकक्षा मध्याभिधा स्वा रवितश्चलाख्या ॥ १० ॥
साध्यर्कतस्तन्मृदुकर्णसिद्धौ मध्योच्यते कोरिव चन्द्रभान्वोः ।
सूर्य्यात् कुजाद्यन्तर एव मन्दकर्णः स्फुटो द्राङ्मृदुजः कुगोलात् ॥११॥
सूर्य्यज्ञास्फुजितां मध्यकक्षा योजनसङ्ख्यया ।
शताहताष्टशून्याभ्रनागसैन्धवसिन्धवः४७८००८०० ॥ १२ ॥
शीघ्रकक्षेयमेवोक्ता कुजजीवार्कजन्मनाम् ।
बुधस्य नखवेदाङ्गबाणाब्धिधृतयो१८४५६४२० निजा ॥ १३ ॥
शुक्रस्याभ्राष्टपञ्चेषुशराङ्गाब्धिगुणाः३४६५५५८० स्वका ।
मध्या कुजस्य खखषड्गुणाभ्रगुणदृङ्नगाः७२३०३६०० ॥ १४ ॥
गीष्पतेर्नखरामाष्टशरसिस्राः शताहताः२४५८३२००० ।
शनेः खखरसाद्र्यग्निपक्षचन्द्राब्धिसिन्धवः४४१२३७६०० ॥ १५ ॥
शीघ्रकक्षा भचक्रांश३६०गुणिता मध्ययोद्धृता ।
लब्धाः शीघ्रपरिध्यंशाश्चक्रचक्रार्द्धजा मताः ॥ १६ ॥
शतघ्नाम्बरषट्पूर्णरामा३०६०००० मध्येन्दुकक्षिका ।
भानां खखाभ्रनागाष्टदृङ्नागनखनीरदाः१७२०८२८८००० ॥१७॥
स्वस्वकक्षेन्दुगोभू१९१घ्नी खखसूर्य्यहृता१२०० श्रुतिः ।
मध्या सूर्य्याद्बुधादीनां भूमेश्चर्क्षेन्दुभास्वताम् ॥ १८ ॥

मन्दश्रुतिकलानिघ्नी मध्या त्रिज्योद्धृता स्फुटा ।
मध्यवन्मन्दसंस्कारः सूर्य्याज्ञसितशीघ्रयोः ॥ १९ ॥
भूमध्यात् स्फुटभौमादिकर्णज्ञानाय मध्यमः ।
कर्णस्तृतीयकर्णघ्नस्त्रिज्याभक्तोऽथ तुर्य्यया ॥ २० ॥
श्रुत्याभ्यस्तस्त्रिजीवाप्तः कार्य्यः कक्षापि कर्णतः ।
साध्या खखार्क१२००गुणितात् कुनवेन्दुभि१९१र्हृतात् ॥२१॥
मन्दोच्चानाञ्च पातानां भगणाश्रितभावतः ।
कक्षा नक्षत्रकक्षैव ज्ञेया दृश्येतरात्मिकाम् ॥ २२ ॥
स्वस्वकक्षाः स्वभगणैरभ्यस्ताः कुदिनो१५७७९१७८२८०० हृताः ।
फलं स्वगतिमानं स्यात् खेचराणां दिने दिने ॥ २३ ॥
स्वस्वपूर्व्वगतिः स्वस्वकक्षायां योजनात्मिका ।
कथ्यतेऽथैकदिवसे रविमध्यमसावने ॥ २४ ॥
भूगोलं परितोऽर्कस्य गजाङ्गाष्टाभ्रविश्वकै१३०८६८ ।
खनखेशा११२०० विधोर्भानां प्राक् पश्चात् कृतगोनखाः२०९४॥२५
ज्ञशुक्रयोस्तु मध्यार्कं क्रमात्त्र्यभ्राष्टगोनखाः२०९८०३(बु) ।
गोऽश्विदृग्वेदतिथयः१५४२२९ परितोऽथ महीभुवः ॥ २६ ॥
वसुसिद्धार्थककुभो१०५२४८ गुरोर्देवाद्रिषट्शराः५६७३३ ।
शनैश्चरस्य नागाभ्रपूर्णचन्द्रपयोधयः४१००८ ॥ २७ ॥
गतिश्चक्रकला२१६००निघ्नी स्वकक्षाप्ता कलात्मिका ।
भवति प्रायशस्तेषामथोक्ता योजनात्मिका ॥ २८ ॥
भगति२०९४र्ग्रहकक्षाघ्नी भकक्षाप्ता फलोनयुक् ।
पश्चात् प्राक्चक्रचलने भवेत् खेटगतिः स्फुटा ॥ २९ ॥
स्वतुङ्गाकर्षणवशात् कक्षाकेन्द्रान्नभःसदाम् ।
कर्णस्योनाधिकत्वेऽपि समैव प्राग्गतिर्भवेत् ॥ ३० ॥

विक्षिप्तानां स्वकैः पातैः सौम्ययाम्यगतिः पुनः ।
न्यूनाधिका भवत्येषां मन्दकर्णानुसारतः ॥ ३१ ॥
भूरिन्दुसौम्यशुक्रार्ककुजेज्यार्किभवृत्तकैः ।
क्रमायतैर्वृतेत्युक्तिः प्राचां दृष्टिविरोधिनी ॥ ३२ ॥
यत्तदुक्ता नभःकक्षा स्वकल्पभगणोद्धृता ।
लब्धाभिर्ग्रहकक्षाभिः सिद्धाभिरनुपाततः ॥ ३३ ॥
वेष्टिते लिखिते बिन्दौ भूमिनाम्नि विपश्चिता ।
स्वस्वकक्षासु तुल्यायां न्यस्तायां प्राग्गतौ पुनः ॥ ३४ ॥
शीघ्रोच्चाकर्षणोद्भूतदोःफलाग्रस्थितग्रहः ।
भूतारासूत्रसूत्रस्थस्वकार्द्धैर्नैति वक्रिताम् ॥ ३५ ॥
तदस्मदुक्तमार्गस्थाः क्रमाल्पगतयोऽर्कतः ।
सूर्य्यर्क्षसूत्रगाः क्ष्मर्क्षसूत्रात् स्युर्वक्रिणः खगाः ॥ ३६ ॥
चलकर्णक्रमाद्बिम्बविक्षेपाल्पमहत्त्वतः ।
ताराग्रहाणामायाति मध्यार्काभिभ्रमः स्फुटः ॥ ३७ ॥
यदि स्याद्भास्वतः कक्षा सौरभास्करसम्मता ।
तदा स्वभुक्तितिथ्यंशे१५ सिद्धे प्राक्परलम्बने ॥ ३८ ॥
मध्यमं लम्बनं कौजं प्रायशः कलिकाद्वयम् ।
त्रिज्याघ्नं शीघ्रकर्णाप्तं भार्द्धे स्याद्रस६लिप्तिकम् ॥ ३९ ॥
सत्यां वक्रगतौ सिद्ध२४कलिकायां कुजन्मनः ।
सायमुद्यन् यया सार्कं तारया बिम्ब ईक्ष्यते ॥ ४० ॥
ततः सिद्धकला पश्चादस्तकाले स दृश्यते ।
ययाप्यस्तमये तुल्य. परेऽह्न्युदयक्षणे ॥ ४१ ॥
तया समो हि दृश्येत स्वल्पकक्षोत्थलम्बनात् ।
मया न लक्षितं भार्द्धे कदाचित्कलिकापि यत् ॥ ४२ ॥

कुजस्य लम्बनं तस्मादुक्ता कक्षा महत्तरा ।
सूर्य्यस्यानुक्रमादस्यास्ताराख्यद्युषदामपि ॥ ४३ ॥
व्यर्कसूक्ष्मेन्दुबाहुज्या चन्द्रकर्णेन ताडिता ।
सौराद्युक्तार्ककर्णाप्ता फललिप्ता युतोनितः ॥ ४४ ॥
पक्षयोः शुभ्रभानुश्चेच्छुक्लाष्टम्यादिपादके ।
कृष्णाष्टम्यन्तपादे च पूर्णार्द्धः स्यान्न दृक्समः ॥ ४५ ॥
यत्तद्द्वितीयपादान्तत्तृतीयाङ्घ्रिप्रवेशयोः ।
चन्द्रार्द्धं लक्ष्यते साक्षात् सूर्य्यकर्णोऽधिकस्ततः ॥ ४६ ॥
महत्ता भवतात्कक्षाविम्बयोर्युक्तिभी रवेः ।
इयत्ता कथमानीता प्रश्नश्चेदिति कथ्यते ॥ ४७ ॥
न हि शब्दाखिलत्यागादनुमानं प्रशस्यते ।
विस्तारोऽङ्गीकृतो भानोस्तन्मया श्रुतिसम्मतः ॥ ४८ ॥
ब्रह्मविद्योपनिषदि प्रणवार्थनिरूपणे ।
द्वासप्ततिसहस्राणि योजनानीति भास्वतः ॥ ४९ ॥
श्रीमहापुरुषेणोक्ता विस्तृतिर्यान्तिमश्रुतौ ।
दृक्सिद्धा सार्कसिद्धान्तभूव्यासश्च तथा मतः ॥ ५० ॥
मध्यविम्बकलाभानोर्यन्त्रवेधेन लक्षिताः ।
भास्करेणोदिता दन्ताः३२ सदन्तविकला३२ यतः ॥ ५१ ॥
तावद्दृष्ट्यनुपातेन कर्णमार्गो मयोदितः ।
ततः कक्षाः परेषान्तु स्वशीघ्रफलदर्शनात् ॥ ५२ ॥
शैघ्राः परिधयः सिद्धास्तद्गुणाद्भांशभाजितात्३६० ।
कक्षावृत्ताद्रवेः सिद्धे स्वस्वकक्षे ज्ञशुक्रयोः ॥ ५३ ॥
भकक्षाया विभक्तायाः शैघ्रैः परिधिभागकैः ।
कुजेज्यमन्दकक्षाः स्युरिति सर्व्वं समञ्जसम् ॥ ५४ ॥

नतिलम्बनभूयस्त्वविम्बमानौ नतेर्वशात् ।
भूच्छायालोकनश्चन्द्रकक्षाविम्बाल्पता कला ॥ ५५ ॥
सूर्य्यान्तवृत्तसूत्रस्थग्रहाणामन्त्यदोःफलम् ।
मेषे भूमेरृजुगतात् सूत्रादृश्यबुधशुक्रयोः ॥ ५६ ॥
अधिकं दृश्यते यावद्भौमेज्यरविजन्मनाम् ।
यावन्न्यूनञ्च तद्बाहुफलान्तरकला यतः ॥ ५७ ॥
फलखाङ्गाग्न्यंश३६०तुल्या भकक्षा तादृशी ततः ।
दस्रादीतरभानान्तु न सीमा निश्चिता स्थितेः ॥ ५८ ॥
विम्बमानात्तु ध्रुवतोः स्वकर्णः परिचीयते ।
स्वकर्णावगतैर्भानां ज्ञायन्ते मण्डलान्यपि ॥ ५९ ॥
विम्बाक्षचक्षुषोर्मध्यस्थिता च्छदनपट्टिका ।
विम्बव्याससमा यत्र दृश्यान्यस्यात्र निश्चला ॥ ६० ॥
पट्टिकाक्ष्यन्तरं विम्बव्यासनिघ्नं तयोर्हृतम् ।
रवीन्दुकर्णमानं स्यात् कर्णाद्विम्बोऽपि सिद्ध्यति ॥ ६१ ॥
किञ्चोदयास्तमययोः प्राक् पश्चात् कुड्ययोर्गृहे ।
तद्वातायनमाच्छाद्य तालपर्णेन तत्र च ॥ ६२ ॥
विधाय वर्त्तुलं सूक्ष्मं छिद्रं तेनाध्वना गतः ।
आतपोऽपरभित्तिस्थो यो विम्बाकार ईक्ष्यते ॥ ६३ ॥
तद्व्यासश्छिद्रमानोनो हारः कुड्यविलान्तरम् ।
विम्बमानाहतं हारभक्तं कर्णः स्फुटो भवेत् ॥ ६४ ॥
यस्य भस्य ग्रहस्यापि चन्द्रेणास्तमयोदयौ ।
विलोक्येते समं तस्य मण्डलं ज्ञातुमिष्यते ॥ ६५ ॥
षट्त्रिंशद्धस्ततो दूरे चन्द्रविम्बापिधायकम् ।
भताराच्छादकं न्यस्य कुत्रचित्तालवृन्तकम् ॥ ६६ ॥

चन्द्रविम्बैकदेशोऽत्र यथा तत्तारकासमः ।
दृश्येत शुषिरं तावत् कार्य्यं तत्पादसङ्गुणात् ॥ ६७ ॥
तारकाकर्णतस्तालवृन्तनेत्रान्तरोद्धृतात् ।
फलं ताराग्रहव्यासो नान्यथायाति सौक्ष्म्यतः ॥ ६८ ॥
तिर्य्यं१५शोऽङ्गुलमंशस्य खमध्ये दृश्यते यतः ।
त्रिज्याङ्गु२८५९॥०ङ्गुलतो दूरं तन्नेत्रव्यजनान्तरम् ॥ ६९ ॥
अथ दीपद्रुमाद्युग्रादेर्दूरतौन्नत्ययोर्मितिम् ।
प्रसङ्गात् कौतुकाद्वक्ष्ये शङ्कुच्छायावलोकजाम् ॥ ७० ॥
उच्चस्थदीपतोऽभीष्टकाष्ठायां समभूतले ।
समशङ्कोर्निविष्टस्य छायाग्रदिशि तत्समम् ॥ ७१ ॥
शङ्कुमन्यं कियद्दूरे निवेश्यान्तरमेतयोः ।
द्वितीयशङ्कुभायुक्तं प्रथमप्रभयोज्झितम् ॥ ७२ ॥
पुनस्तयाघ्नं विभजेच्छाययोरन्तराङ्गुलैः ।
लब्धं प्राक् शङ्कुभाहीनं भवेद्दीपतलस्थलात् ॥ ७३ ॥
आपूर्व्वशङ्कुभूमानमथ लब्धं पुरोदितम् ।
शङ्कुघ्नं प्रथमच्छायाभक्तं दीपोन्नतिर्भवेत् ॥ ७४ ॥
शङ्कुदीपान्तरं शङ्कुगुणितं छाययोद्धृतम् ।
शङ्कुमानयुतं दीपोन्नतिः स्यादेकशङ्कुतः ॥ ७५ ॥
आक्रोशं पर्व्वताद्यत्र शृङ्गं तस्य विलोक्यते ।
तत्र तत्समसूत्रस्थौ शतदण्डाधिकान्तरौ ॥ ७६ ॥
पञ्चहस्तोच्छ्रितौ शङ्कू निवेश्यावक्रितौ दृढम् ।
नगशङ्क्वग्रयोः साम्यं दृष्ट्वादर्शे भुवि स्थिते ॥ ७७ ॥
तद्भाग्रे तत्र निश्चित्य विद्यान्मार्गोच्छ्रयौ तथा ।
दवीयसि गिरौ मार्गेऽनुमितेत्येकशङ्कुना ॥ ७८ ॥

भानुमध्यगतोन्नत्या सहदृश्यांशमस्य हि ।
तिर्य्यग्विस्तीर्णतां तिर्य्यक् शङ्कुनैवावगच्छतु ॥ ७९ ॥
द्रुमादाग्रतलस्थस्तु दृग्हस्ताधिकान्तरौ ।
तावन्तौ वार्धमानौ वा स्थाप्यौ तन्मितये नरौ ॥ ८० ॥
प्रमायार्केन्दुजां शङ्कुप्रमेयच्छाययोर्गतिम् ।
तुल्यकालभवां शङ्कुर्मेयभागतिताडितः ॥ ८१ ॥
स्वभागत्याप्त उच्छ्रायो ज्ञेयः शङ्कुभया तु सः* ।
तुल्यः शङ्कुहृतच्छायामानं तत्तलतो भवेत् ॥ ८२ ॥
अव्यग्रस्याङ्कखण्डस्य दृश्यार्कान्तरलिप्तिकाः ।
प्रमाय तत्क्षणं तद्वा स्वस्थानान्तरहस्तकान् ॥ ८३ ॥
त्रिज्याहतान् भजेत्ताभिश्छायातोऽभ्रश्रुतिः फलम् ।
सा तत्कालनृभाघ्नाप्ता तत् श्रुत्या द्विनघ्नहृद्भि ॥ ८४ ॥
आमेघतलभूमानं स्यात्तद्घ्नं प्रभाहृतम् ।
घनौन्नत्यमिति ज्ञेयमन्यत्त्रैराशिकक्रमात् ॥ ८५ ॥
यष्टादग्रप्रकाशोच्चदृष्टिसीमादिविस्तरात् ।
विशेषः कथ्यते कश्चिद्गोलताज्ञापकः क्षितेः ॥ ८६ ॥
शङ्कुदर्शनसीमा या परितो मण्डलाकृतिः ।
भूपृष्ठे साधिता सैव निजक्षितिजमण्डलम् ॥ ८७ ॥
तिष्ठता भुवि दूरत्वाद्यः पुंसा नैव दृश्यते ।
उच्चस्थानाधिरूढेन स पुनर्दृश्यते नगः ॥ ८८ ॥
अन्योऽन्यविप्रकृष्टागद्वयक्षितिजवृत्तयोः ।
यावत्सम्मेलनं तावद्दृश्यते भुवि तद्द्वयम् ॥ ८९ ॥

---

* उच्छ्रायः ।

यत् शङ्कोः क्षितिजस्थेन यावानंशोऽन्यशङ्कुतः ।
पुरतो दृश्यते तावांस्तदग्रे तिष्ठता ततः ॥ ९० ॥
क्षितिजे दृश्यलिप्ताद्याः क्षितिजान्यनरान्तरा ।
गुणिताः शङ्कुयुग्मान्तर्मार्गाप्ताः स्युर्नरे स्फुटाः ॥ ९१ ॥
ययोरतिदवीयस्त्वान्न लगेत् क्षितिजद्वयम् ।
तयोरेकाग्रनिष्ठेन नान्यः संदृश्यते क्वचित् । ९२ ॥
महाद्रिक्षितिजस्यान्तः क्षुद्राद्रिक्षितिजं यदि ।
लीयते तन्महागस्थः क्षुद्रं कौलीनमीक्षते ॥ ९३ ॥
उभयक्षितिजस्पर्शाद्यदि स्यान्मत्स्यरेखिका ।
तदाप्यतितनुं पश्येद्व्योमगं क्षितिजोपरि ॥ ९४ ॥
भूपृष्ठं यदि तुल्यं स्याद्दर्पणोदरवत्तदा ।
उच्चेऽनुच्चोऽपि दूरस्थो दृश्यः क्षित्यन्तरेण सः ॥ ९५ ॥
तद्गोलता स्फुटा साक्षाद्गिरेः क्षितिजमण्डले ।
यथा तथैव शिखरे ज्योतिश्चक्रस्य दर्शनात् ॥ ९६ ॥
प्राक् पश्चाद्दृष्टिसीमोत्थदेशान्तरपलै रविः ।
उदेति पुरतः पश्चादस्तमेति नगोपरि ॥ ९७ ॥
तिष्ठतः समभूस्थल्यां साब्धिहस्तत्रयोन्नतेः ।
पश्यतो नवसाहस्रहस्तैः क्षितिजनिश्चयात् ॥ ९८ ॥
तद्देशान्तरकालस्तु प्रलीनत्वान्न गण्यते ।
न व्यवह्रियते चाद्रौ दृक्सिद्धोऽपि क्षणाधिकः ॥ ९९ ॥

हस्तैरभ्ररसाङ्कसिद्धजलधिव्योमाष्टभिः८०४२४९६० संमितो
यन्मध्ये परिधिर्विभाविह महीपृष्ठे स्थितानां क्रमात् ।
शङ्कूनां किल तैस्तदर्द्धवपुषां क्रोशाब्धिसंख्या ध्रुवे
दृक्सीम्नां प्रथमोऽत्र षण्णवनभःपाथोधि४०९६हस्तोन्नतः ॥ १०० ॥

दृग्भूपाः१६२ शरशङ्कराः११५ कुवसव.८१ समेषवः५७ खाब्धयो४०
गोनेत्राश्वि२९ नखा२०श्चतुर्दश१४ दिशो१०गोत्राः७ शराः५ प्रायशः।
इच्छानृघ्नपरा४०९६मद्दृङ्नृपकृतेः२६२४४ सीमापदं गोः स्वनुः
सीमावर्गहृतः पराकृति२६२४४हृतोनाद्यः४०९६ स्वना सीमतः॥१०१

लक्षघ्नाष्टदिनेश१२८००००० हस्तमवनि-
व्यासार्द्धमेतत्कृतिं१६३८४००००००००००
सैकव्यासदलस्य१२८००००१ वर्गत१६३८४००२५६००००१ऋणी-
कृत्यावशेषात्२५६००००१ पदम्५०५९।३९ ।
इष्टसीमैककरस्य नुर्भवति तद्वर्गा२५६००००१इतादिष्टनु-
हस्तैर्मूलमभीष्टतुङ्गवधिश्चाहस्तलक्षाष्टकात् ॥ १०२ ॥

दिनाब्दहोरामासेशज्ञानायान्यग्रहस्थितिः ।
इष्टा तत्राल्पगतिकः स्थाप्य ऊर्द्धोऽप्यधः पुनः ॥ १०३ ॥
बहुभुक्तिकलः खेट इत्थमेष क्रमो भवेत् ।
स—मन्दामरेज्यभूपुत्रसूर्य्यशुक्रेन्दुजेन्दवः' । इति ॥ १०४ ॥
लेख्या अधोऽधस्तथाधो मन्दात्तुर्य्या दिनाधिपाः ।
गुरोरधस्तृतीयाश्च सावनाब्दाधिपाः क्रमात् ॥ १०५ ॥
कालहोराधिपा भौमाद्द्वितीयाः परिकीर्त्तिताः ।
लङ्कार्द्धरात्रतस्तेऽहोरात्रे स्युः सिद्ध२४संख्यकाः ॥ १०६ ॥
ऊर्द्धक्रमाद्द्वितीयाः स्युः शुक्रात् सावनमासपाः ।
सृष्ट्यादौ दिनमासाब्दहोरेशोऽस्माद्रविर्मतः ॥ १०७ ॥
वर्षमासदिनेशानां भवेदारम्भकालतः ।
मासाहःकालहोरेशप्रवृत्तिर्युगपत् क्षितौ ॥ १०८ ॥
प्रोक्तं चान्द्रार्द्धतः सूर्य्यतेजः शतगुणाधिकम् ।
दिग्१०गुणव्यासतः क्षेत्रफलं शतगुणं भवेत् ॥ १०९ ॥

स्यात्तेजःप्रसरः तेजःफलानुक्रमतो यतः ।
तद्व्यासदशमांशस्य दृश्यस्याशा१०गुणे पथि ॥ ११० ॥
शतांशस्तेजसो लभ्य इति तन्निर्णये स्थिते ।
द्विसहस्रगुणे दूरे स्वव्यासात्तिग्मदीधितेः ॥ १११ ॥
उष्णस्पर्शसमाप्तिः स्यात् किरणानां नभस्तले ।
अन्यग्रहाणामृक्षाणां शतद्वयगुणे पथि ॥ ११२ ॥
शीतोष्णस्पर्शनाशः स्यात्तथा भौमस्य तेजसः ।
स्पर्शान्तस्थानतः स्वांशुव्याप्तिः पञ्चाशता गुणैः ॥ ११३ ॥
अधिका किरणव्याप्तेर्मार्गे तत्त्व२५गुणाधिके ।
दृष्टिसीमेत्यनुमितं दीपार्केन्द्वनुभूतितः ॥ ११४ ॥
व्यासो हि सूर्यबिम्बस्य खखखाब्ध्यद्रियोजनः७२००० ।
स्पर्शकर्णस्तदुस्राणां प्रयुतघ्नाब्धिवासवाः१४४०००००००॥ ११५ ॥
किरणव्याप्तिकर्णोऽस्य कोटिघ्नखभूधराः७२००००००० ।
खखाभ्रष्टतयः कोटि-
गुणिताः१८०००००००००० दर्शनश्रुतिः ॥ ११६ ॥
कालाध्वनोर्नृमानं यत्तदभ्राङ्गाग्नि३६०ताड़ितम् ।
दिव्यमानं भवेत्तेन व्यासोऽस्य शतकोटिभिः ॥ ११७ ॥
योजनैः संमितोऽण्डस्य नृमानेनाम्बुकः पुनः ।
खखखाभ्राभ्रखाभ्राभ्र-
खाभ्रषड्वह्निभि३६००००००००००र्मितः ॥ ११८ ॥

ब्रह्माण्डान्तः खकक्षार्कभगणकिरण-
ध्वस्तविश्वतमिस्रा-
लक्षघ्नाभ्राङ्कभूभूवखगुणाशिवैः१३०९७६००००००-
योजनैः संमितास्यात् ।

सेत्था कलैव भानो रवितनुविकला
द्वादशांशोऽपि ह्रस्वो-
ऽन्येषां खिन्ना द्विसप्तां७२शक इतरमत-
व्यञ्जकं वच्मि किञ्चित् ॥ ११९ ॥

श्रीमन् भास्कर दुष्कराङ्कघटनाविष्कारवाचस्पते
त्वं चेत् पुष्करमास्य भास्करकरावस्कन्दितान्तस्तमः ।
कल्पोद्भूतनभोगभुक्तसरणीतुल्यात्मकक्षं तदा
किं ब्रूमो गुरुवर्गदुर्घटनया निर्विण्णचित्ता वयम् ॥ १२० ॥

स्वकक्षायां खेऽटभ्रमणगणभुक्ताभ्रसरणी
यदि स्याद्ब्रह्माण्डोदरपरिमिताकाहनि तदा ।
शताब्दा निष्ठायां पुरि परिवृतायां प्रतिदिनं
कयाचिद्रश्म्या स्तात् कुपरिधिसमस्तद्गतिपथः ॥ १२१ ॥

कोटिघ्नैर्नखनन्दषट्कनखभू-
भूभृद्भुजङ्गेन्दुभिः१८७१२०६९२०००००००-
स्वर्कोक्षस्य च योजनैः खपरिधिस्तत्रापि लक्षांशके१८७ ।
न स्याद्द्विद्विशरर्तु६५२२योजनरविव्यासस्य यद्दर्शनं
द्योतव्याप्तितमःक्षतिः क्व घटते स्वान्तेऽपि ते तन्मते ॥ १२२ ॥

सर्व्वाश्चर्य्यमहाम्बुधेर्भगवतः स्थूले विभौ धामनि
क्रीडाण्डाद्युगमाः स्फुरन्ति कतिधा नो वेत्ति वेधा अपि ।
तस्माद्वेदपुराणवर्णितजगन्मानादिकं नो मृषा
किन्त्वस्मद्वसतेर्भुवोऽन्तिकजुषामेषा स्थितिर्ज्योतिषाम् ॥१२३॥

शङ्खासुरासुहृतिनन्दितदेववृन्दः
शङ्खारिसुन्दरतराग्रकरारविन्दः ।

शङ्खाकृतिक्षितिपतिः प्रतनोतु नित्यं
शङ्खादिभूतमयकायनिकायभाजाम् ॥ १२४ ॥
इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
यातः प्रकाश इह भाश्वभृदूनविंशः ॥ १२५ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे गोलाधिकारे
भगोलखगोलवर्णनो नामैकोनविंशतितमः प्रकाशः ।

विंशः प्रकाशः ।

गोलाधिकारे गोलादियन्त्रवर्णनम् ।

यन्त्रं विना ग्रहगतिग्रहणादिकानां
स्याद्वासना न सुगमा समयक्रमस्य ।
तद्यन्त्रनिर्म्मितिमुपक्रमतेऽभिधातुं
श्रीचन्द्रशेखरकृती प्रतिभानुसारात् ॥ १ ॥
यन्त्रं द्विधा भवति गोलककालभेदात्
सन्त्येतयोः पुनरवान्तरभूरिभेदाः ।
तेभ्यः कियन्ति सुकराणि समाकलय्य
प्राधान्यतः शिशुमुदे विशदीकरोमि ॥ २ ॥
गोलाख्यमेककक्षं बहुकक्षमिति द्विधोच्यते यन्त्रम् ।
तत्राद्यमुक्तमादिभिरपरं मत्कल्पनासिद्धम् ॥ ३ ॥
शुभस्थले सुविमले सुस्नातोऽलङ्कृतः कृती गणकः ।
सम्पूज्य भास्करमुखान् ग्रहान् भचक्रं चतुर्व्यूहम् ॥ ४ ॥

इन्द्रादिलोकपालान् गुह्यकवर्गं गुरूनविघ्नाय ।
बोधार्थं शिष्याणां गोलकयन्त्रं निबध्नीयात् ॥ ५ ॥
निर्म्माय क्षितिगोलं षडङ्गुलमितस्ववेष्टनं समिधा ।
द्वीपाद्रिसागराद्यैरङ्कितमन्तर्गतस्वभ्रम् ॥ ६ ॥
तन्मध्ये ध्रुवयष्टिर्वृत्ताविष्टायतोत्तरावाच्योः ।
सरला करषट्कमिता कृशा दृढा मेरुदण्डाख्या ॥ ७ ॥
कार्य्या तद्धरणार्थं सपादकरपञ्चकान्तरं सौम्ये ।
याम्ये च स्थूणायुगं पञ्चकरोच्चं दृढं स्थाप्यम् ॥ ८ ॥
दारुण्यथवा भूमौ हस्तत्रितयोन्नतस्थले रन्ध्रे ।
निर्म्माय स्तम्भयुगे ध्रुवयष्ट्यग्रप्रवेशाय ॥ ९ ॥
भूयो भूगोलदलादक्षांशसमोन्नतानतस्थलयोः ।
भूसम्मुखीनरन्ध्रे सौम्यान्यस्तम्भयोः कार्य्ये ॥ १० ॥
आदौ त्वक्सारजया पट्टिकयाधारकक्षिकायुग्मम् ।
बद्धा भांशा२[illegible]मितमेकं क्षितिजाभिधं वृत्तम् ॥ ११ ॥
धृत्वा तत्र कराभ्यां मूर्द्धाधरसौम्ययाम्यकक्षाख्यम् ।
वृत्तं नियोज्यमन्यद्योगस्थानद्वये शुषिरे ॥ १२ ॥
कृत्वात्र ध्रुवयष्टिः प्रवेशिता स्तम्भरन्ध्रयोः स्थाप्या ।
श्लथमथ विषुवत्कक्षागोले बद्धाधरोर्द्धगता ॥ १३ ॥
भूमेर्निरक्षरेखोपरि खरसोषर्व्वुधा३६०ऽङ्गुलप्रमिता ।
नाड़ीमण्डलमेषा नाड़ीपलचिह्निता कार्य्या ॥ १४ ॥
तत्पार्श्वयोर्भुजैकद्वित्रिभज्यापक्रमस्थलेषु पुनः ।
षड्वलयाः क्रमतोऽल्पाहूरात्र वृत्ताख्यया स्थाप्याः ॥ १५ ॥
ध्रुवयष्टिशिखाविद्धस्वनाभिफलकद्वयं न्यसेदभितः ।
तन्नेमौ च शलाकाः खरसगुणा ३६० सन्निवेश्यासाम् ॥ १६ ॥

वलयार्द्धाकाराणामग्राण्यपि वज्रलेपसुदृढानि ।
कृत्वान्तरजतुलाद्योर्न्यसेद्ध्रुवौ सौम्ययाम्यौ च ॥ १७ ॥
ध्रुवचिह्नात्फलकान्तं वलयैरेकाङ्गुलान्तरैरंशाः ।
लेख्यास्तिर्य्यग्भांशा अथ गोले वेणुजैर्वलयैः ॥ १८ ॥
आविषुवद्वलयान्तात् क्रमाधिकैर्गाढसूत्रसंनद्धैः ।
अत्रांशा रचनीया इत्यभितो भांश३६०संस्थाने ॥ १९ ॥
निश्चित्य राशिसन्धीनपवृत्तं तत्तदङ्कसंलग्नम् ।
अयनांशसंस्कृततुलामेषाद्योः संस्पृशद्विषुवम् ॥ २० ॥
तत्कर्किनक्रमुखयोः सदलाग्निभुजां२३॥०शदूरगं विषुवात् ।
कलनीयं कुशलधिया रविगतिमार्गं यदेवाहुः ॥ २१ ॥
ऊर्द्धाधः प्राक्पश्चिमयाम्योत्तरविन्दुषट्कमत्रैव ।
प्रत्येकं स्वस्तिकमिति गदितं खस्वस्तिकं चोर्द्धम् ॥ २२ ॥
चन्द्रादीनां पातानपमण्डलगान् विधाय तद्भार्द्धे ।
पातस्थाने च लगत्क्रान्तिजवृत्ते विमण्डलं तु ॥ २३ ॥
पातात्पश्चात्पुरतो याम्योत्तरगं विमण्डलं क्रान्तेः ।
परमशरान्ते देयं तेषां मध्येऽनुपातेन ॥ २४ ॥
किन्तु कुजादेः पाताश्चलफलभागैः सुसंस्कृताः स्थाप्याः ।
श्रुतिसंस्कृतविशिखान्ते तद्गतिमार्गो विवृत्ताख्यः ॥ २५ ॥
क्षितिजवलयं निरक्षेऽप्युन्मण्डलनामकं परिज्ञेयम् ।
तच्चरहेतुस्तस्मात् स्वक्षितिजात् खार्द्धगान्त्यज्या ॥ २६ ॥
आधारविषुवकक्षाव्यपवृत्तक्षितिजनामवृत्तानाम् ।
साम्येऽपि किञ्चिदधिकं क्षितिजं कार्य्यं चलत्वाय ॥ २७ ॥
भूसहितध्रुवयष्टेर्निश्चलभावो भगोलचलता च ।
भवति यथैवं नाभ्योस्तैलं योज्यं सुखभ्रान्त्यै ॥ २८ ॥

इत्थम्भगोलरचनां कृत्वा तत्र ग्रहर्क्षविन्यासः ।
ग्रहलवकलिकाक्रान्तिक्षेपानुसृतैः स्फुटः कार्य्यः ॥ २९ ॥
निजनिजमार्गानुगतैः सूचैर्ग्रथिता ग्रहाः स्वचारवशात् ।
नेया ग्रहणाद्यूह्यं प्रवहगतिर्गोलचालनतः ॥ ३० ॥
लङ्कास्थित्यनुसारात् प्रथमं संस्थाप्य गोलमेवमथो ।
ध्रुवयुगसमोन्नतलिके निर्म्मायाधःशलाकया विद्धे ॥ ३१ ॥
तद्बहिरपि च खगोलं षड्भिर्वृत्तैर्दृढं निबध्नीयात् ।
तत्र क्षितिजं पूर्व्वापराभिधं याम्यसौम्याख्यम् ॥ ३२ ॥
कोणाख्यवृत्तयुगलं दिङ्मण्डलनामकं षडेतानि ।
निश्चलखगोलमध्ये भगोलचलनं भवेदत्र ॥ ३३ ॥
अथ निजदेशे भादिन उदयास्तमयादि वीक्षितुं साक्षात् ।
स्तम्भयुगोर्द्धाधरयोर्ध्रुवयष्टी रन्ध्रयोः स्थाप्याः ॥ ३४ ॥
गोलद्वये स्वदेशानुसारि सममण्डलं तथा क्षितिजम् ।
बद्धा खगोलकान्तर्याम्योत्तरमण्डलस्य पुनः ॥ ३५ ॥
सममण्डलस्य योगस्थानयुगे कीलकद्वयं न्यस्य ।
दृग्गोलाख्यं वृत्तं तत्र नियोज्यं श्लथं विदुषा ॥ ३६ ॥
ऊर्द्ध्वाधः प्राक्पश्चादायतसमवृत्तवद्भगोलबहिः ।
तद्भ्रमणीयमिच्छावशतो ध्रुवयष्टिपर्य्यन्तम् ॥ ३७ ॥
अभितश्चार्ध्यं खेटः प्रयाति यत्रापि तत्र तन्नेयम् ।
विभिन्नलग्नं प्रति चेन्नेयं दृक्क्षेपवृत्तं स्यात् ॥ ३८ ॥
गोलपृष्ठनिवेशितमपि खगभगणं मध्यस्थया दृष्ट्या ।
तदुदरगतमिव पश्येदन्तर्नरगत्यसम्भवतः ॥ ३९ ॥
कोणेषु दिक्षु परितः प्रोतैः कीलैर्धृतः समिद्वलयः ।
क्षितिजसमोन्नतिरंशुकवेष्टित इदमर्द्धलुम्देयः ॥ ४० ॥

किंवार्द्धमग्नवपुषं गोलं खाते निधाय तद्भ्रमणात् ।
क्षितिजोपरिगतभार्द्धं भूस्थितिकृत्या बुधैर्द्दृश्यम् ॥ ४१ ॥
शिरोमणौ—बद्धा भगोलमेवं यष्ट्यां यष्ट्यां खगोलनलिकात्मम् ।
प्रक्षिप्य भ्रमयेत्तं यष्ट्याधारे स्थिरौ खदृग्गोलौ । इति ॥ ४२ ॥
धरणीगोलभगोलकदृग्गोलखगोलसन्निपातेऽपि ।
यन्त्रमिदमेककक्षं ज्योतिश्चक्रं यदेकत्र ॥ ४३ ॥
इत्थं विधुकक्षात्मकभगोल एवाथ वा कुशाग्रधिया ।
पृथुलतरः क्षुद्रतरो गोलः कार्य्यः स्वकल्पनया ॥ ४४ ॥
अथाभिधास्ये बहुकक्षयन्त्रं यत्प्रेक्षणादेव नभश्चराणाम् ।
सञ्चारबिम्बाशुगमानवक्रावक्रादि साक्षाद्भवति क्षमायाम् ॥ ४५ ॥
कृत्वैधसादौ घनचक्रयुग्मं हस्तोन्मितव्याससमुदीच्यवाच्योः ।
बहिःस्थितस्तम्भयुगप्रगाढप्रोताक्षयुग्मार्पितनाभिदेशम् ॥ ४६ ॥
धाराद्दृढप्रोतनिजारवारप्रान्तस्फुरद्वर्तुलनेमियुग्मम् ।
खाङ्का९०ङ्गुलाक्षप्रधिजान्तरालं संस्थाप्य हस्तत्रयदूरगं तत् ॥ ४७ ॥
नेमिद्वयस्यूतिदृढाः शलाकाश्चक्रद्वयभ्रान्तिकृते स्ववक्राः ।
देयास्त्रिहस्ताभ्यधिकास्तदन्तः क्ष्माखेटकक्षाः परिकल्पनीयाः॥४८॥
याम्यारितश्चाङ्गगुणा२६ङ्गुलान्तदीर्घस्य सौम्याभिमुखस्य सूक्ष्मे ।
अक्षस्य मूर्द्धन्यनुवेश्य पृथ्वीं तन्वीं विधोस्तत्परितश्च कक्षा ॥ ४९ ॥
षडङ्गुलाद्व्यङ्गुलराशियुक्ता क्रान्त्युच्चपातानुगता श्लथा च ।
याम्यारिसंसक्तचतुःशलाका कार्य्योर्द्ध्वसूत्रग्रथिताणुचन्द्रा ॥ ५० ॥
चक्राङ्कितद्वादशराशिरेखानुसारतश्चन्द्रमृदू[illegible]तौ ।
स्वकालजौ दक्षिणचक्रमध्ये देयावुदीच्यन्यनभश्चराणाम् ॥ ५१ ॥
ततो विधेया ग्रहचक्रयष्टिरुदीच्यचक्रोदरभेदयोग्या ।
सूक्ष्माग्रनिष्ठा पृथुमध्यभानुर्मूले पृथुः खेचरचक्रहर्त्री ॥ ५२ ॥

तदग्रजाग्रत्तनुकीलकाग्रे मध्यार्कतश्चाङ्गुलयाद्दूरे ।
न्यस्तो रवितुङ्गदिशि स्फुटाख्यः पृथुः पृथिव्या विमलः सुवृत्तः ॥५३॥
आधारदारुग्रहचक्रयष्ट्यां सपादहस्तान्तरितोत्तरस्थम् ।
विन्यस्य तत्रोत्कटदारुकाष्ठैर्विलग्नकैर्द्वादशभिर्विधेयम् ॥ ५४ ॥
आधारचक्रं तदरस्थरन्ध्रप्रसूततिर्य्यग्यमदिङ्मुखस्य ।
अग्रेषु कीलप्रचयस्य मध्यसूर्य्याभिवेष्टग्रहचक्रकक्षाः ॥ ५५ ॥
आमोचनीया वलयैः स्ववृत्ताभासाल्पयोश्चापमपातजातैः ।
सर्वांशचिह्नाः स्वकयात्र नेया तत्पृष्ठसूत्रग्रथिता ग्रहालिः ॥ ५६ ॥
मध्यार्कसंवेष्टनकाम्रकक्षा धृत्य१८ङ्गुलास्याच्चिपिटात्मपृष्ठा ।
तद्वत्सितस्यार्थगुणा२५ङ्गुला सा द्व्यद्र्यङ्गुला७२ मङ्गलकक्षिकैव ॥५७॥
गुरो रसाम्भोधिभुजा२४६ङ्गुलाथ कुपाब्धिवेदा४४१ङ्गुलकार्कसूनोः ।
विमण्डलाख्या इति खेटकक्षाः पूर्व्वोक्तकीलेष्वसमेषु योज्याः ॥५८॥
कीलोच्चयो दक्षिणदिङ्मुखो यद्विमण्डलानुक्रमतो निकृत्तः ।
स्वाक्षोलसन्धौ सममण्डलायो मध्यार्कतोऽत्रागयनान्तसंस्थः ॥ ५९ ॥
दीर्घोऽथ सौम्यायनपूर्त्तिनिम्नः क्षुद्रोऽन्यराशावनुपातसिद्धः ।
प्रत्येकभिन्नो मृदुपातभेदात् कक्षानुसारादरमण्डलस्थः ॥ ६० ॥

मध्यार्ककक्षाभ्रमणाय सौम्ये
निखाय चक्रे परितः स्वमध्यात् ।
साष्टाब्धिलिप्ताद्रि७२८मिताङ्गुलान्ते
मध्यं यथा स्यात्प्रविभिद्य काष्ठम् ॥ ६१ ॥

तथैव गर्त्तं वलयाय मानं सौम्यायनान्ते विततावकाशम् ।
याम्यायनान्तेऽल्पमितान्तरालं तस्मिन् प्रवेश्या ग्रहचक्रयष्टिः ॥६२॥
सौम्यादिवाह्यस्थजनेन सैव प्रचालिता चेल्लया भगर्त्ते ।
प्राचीं प्रति स्वेष्टग्रहांशकादौ स्थाप्या दृढं कीलकपातनाद्यैः ॥६३॥

यथा तदग्रस्थरविर्धरित्र्याः
स्याद्गोलसन्धौ सममण्डलस्थः ।
सिद्धां२४शयुक् त्र्यङ्गुल३।२।३०सौम्यभागे
युग्मान्तगस्तावदवाक्प्रदेशे ॥ ६४ ॥

चापान्तगस्तिष्ठति तद्वदेष कार्य्योऽल्पभूर्विलयावकाशः ।
याम्यार्य्यैरान्तर्विंशतान्तरं वा धृत्वा प्रचाल्या पुरुषेण यष्टिः ॥ ६५ ॥
नक्षत्रचक्रं प्रकृतं नभस्थं प्रत्यर्कमध्यान्निजकालयातान् ।
कृत्वा ग्रहांस्तत्समयानुसाराद्भूमध्यतो भानुमपि प्रचाल्य ॥ ६६ ॥
भूखेटसूत्रेक्षितभांशकादौ दृश्यः स्फुटः खेट इतीषुविम्बौ ।
ततो बहिर्भूय जनेन तेन यन्त्रस्य पश्चाद्भ्रमणं विधेयम् ॥ ६७ ॥

यन्त्रस्य वा सूक्ष्मधिया समन्तात्
कार्य्या भकक्षा शरवेद४५हस्ता ।
स्थानेऽर्पिता योग्यतमे ततोऽस्यां
वक्रार्ज्जवाद्यं सकलं हि लक्ष्यम् ॥ ६८ ॥

किंवार्कतः खेचरचक्रसूत्रे कृताब्धिरामा३४४ङ्गुलदूरमुर्व्याः ।
स्तम्भद्वयं प्राक्परयोर्निवेश्य तत्रांशकानङ्गुलषट्कतुल्यान् ॥ ६९ ॥
वक्रेऽपवृत्तोपमयाङ्कयित्वा कृत्वार्कमध्यं क्षितिपश्चिमस्थम् ।
मध्यार्य्यमाक्रान्तगृहादिभार्द्धे निवेश्य भौमं निजकक्षिकायाम् ॥७०॥
तद्भूमिसंसक्तगुणं प्रसार्य्य प्राक्स्तम्भपर्य्यन्तमयं यमांशम् ।
तत्र स्पृशेदङ्कमिहार्पयित्वा गजाम्बुराश्य४ङ्गुलकक्षिकायाम् ॥७१॥
मध्ये रवावङ्गुलमानभुक्तिं निक्षिप्य पश्चाद्द्विगतिं कुजेऽर्कात् ।
पूर्व्वार्पिताङ्कात्कुजभूमिसूत्रमूर्द्धांशगं वीक्ष्य महीस्थदृष्ट्या ॥ ७२ ॥
दृश्येत वक्रा गतिरेवमन्यनभश्चराणामृजुवक्रतापि ।
गतिर्विधोश्च ग्रहणादि सर्व्वं प्रेक्ष्यं निरक्षानुकृतेक्षणेन ॥ ७३ ॥

सितारकक्षान्तरगेन्दुकक्षा संबध्यमाना न भवेद्यथाभ्याम्।
तथा बुधेनावहितेन खेटचक्रं पुरो नेयमभीष्टभादौ॥ ७४॥
इदं मदुक्तं बहुकक्षिकाख्यं यन्त्रं यदत्राखिलखेचराणाम्।
पृथक् पृथक् सूत्रपरीतवृत्तैर्दृश्या गतिर्नैकविधा दिवीव॥ ७५॥
गोलाख्ययन्त्रस्थितये निजांशच्छायाभ्रमाद्यन्त्रपरिभ्रमाच्च।
कालस्य बोधे सुगमेऽपि बालव्युत्पत्तये वच्मि पृथक्कियन्ति॥ ७६॥
चक्रेण यष्ट्या धनुषा नरेण तूर्येण घट्या फलकादिना च।
काचैः पयोभिः सिकतादिभिश्च सूत्रैः स्म कालं कलयन्ति तज्ज्ञाः॥७७
गोलार्द्धयन्त्रं समयावगत्यै कृत्वा मृदा कुम्भदलस्वरूपम्।
दिक्चिह्नमत्यामवनौ निधाय तदूर्द्ध्ववक्त्रं खलु भार्द्धबुद्ध्या॥ ७८॥
उदग्ध्रुवं दक्षिणभित्तिमस्तकादधोऽक्षभागैरुदरे निवेश्य च।
ततो ध्रुवार्कान्तरभागतुल्यया शलाकयोदङ्मुखया ध्रुवस्थया॥ ७९॥
विलिख्य तत्पश्चिमभित्तिमूर्द्धतः पुरःस्थभित्त्यन्तविसर्पिरेखिकाम्।
निधाय तद्व्यासदलप्रमाणकं नरञ्च मध्ये सरलं दिनादितः॥ ८०॥
खषट्कनाड़ीपललक्ष्मलक्षिते पुरोक्तरेखावलयार्द्धकेऽन्वितात्।
नरप्रभाग्रात्समयं प्रतीयतां सितांशुतो निश्यपि सूक्ष्मबुद्धिना॥ ८१॥

नभसि निरवलम्बे खेचराणामुडूनां
ग्रहलवघटिकाद्यैरन्तरं यन्त्रवेधैः।
परिकलयितुमिष्टं मानयन्त्रं प्रवक्ष्ये
धरधरणिरुहादि स्याद्यतोऽपि प्रमेयम्॥ ८२॥
घनरससमभूमौ वृत्तमालिख्य भांशा३६०-
ङ्कपरिमितमेतत्स्वांशकैरङ्कयित्वा।
ऋजुलघुमिह दत्त्वा पट्टिकां पृष्ठलग्नां
परिधिलववलगद्भिः केन्द्रनिर्यातसूत्रैः॥ ८३॥

विरचयतु बहि:स्थे पट्टिकान्ते लवाङ्का-
स्तनुलवनसमुत्थांस्तत्र सोपानकल्पान् ।
लगयतु पुनरस्या मध्यभागेऽपि दण्डं
दृढमृजुमथ वृत्तव्यासतोऽर्द्धप्रमाणम् ॥ ८४ ॥
सदलगृहसमा वा पट्टिकाराशितुल्या
तिथि१५लवकलिता वा वाञ्छितांशैर्मिता स्यात् ।
पुनरिह लवनाङ्काद्दुहृंत्र्यकास्त्र्यंशका वा
कृत४शर५लवका वा स्वेच्छया निर्मिताः स्युः ॥ ८५ ॥
नयनतलगमूलं पाणिनादाय दण्डं
द्युचरविवरमध्ये पट्टिकांशैः प्रमातात् ।
ग्रहभवसतिचिह्नात्स्वल्पगागामि तत्त-
द्विवरलवकषट्कैस्त्रिज्यया२४३८ ताड़ितैस्तु ॥ ८६ ॥
निजनिजदिनजीवाभाजितैर्नाड़िकाः स्यु-
र्गिरिमुखनरमूलस्वान्तरा हस्तसङ्घात् ।
सकललवकशङ्कुज्याहता दृग्ज्ययाप्ता
भवति फलकराद्यं मानमद्रिद्रुमादेः ॥ ८७ ॥
बहलसलिलवर्षं वीक्ष्य तस्योर्द्ध्वसीमो-
न्नतनतलवकेभ्यः शङ्कुदृग्ज्ये विधाय ।
खखशरकर२५००हस्ता दृग्ज्यकाप्ता नराप्ताः
स्वजलदतलभूम्योरन्तरं प्रायशः स्यात् ॥ ८८ ॥
नरयुगलसुसाध्यं मानमानेतुमस्मा-
दपि कलयतु शङ्कुस्थानयोः सन्निविष्टः ।
नगमुखसमदृश्यं पट्टिकान्तःप्रदेशं
नरमितिरिति दण्डं भेतिमेयान्तिकस्थम् ॥ ८९ ॥

अनिकटभुवि सिद्धे शङ्कुनी संस्थिते स्तः
प्रथमनरविभिन्नौ दूरशङ्कुप्रभे ते ।
क[illegible]कर्णौ भासमानात्तु नो वा
भव[illegible]मगार्द्धैक्यं तिर्य्यक्प्रमाणम् ॥ ९० ॥
स्फुटतरपरिमाणख्यापयत्यै तु दण्डः
शरयुकरमितदैर्घ्यः कार्य्य एतत् शिखायाम् ।
चिकलयिषितसाम्यप्रापिताच्छा शलाका
नर इति गमनीया संस्कृतिः स्यात्तथैव ॥ ९१ ॥
ध्रुवसमनमग्रं वीक्ष्य तत्प्राक्प्रतीच्योः
यष्टियुगविवरज्यां चोन्नतज्यां तथाद्रेः ।
क्षितियुगविवरघ्नी सोन्नतज्याद्वयाप्ता
भवति शिखरमानं दूरता दृग्ज्यकातः ॥ ९२ ॥
चक्रं वृत्तं तद्दलं चापमंशं चापस्यार्धं यष्टिनामास्ति यन्त्रम् ।
चक्रेणाहोरात्रकालस्तदर्द्धचापेनाह्नि ज्ञायते तस्य यष्ट्या ॥ ९३ ॥
काचपात्रयुगलं परस्परं सम्मुखीनमणुमध्यरन्ध्रकम् ।
संविधाय जलपूरितैकतो निःसरेदपरपात्रके जलम् ॥ ९४ ॥
यावताथ समयेन तावता व्यस्तसंस्थितिवशात् पुनस्ततः ।
उद्धृतस्तु गतेऽपि निःसरेदित्यमत्र सिकताभिनिःसृतिः ॥ ९५ ॥
मयूरनरवानराः कुशलशिल्पिना कल्पिताः
ससूत्रजलकोदराः सलिलगामिपात्रस्थितेः ।
रसादिभिरनुद्रुतं निजमुखेन मण्यादिकं
गिलन्ति गुणगुम्फितं प्रतिमुहूर्त्तमिच्छावशात् ॥ ९६ ॥
गोलार्द्धाकृतिघटितं सुताम्रपात्रं
छिद्रेणाप्यतितनुना तले समेतम् ।

कुण्डाम्भस्यवहलभित्तिपातितं सद्-
घट्या मज्जति यदिदं कपालयन्त्रम् ॥ ९७ ॥
भास्करेणोदितं यस्मात् फलकाख्यं सुविस्तरात् ।
यन्त्रं तदत्र न मया गदितं विदितं पुनः ॥ ९८ ॥
यन्त्रं स्वयंवहमिहाभिदधामि चक्रं
षष्ट्यङ्गुलात्मवलयातततुल्यनेमि ।
निर्म्माय षष्टिघटिकात्मकरेखिकाढ्यं
रेखान्तरेष्विषु५मितैर्वृतमंशचिह्नैः ॥ ९९ ॥
हस्तत्रयोन्नतिमदुत्तरदक्षिणस्थ-
स्थूणाग्ररन्ध्रयुगनिश्चलसन्निवेशे ।
अक्षे सुवृत्तमसृणे विनियोज्य नाभिं
चक्रस्य तुल्यलघुताखिलवेष्टनस्य ॥ १०० ॥
प्राक्पश्चिमक्षितिगयो रविचन्द्रचिह्ने
दत्त्वास्य वासरनिशापरिवर्त्तहेतोः ।
प्रत्यग्भ्रमार्थमपरक्षितिजाधरस्थं
ताम्रादिनिर्म्मितमृजुं नलकं निदध्यात् ॥ १०१ ॥
षष्ट्यङ्गुलप्रमित-तन्नलकोदरस्थ-
तोयं यथा स्रवति षष्टिघटीभिरेवम् ।
छिद्रं तले विरचयेत्तदधश्च भाण्डं
स्थित्यै विनिःसृतजलस्य निधाय भूयः ॥ १०२ ॥
चक्रापरक्षितिजवेशितसूक्ष्मकीले
बद्धाग्रमेकमथ सूत्रमधःक्रमेण ।
पूर्व्वोर्द्ध्वपश्चिमतया परिवेष्ट्य नेमिं
कीलाधराम्बुपरिलम्बितमेव कुर्य्यात् ॥ १०३ ॥

यद्वा मृणाङ्गुल-इहैव हि पारदाढ्यं
शुल्वं नलोदरमलक्षदलाबुपात्रम् ।
तोये निपातयतु तेन तलाभिकृष्ट-
शून्यं भ्रमत्यरिसहक्चनकैर्धुराचे ॥ १०४ ॥
प्रातः पुरःस्थितरवेः सविधे शलाकां
तिर्य्यग्ददत्स्वघटीरुदिताः प्रमातुम् ।
अङ्कैर्युरात्रवयवान् कलयेत्परेद्युः
प्राग्वन्नियोजयतु जीवनपूरणाद्यैः ॥ १०५ ॥
चक्रार्द्धतोऽवनितलावधि गोपनीयं
सर्व्वं भ्रमोपकरणं खलु दर्शकेभ्यः ।
तेषां भवेन्न हि चमत्कृतिरन्यथाच
सच्छात्रनेत्रपतनार्हमदो यदेव ॥ १०६ ॥
अथ पुरोदितगोलपरिभ्रमो भवति चक्रवदत्र मतान्तरम् ।
ध्रुव इह ध्रुवचक्रविलाग्रगौ पृथुलदारुमयौ वलयौ क्रियात् ॥ १०७॥
विमलतैलमिलद्विलयुग्मके समसुहृत्त्रिशिखां ध्रुवयष्टिकाम् ।
अभिनिवेश्य पुनस्तनुकीलकौ व[illegible]यविमगौ नलकावधः ॥ १०८ ॥
तदनुसारिरसान्विततुम्बिकायुगलकृष्टगुणौ रचयेत्तथा ।
इति कृतेऽखिलकर्म्मणि गोलको भ्रमति संस्थित एव निरन्तरे॥१०९॥

सू—ग्रहनक्षत्रचरितं ज्ञात्वा गोलञ्च तत्त्वतः ।
ग्रहलोकमवाप्नोति पर्य्यायेणात्मवान्नरः । इति [illegible]० ॥

शि—दिव्यं ज्ञानमतीन्द्रियं यदृषिभिर्ब्राह्मं वशिष्ठादिभिः
पारम्पर्य्यवशाद्रहस्यमवनौ नीतं प्रकाश्यं ततः ।
नैतद्द्वेषिकृतघ्नदुर्ज्जनदुराचाराचिरावासिनां
स्यादायुःसुकृतक्षयो मुनिकृतां सीमामिमामुज्झतः। इति॥१११॥

कृतप्रतिनिवृत्तयो मनुजवीथयो यन्महा-
प्रसादपरिपूरितोदरकराननाः पावनाः ।
पुनन्ति पतितान् पथि स्वतनुमारुतैर्मादृशो
दृशोर्वहतु मेऽन्वहं महमदो महान्तं महः ॥ ११२ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
विंशोऽगमद्घटितयन्त्रकथः प्रकाशः ॥ ११३ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे गोलाधिकारे
गोलादियन्त्रवर्णनो नाम विंशतितमः प्रकाशः ।

एकविंशः प्रकाशः ।

वासनाशेषरहस्यवर्णनम् ।

कृत्वा ग्रहाणां गोलानां गणितक्रमवर्णनम् ।
प्रत्युक्तिशेषमिषतो वासनादिक् प्रदर्श्यते ॥ १ ॥
व्यक्षे क्षितिजवृत्तं यत्तदुन्मण्डलमन्यतः ।
स्वदेशक्षितिजे सूर्य्योदयोऽस्मात् स्वनिरक्षयोः ॥ २ ॥
द्युरात्रवृत्तानुसृतेश्चरं सूर्य्योदयान्तरम् ।
द्युरात्रमण्डले यस्मात् क्षितिजादुपरिस्थिते ॥ ३ ॥
दिनं भवेदधःसंस्थे ततो भवति यामिनी ।
तस्मात् समत्वं सततं द्युनिशोर्व्यक्षदेशके ॥ ४ ॥
निरक्षोदयतः पूर्व्वं सौम्यगोले स्वदेशजः ।
उदयोऽस्तमयः पश्चाद्याम्यगोले विपर्य्ययः ॥ ५ ॥

क्षितिजोर्द्धाधरःस्थत्वादुद्वृत्तस्य च गोलयोः ।
सौम्ये महद्दिनं रात्रिस्तनुर्याम्ये तु वाम्यतः ॥ ६ ॥
सार्द्धषट्षष्टि६६।३०भागेभ्यो देशे यत्र पलांशकाः ।
भवन्त्यभ्यधिकास्तत्र विशेषोऽपर उच्यते ॥ ७ ॥
लम्बाधिकोत्तरक्रान्तिर्यावत्तावत्सदा दिनम् ।
याम्यक्रान्तिस्तथा यावत्तावत्तत्र निशानिशम् ॥ ८ ॥
देवासुराणां क्षितिजं विषुवद्वलयं यतः ।
सौम्ययाम्यध्रुवौ तेषां मस्तकोर्द्धस्थितौ ततः ॥ ९ ॥
ऊर्द्ध्वं भ्रमन्तं क्षितिजादुदग्दक्षिणगोलयोः ।
सव्यगं सूर्य्यमीक्ष्यन्ते देवा दैत्यास्त्वसव्यगम् ॥ १० ॥
अस्मादुत्तरगोलस्थे भानौ दिविषदां दिनम् ।
रात्रिरत्र च दैत्यानां वैपरीत्यादहर्निशम् ॥ ११ ॥
सुराणां दिनयामिन्यौ सौम्ययाम्यायने इति ।
स्मृतिर्दिनोन्मुखे रात्र्युन्मुखेऽर्के समता तयोः ॥ १२ ॥
निशाहर्द्दलयोर्भानोर्यदारोहावरोहयोः ।
स्यादारम्भस्ततः कृत्यं देवानां स्याद्द्युरात्रजम् ॥ १३ ॥
ब्रह्मातिदूरगो भूमेः पश्येदाप्रलयं रविम् ।
दिनान्तेऽस्तमिते शेते तत्रेत्युक्तिः पुराविदाम् ॥ १४ ॥
अन्यस्य तदहःकर्त्तुर्मनने सति भास्वतः ।
भ्रान्तिर्युगसहस्राभ्यामेका तस्यापि मन्यताम् ॥ १५ ॥
दिनं स्याद्दर्शने भानोर्यतो रात्रिरदर्शने ।
पितॄणां तद्दिनं मासा शशिपृष्ठनिवासिनाम् ॥ १६ ॥
मध्यन्दिनं स्याद्दर्शान्ते पूर्णिमान्ते निशादिनम् ।
सितेऽसिते पक्षदले सायं प्रातरितः क्रमात् ॥ १७ ॥

यत्रापमण्डलं प्राच्यां लगति क्षितिजे लवे ।
लग्नस्तद्राशिभागाद्यमस्तलग्नः परे कुजे ॥ १८ ॥
क्षितिजद्वयमध्यस्थौ प्रदेशादधरोर्द्ध्वगौ ।
पातालमध्यलग्नाख्यौ ज्ञेयौ त्रिप्रश्नदर्शनात् ॥ १९ ॥
तिरश्चीनोऽपवृत्तस्य प्रदेशोऽस्तमयोदयौ ।
यात्यल्पकालेन ऋजुर्बहुना समयेन यत् ॥ २० ॥
ततो न तुल्या उदया व्यक्ते चक्राङ्घ्रयः पृथक् ।
उद्यन्ति तिथिनाडीभिर्भार्द्धं सर्वत्र खाग्निभिः३० ॥ २१ ॥
अजादिं क्षितिजे कृत्वा भ्रमयन् गोलकं सुधीः ।
सर्वमुक्तमनुक्तं च शिष्यबोधाय दर्शयेत् ॥ २२ ॥
अक्षांशाः पञ्चभांशोनाः सप्तति६९।३४र्यत्र तत्र हि ।
नेक्ष्येते नक्रधनुषी कर्कयुग्मे सदोदिते ॥ २३ ॥
सार्द्धाष्टाद्रि७८।३०मिता यत्र तत्र राशिचतुष्टयम् ।
वृश्चिकाद्यमदृश्यं स्याद्वृषभाद्यं सदोदितम् ॥ २४ ॥
पलांशा नवतिर्यत्र सुमेर्वाख्येऽत्र केन्द्रके ।
भार्द्धं तुलाद्यलक्ष्यं स्यात् सदोदितमजादिकम् ॥ २५ ॥
एवं दैवे भुवो भागेऽथासुरेऽचलवक्रमात् ।
व्यत्ययाद्दृष्टलुप्ताः स्यू राशयोऽयनसंस्कृताः ॥ २६ ॥
ग्रहाणां योजनगतेः साम्यं स्वीक्रियते यदि ।
तदा गतिक्रमात्कक्षाविस्तारः कर्त्तुमिष्यते ॥ २७ ॥
तथा सति न दृक्तुल्याः शैघ्राः परिधयो हि यत् ।
भवन्तीत्युदिताः सूर्याद्बुधाद्याः क्रममन्दगाः ॥ २८ ॥
हानिवृद्ध्यन्वितः शैघ्रफलानां विम्बबाणयोः ।
सिद्धान्तेऽनुक्तमप्युक्तं ज्ञादीनामर्कवेष्टनम् ॥ २९ ॥

भुवः परित इन्द्वर्कौ मध्यमार्काद्बुधादयः ।
मध्यार्कसावनाह्निने यावद्यान्ति पुरो दिशम् ॥ ३० ॥
स्वाभाविकी गतिः सैषां मन्दोच्चाकर्षणात्तु सा ।
कलाद्यैर्भिद्यते नित्यं दूरसामीप्ययानतः ॥ ३१ ॥
नानाचार्यनिर्दिष्टानां भगणानां विभेदतः ।
कैश्चित्कल्पादिकालस्य गणना सम्मता न यत् ॥ ३२ ॥
तत्पाषण्डमतं यस्मात् सिद्धान्तोदितपर्ययैः ।
तदुक्तकुदिनानीतमध्यमेन्दुविवस्वतोः ॥ ३३ ॥
अद्यावध्यार्यभट्टस्य कालात् शकशता१४००ब्दतः ।
कलाभेदोऽपि नो लब्धस्तत्कथं प्राक्कृतिर्मृषा ॥ ३४ ॥
स्थिरत्वान्मन्दतुङ्गस्य भानोर्मध्यगतिर्जनैः ।
भूच्छायादिसमालोकात्पञ्चषाब्दैः प्रतीयताम् ॥ ३५ ॥
चन्द्रतत्तुङ्गयोर्नित्यं चलनाद्गणनास्तयोः ।
न शक्यन्ते नृभिर्ज्ञातुं विना सिद्धान्तदर्शनात् ॥ ३६ ॥
ज्ञायतां तद्विशेषोऽपि बहुभ्रमणदर्शिभिः ।
मध्योच्चाभ्यां शनेर्भेदं शताब्दैर्ज्ञायते कथम् ॥ ३७ ॥
तस्माद्रवीन्दुभगणा वर्षमासदिनानि च ।
लङ्कार्धरात्रः सर्वादिरिति सिद्धान्तवाग्ध्रुवा ॥ ३८ ॥
चन्द्रोच्चपातभौमादौ विसंवादो यदीक्ष्यते ।
तत्सर्वं सूक्ष्मदृष्ट्योक्तं युगपर्ययवादतः ॥ ३९ ॥
मतिमान् भास्कराचार्यः प्रभेदं युगपर्ययैः ।
ब्रह्माणं वीक्ष्य तत्सङ्ख्यां कल्पे पूर्णामकल्पयत् ॥ ४० ॥
सृष्टिकालस्य च त्यागमकृत्वा कल्पवक्तृतः ।
कालस्य गणनाञ्चक्रे लङ्कामध्यार्कसोदयात् ॥ ४१ ॥

कृताहर्गणसंख्याया अल्पत्वाद्रविचन्द्रयोः ।
कल्पितत्वात् स्वकालान्तं भागाद्याधिक्यपाततः ॥ ४२ ॥
खाभ्रखार्कैर्हृतेत्यादि सिद्धबीजकलोज्झनात् ।
सिद्धान्तमास्थमात्मीयसमये कृतवांस्तयोः ॥ ४३ ॥
इत्थमन्यग्रहाणाञ्च निर्म्माय भगणावलिम् ।
स्वस्वबीजैर्युतोनानां तेषां दृक्सिद्धिमैच्छत ॥ ४४ ॥
सिद्धान्तसिद्धिरर्केन्द्वोर्बीजेनापि यदीप्सिता ।
स्वपर्य्ययास्थिरत्वं हि तत्तेनाविष्कृतं स्वयम् ॥ ४५ ॥
अधुनैतन्मध्यमयोः सिद्धान्तानीतयोर्यतः ।
दृक्सिद्धिर्भाति तस्योक्त्या दृश्यते महदन्तरम् ॥ ४६ ॥
यदि तत्पूर्व्वसमये कश्चित्तत्त्वदृक् सुधीः ।
अकरिष्यत दृक्सिद्धिं कल्पितैः कल्पपर्य्ययैः ॥ ४७ ॥
तदैवेदृग्विसंवादो भास्करोक्तेर्न संभवेत् ।
स्वपूर्व्वकालसंवादाद्यतः स्यादन्तरग्रहः ॥ ४८ ॥
आचार्य्यैः कल्पभगणान् यदाहैष महान् गुणः ।
प्रवृत्तिदिनमासादिसंख्याभेदस्तु दूषणम् ॥ ४९ ॥
तथाप्येष निजे काले लिखित्वा दृक्समान् ग्रहान् ।
महोपकारमकरोन्मादृशामल्पसंविदाम् ॥ ५० ॥
आर्य्यभट्टशतानन्दभास्कराणां स्वकालजैः ।
तत्तन्मतसमानीतैः कामाभट्टादिसम्मतैः ॥ ५१ ॥
ग्रहैः स्वानीतखेटानां कृत्वा संवादमात्मनः ।
कालेनाहं दृष्टिसिद्धान् सृष्टवान् भगणानमून् ॥ ५२ ॥
तिथिभादौ घटीभेदो भागभेदः कुजादिषु ।
भविष्यत्ययुताब्दान्तं नैतेभ्य इति मे मतिः ॥ ५३ ॥

त्रिकालज्ञानहीनत्वान्मादृशां चिरकालतः ।
अंशादिभिः प्रभेदश्चेत्साक्षात्कार्य्यः प्रमातृभिः ॥ ५४ ॥
तदा मयोक्तपूर्व्वेषु भगणेष्वपि पर्य्ययाः ।
देया हेया वक्ष्यमाणा *हानिवृद्ध्यनुसारतः ॥ ५५ ॥
वेदतत्त्वानि२५४ पञ्चेषुसिन्धवो४५५ नवखाद्रयः७०९ ।
रामत्र्यङ्काः९६३समुद्राङ्करुद्राः११६४सप्तेन्दुभास्कराः१२१७ ॥ ५६ ॥
द्विशैलरसमेदिन्य१६७२श्चन्द्राष्टगुणबाहवः२३८१ ।
शराग्निरसनेत्राणि२६३५ खनन्दगगनाग्नयः३०९० ॥ ५७ ॥
एवं दशविधा भेदा धनर्णत्वेन सम्मताः ।
भौमादेः कल्पिताः कल्पभगणानां विशुद्धये ॥ ५८ ॥
अत्र तु प्रथमो भेदो द्विगुणः क्वचिदिष्यते ।
तृतीयो द्वित्रिवेदघ्नस्तुर्य्यः पञ्चगुणावधिः ॥ ५९ ॥
तथैवाष्टमपक्षः स्यात्सप्तमो द्विगुणावधिः ।
अन्यो द्वित्रिगुणो ग्राह्यस्त्रयस्त्रिंशच्छिदा इति ॥ ६० ॥
एषामन्योन्ययोगाश्च ये स्युस्ते भास्करस्य मे ।
संवादात्कालयोर्ग्राह्यास्त्रिंशल्लिप्तान्तरादपि ॥ ६१ ॥
तिथ्यादौ ग्रहणादौ च चन्द्रमन्दोच्चपातयोः ।
सर्व्वोपादेयताहेतोस्तद्विशेषं ब्रुवे पुनः ॥ ६२ ॥
खचतुर्नवसप्तेशवसुनागकृता इति४८८११७९४० ।
उक्तपूर्व्वान्मया चन्द्रमन्दोच्चभगणव्रजात् ॥ ६३ ॥
कालान्तरे सुसाध्यस्य तुङ्गस्येक्षणसिद्धितः ।
आधिक्यं न्यूनता वापि भविता चेत्तदाप्यमी ॥ ६४ ॥
ग्राह्या दृक्सिद्धये भेदा द्विसप्तरसभूमयः१६७२ ।
चन्द्राष्टगुणपक्षा२३८१ वा किं वाग्नीषुखसागराः४०५३ ॥ ६५ ॥

तत्पातभगणानान्तु शङ्का नास्ति विपर्य्यये ।
तथाप्यब्दायुतेऽतीते भेदो भागाधिको यदि ॥ ६६ ॥
भावी तद्द्वाद्रिषट्चन्द्रा१६७२स्तेषु दृष्ट्यनुसारत: ।
क्रान्तिपातस्य भगणेष्वभ्रगोगगनाग्नय:३०९० ॥ ६७ ॥
खाद्रिद्व्यर्था:५२७० खधृत्यङ्गा६१८०-
न्यभ्रषड्गुणदन्तिन:८३६० ।
एते द्विघ्ना१६७२०स्त्रिनिघ्नाश्च२५०८०
दिग्गजाङ्कनिशाकरा.१९८१० ॥ ६८ ॥
खाद्रिचन्द्राष्टपञ्चाश्च२८१७० योज्यास्त्याज्यास्तथापि चेत् ।
दृक्सिद्धिर्न तदा भानोर्व्यत्ययाभावनिश्चयात् ॥ ६९ ॥
गणिता गतसूक्ष्मार्कच्छायार्कान्तरसम्मिता: ।
अयनांशादयो ग्राह्या विशेषोऽत्रेति कीर्त्तित: ॥ ७० ॥
यदा प्रजापति: खेटान् सृष्ट्वाजादौ न्यवीविशत् ।
ततो द्विद्व्य२२ब्दत: कुम्भराश्यादौ निदधे गुरुम् ॥ ७१ ॥
तदादिप्रभवस्तस्मात्प्रवृत्तोऽब्दो गुरौ पुन: ।
मेषादिनिष्ठे शुक्लाद्या इति सांहितिकोक्तित: ॥ ७२ ॥
राशिद्वययुति: प्रोक्ता मया मध्यबृहस्पतौ ।
तत्पर्य्ययविपर्य्यासे सम्भविष्यति पण्डितै: ॥ ७३ ॥
भगणा: पञ्चनि:शेषा: कल्प्यास्तत्प्रभवादावलि: ।
सृष्टेर्विश्वावसु(३९)मुखा कपिलाख्या(५१)दिरेव वा ॥ ७४ ॥
शुक्ला(३)दिर्वा वृषा(१५)दिर्वा विजया(२७)दिरथापि वा ।
लेख्या: स्वकालसिद्धानामब्दानामविरोधत: ॥ ७५ ॥
किन्तु खाब्ध्यष्टसप्तार्थद्व्यब्धिषड्गुणपर्य्यया:३६४२५७८४० ।
शुक्ला(३)द्यब्दगणा: सर्व्वपञ्चत: साधवो मता: ॥ ७६ ॥

एतद्भगणजेष्विन्दु१५लिप्तोनेज्यस्य संप्रति ।
दृक्साम्यात्पदकं लेख्यं ध्रुवगत्यादिसङ्गतम् ॥ ७७ ॥
भाविद्व्यब्धीश११४२वर्षान्ते मतद्वयजगीष्पतेः ।
समत्वं भविता तत्र कार्या दृक्सिद्धिरुत्तमैः ॥ ७८ ॥ *
शास्त्रस्यास्य विसंवादे धर्मगोप्त्राच्युतेन चेत् ।
सम्भाव्यो ग्रन्थकृत्कश्चिद्रहस्यं तत्कृते ह्यदः ॥ ७९ ॥
कलाद्या दशधा भुक्तिर्ग्रहाणां या पुरोदिता ।
क्रमाद्दशगुणैकादिदिनसंख्याहताथ सा ॥ ८० ॥
अन्ततः क्रमषष्ठांशैर्विवरान्तसमन्विता ।
ततो द्वित्र्यादिनन्दान्तगुणिता खरसादिभिः ॥ ८१ ॥
विपरादिग्रहान्तानां स्वहारैर्विहृता क्रमात् ।
फलयुक्शेषसंस्थानैः सिद्धं यन्त्रादिपञ्चकम् ॥ ८२ ॥
तत्कोष्ठकेषु संलेख्यं ससंख्यपदकान्वया ।
कर्म्मेदं भगणैः खेटानयनात्सुकरं मतम् ॥ ८३ ॥
योक्ता परिधिजैर्मान्द्यशैघ्नैः स्पष्टीकृतिः फलैः ।
भूलोक एव सा तुल्या न तु लोकान्तरेष्वपि ॥ ८४ ॥
अन्यखेटेषु लोकेषु दृक्सिद्ध्यै तत्प्रमाणतः ।
रविकर्णानुसारेण सोह्येया फलवासना ॥ ८५ ॥
श्रि—भूमेर्मध्ये खलु भवलयस्यापि मध्यं यतः स्याद्-
यस्मिन् वृत्ते भ्रमति खचरो नास्य मध्यं कुमध्ये ।
भूस्थो द्रष्टा न हि भवलये मध्यतुल्यं प्रपश्येत्
तस्मात्तज्ज्ञैः क्रियत इह तद्दोःफलं मध्यखेटे । इति ॥ ८६ ॥

---

* परिशिष्टे विकल्पितगुरोर्मध्यपदकानि द्रष्टव्यानि ।

स्फुटीकृतिं नभोगानां साक्षात्कर्त्तुं समक्षितौ ।
साष्टादशकलाद्र्यर्था५७।१८ङ्गुलसूत्रेण शीतगोः ॥ ८७ ॥
कक्षावृत्तं लिखेदादौ भगणांशाङ्गुला३६०ङ्कितम् ।
पूर्व्वोत्तरादिक्रमतो राशिचिह्नान्यजादितः ॥ ८८ ॥
कृत्वान्तर्द्व्यङ्गुलव्यासं भूगोलं विलिखेद्बुधः ।
मेषादिस्थं स्वमन्दोच्चं कल्पयित्वाल्पदूरगम् ॥ ८९ ॥
द्विगुणान्त्यफलज्या६००नुसाराद्दशभिरङ्गुलैः ।
दूरे मन्दोच्चकाष्ठायां दद्याद्बिन्दुं कुमध्यतः ॥ ९० ॥
तत्र च क्षितिमध्ये च निश्चलाग्रयुगे गुणे ।
त्रिज्यान्त्यफलशिञ्जिन्योर्वर्गयोगपदक्रमात् ॥ ९१ ॥
द्वैगुण्याद्विकलाढ्यार्थरुद्रा११५।२ङ्गुलमिति पुनः ।
कृत्वा सूचीं समाकृष्य तत्सूत्रस्य सरद्वयम् ॥ ९२ ॥
भ्रमयेत्परितस्तां चेद्या रेखोत्पद्यते ततः ।
प्रतिमण्डलनामासौ मन्दोच्चाकर्षणोद्भवा ॥ ९३ ॥
कक्षावृत्तसमैव स्यादोजपादान्तयोरसौ ।
युग्मान्तगेन्दुकक्षायाः षड्विंशतिकलाधिका ॥ ९४ ॥
विपरीता केन्द्रगतिर्मन्दान्मध्यस्य शोधनात् ।
प्रतिवृत्ते ततोऽजाद्या लेख्याः प्राग्दक्षिणक्रमात् ॥ ९५ ॥
प्राक्पश्चिमान्तरं कक्षाप्रतिमण्डलरेखयोः ।
चक्रे शराङ्गुलं विश्वलिप्ताढ्यं५।१३ केन्द्रजे विधोः ॥ ९६ ॥
चक्रार्द्धे विश्वलिप्तोनपञ्चाङ्गुलमितं४।४७ यतः ।
स्वासन्नस्य ततो युक्ता तुङ्गाकर्षणभूरिता ॥ ९७ ॥
अत्रोच्चस्य पुरःस्थत्वात्कक्षातः प्रतिमण्डलम् ।
पूर्व्वाकृष्टमतः कक्षामिथुनान्तस्थितो विधुः ॥ ९८ ॥

प्रतिमण्डलचापान्ते कक्षाचापान्तगस्त्वयम् ।
प्रतिवृत्तविरामान्ते तिष्ठत्येवं ग्रहान्तरात् ॥ ९९ ॥
पूर्व्वाकर्षवशात्कक्षासौम्यस्थेऽजादिभार्द्धके ।
प्रत्यङ्मुखे मध्यखगादूनः स्याद्धिस्फुटग्रहः ॥ १०० ॥
कक्षायाम्यस्थतौल्यादिभदले प्राङ्मुखे पुनः ।
मध्यमादधिकः स्पष्टश्चक्रचक्रार्द्धयोः समः ॥ १०१ ॥
भूमध्याद्रचयेद्रेखां मण्डलद्वयभेदिनीम् ।
स्पष्टमध्यग्रहामेकां स्पष्टस्पष्टखगां पराम् ॥ १०२ ॥
तयोः संजायते यावत् प्रतिवृत्ते कलान्तरम् ।
तज्ज्याबाहुफलं तिर्य्यग्द्वितीया या तु रेखिका ॥ १०३ ॥
वृत्तयोरन्तरगता तदूर्द्ध्वं कोटिजं फलम् ।
दोःकोटिफलवर्गैक्यमूलं या कर्णरेखिका ॥ १०४ ॥
उच्चोन्मुखी भवेत् सैवाकर्षणप्रमितिर्मता ।
चन्द्रग्रहोक्तकर्णादेः संवादोऽत्रापि चिन्त्यताम् ॥ १०५ ॥
उच्चस्यचक्रान्तगस्याशुर्बिम्बस्यचक्रार्द्धगस्य तु ।
पृथुर्बाहुफलाभावस्तत्र कोटिफलं महत् ॥ १०६ ॥
केन्द्रस्यौजपदान्तस्थग्रहस्य मृदुदोःफलम् ।
महत्कोटिफलाभावस्तत्र विम्बसमो भवेत् ॥ १०७ ॥
चक्रे दूरस्थितेर्भूमेश्चक्रार्द्धे निकटस्थितेः ।
प्राग्गतेर्न्यूनताधिक्यं भवेत् खेटस्य विम्बवत् ॥ १०८ ॥
तच्चक्रादौ मन्दकेन्द्रे गतेः फलमृणाभिधम् ।
कर्क्यादौ तद्धनं प्रोक्तं साम्येऽपि गतिवर्त्मनः ॥ १०९ ॥

श्रि—यथा भवेत्तैलिकयन्त्रमध्ये
काष्ठभ्रमो गोभ्रमतो विलोमः ।

नीचोच्चवृत्ते भ्रमणं तथान्यत्-
स्याद्गच्छतोऽपि प्रतिमण्डलेन । इति ॥ ११० ॥

रवीन्दूच्चौ भकक्षायां स्थितौ चेद्भास्करोदितः ।
ऋज्वाकृष्टीजपर्यादान्ते कर्णः स्यात्त्रिगुणा३४३८धिकः ॥१११॥
केन्द्रौजाङ्घ्र्यन्तगतयोस्त्रिज्यासाम्यं मृदुश्रुतेः ।
चेद्बिम्बार्थमुरीकार्य्यं तदाकर्षणरेखयोः ॥ ११२ ॥
किञ्चित् वक्रतया मध्यरवीन्द्वोः क्षितिमध्यतः ।
अन्तरं यावदेतावद्भवतु स्फुटयोरपि ॥ ११३ ॥
तत्रार्केन्द्वोर्मध्यकर्णौ७६०८२९४।४८७०५
त्रिघ्नै५३स्त्रिभुजैः२३ क्रमात् ।
गुणितौ स्वोच्चकर्णौ स्तः
कक्षाप्येवं प्रकल्प्यताम् ॥ ११४ ॥
विधोस्तुङ्गान्तराख्यस्य पाक्षिकस्य फलस्य च ।
सपातैतद्विगंशस्योपलब्धिर्वासना मता ॥ ११५ ॥
द्वितीययन्त्रवत् सूर्य्यकक्षां सग्रहकक्षिकाम् ।
विलिख्य भूमिं मध्यस्थां ततः पश्येच्चलक्रियाम् ॥ ११६ ॥
तत्रानुलोमगं केन्द्रं शीघ्रतुङ्गस्य यद्गतिः ।
बह्वी मध्यगतेर्भुक्तिः स्फुटा स्याद्दोःफलक्रमात् ॥ ११७ ॥
चक्रार्द्धे तत्समीपे च प्राग्गतेः सूर्य्यतो यतः ।
बहुगत्योर्ज्ञसितयोः सूर्य्यभूमध्यसंस्थितिः ॥ ११८ ॥
ततो वक्रा गतिर्दृश्या भौमेज्यार्किभुवां पुनः ।
भास्वतो भिन्नदिक्स्थानान्मन्दगानां तथैव सा ॥ ११९ ॥
विस्तरेणोच्यते वक्रा वक्रा भुक्तिः सवासना ।
कर्णयोजनसंख्याया अङ्गुलत्वजुषः क्षितौ ॥ १२० ॥

त्रयोदशायुतांशेन गजार्था५८ङ्गुलकेन हि ।
सूत्रेण रचयेद्वृत्तं रविकक्षेति सम्मतम् ॥ १२१ ॥
मध्ये न्यस्य महीबिन्दुं मध्यार्कं तस्य पश्चिमे ।
समांशोत्थ८७ङ्गुलेनैव कक्षां तत्परितोऽब्जजः ॥ १२२ ॥
प्राग्भागे निजकक्षायां न्यसेद्बिम्बं महीभुवः ।
सूर्य्यभूमङ्गलस्यूतसूत्राग्रे बहुदूरतः ॥ १२३ ॥
प्रकल्प्य तारकां काञ्चित् प्राच्यां कौ तत्समं कुजम् ।
दृष्ट्वा चक्रार्द्धगं याम्यभागमूर्द्धं विचार्य्य च ॥ १२४ ॥
मध्यार्कं दक्षिणं नीत्वाहर्गत्याङ्गुलमानया ।
तथा भौमं स्वकक्षस्थ स्वार्थां५शोनाङ्गुलात्मना४८ ॥ १२५ ॥
स्वगत्योत्तरगं कुर्य्यात्तारासूत्रात्सयाम्यगः ।
षष्ट्यंशकैर्द्वादशभि१२र्दृश्यतेऽन्तरितः स्फुटः ॥ १२६ ॥
भूमिसूर्य्यान्तरार्द्धं यद्भूमिभौमान्तरञ्च वः ।
ततः सिद्ध२४कला दृश्या साक्षाद्वक्रा गतिर्भुवि ॥ १२७ ॥
चक्रे कुजार्कयोरेकदिग्गतेर्नगदि१०७कला ।
भौमयाम्यगतिः सूर्य्यकर्ण५८घ्नी निजकर्ण१४५हृत् ॥ १२८ ॥
रामाब्धि४३कलिका साक्षाद्दृश्यो भवति तद्गतिः ।
इत्थमन्यग्रहाणाञ्च द्रष्टव्या विविधा बुधैः ॥ १२९ ॥
प्राकसिद्धान्तमते सैव रविकक्षा कुजस्य तु ।
नवांशा१०९ङ्गुलसूत्रोत्था कार्य्या भूवेष्टनक्रमात् ॥ १३० ॥
एकसूत्रेऽर्कभूभौमाः स्थाप्या भश्च पुनः पुनः ।
स्वशीघ्रतपनाकृष्टः पश्चाद्रुद्रा७२ङ्गुलान्तरे ॥ १३१ ॥
स्थितश्चक्रार्द्धगो दृश्यस्ततो दिनगतिः समा ।
याम्ये सौम्येऽर्ककुजयोर्दत्त्वा प्राग्वत् स्वकक्षयोः ॥ १३२ ॥

ततस्तावद्दिनाकृष्टेरङ्गुलागां७श उत्तरे ।
सूत्रान्नतस्य दृश्यास्य प्राग्गतिर्विंश१२लिप्तिका ॥ १३३ ॥
भूमध्यार्कसमे सूत्रे भकक्षायां यदीष्यते ।
शीघ्रोच्चस्तद्गतिर्द्वेधा चक्रचक्रार्द्धयोर्भवेत् ॥ १३४ ॥
तदाकर्षात् कुजादीनां यद्यत्स्यात्प्रतिमण्डलम् ।
तत्तन्मध्येऽर्कमध्यस्य स्थितेः सिद्ध्यति तद्भ्रमः ॥ १३५ ॥
यदि भूमध्यका कक्षा मन्यते तन्मृदूच्चजात् ।
आकर्षणान्न भिद्येत शरस्तेषां विधोरिव ॥ १३६ ॥
केवलं शीघ्रजाकर्षाद्भेदो यः प्रतिपद्यते ।
सत्रिज्याप्तान्त्यकर्णाप्तमध्येषोरिव सिद्ध्यति ॥ १३७ ॥
तत्रार्कोत्थगुणद्वन्द्वे शरान्तौ लगतो यतः ।
मन्दाकृष्टस्य नीचोच्चगतावपि नभःसदः ॥ १३८ ॥
मदुक्तया शरस्तुल्या संस्कृतेषोः स्फुटत्वतः ।
मध्यार्काभिभ्रमः सिद्धः शुक्रेज्यार्किबुधासृजाम् ॥ १३९ ॥
मध्यार्ककेन्द्रका कक्षा यत्ताराख्यनभःसदाम् ।
तन्मन्दाकृष्टिरेखैषां भूमौ भिन्नेष्यतेऽर्कतः ॥ १४० ॥
ततो मन्दस्फुटं खेटं ज्ञातुं कर्म्मद्वयं कृतम् ।
शैघ्रमान्द्यार्द्धनामादौ ततः स्पष्टां मृदुक्रियाम् ॥ १४१ ॥
मन्दस्पष्टस्य भूगोलदूरता दूरतावशात् ।
भचक्रावस्थितीच्छायै तुर्य्यं द्राक्कर्म्मनिर्म्मितम् ॥ १४२ ॥
इत्थं शैघ्रार्द्धमान्द्यार्द्धमान्द्यशैघ्रैः फलैरपि ।
तारार्काणां कियद्भेदलाभात्तत्शुद्धये मया ॥ १४३ ॥
परोच्चसंस्कृतिः प्रोक्ता विधोस्तुङ्गान्तरादि यत् ।
तत्तत् फलं मुनिप्रोक्तबीजमित्यवधार्य्यताम् ॥ १४४ ॥

आर्षसिद्धान्ततो ये ये विशेषा दृष्टिसिद्धये ।
स्फुटीकृतौ प्रकल्प्यास्ते ते वीजत्वेन सम्मताः ॥ १४५ ॥

तथाहि वार्त्तिके—ज्ञातग्रहोपदेशाद्बीजं ज्ञात्वा सुदैवज्ञैः ।
सत्संस्कृतग्रहेभ्यः कर्त्तव्यौ निर्णयादेशौ । इति ॥१४६॥

शिरोमणौ—मध्यौ हि मन्दप्रतिमण्डले स्वे
मन्दस्फुटौ द्राक् प्रतिमण्डले च ।
भ्रमन्त्यतश्चञ्चलकर्मणीह
मन्दस्फुटो मध्यखगः प्रकल्प्यः ॥ १४७ ॥
भ्रमन् ग्रहः स्वे प्रतिमण्डले नृभिः
स यत्र कक्षावलये विलोक्यते ।
स्फुटो हि तत्रास्य फलोपपत्तये
प्रकल्पितं तुङ्गमिहाद्यसूरिभिः ॥ १४८ ॥
यः स्यात्प्रदेशः प्रतिमण्डलस्य
दूरे भुवस्तस्य कृतोच्चसंज्ञा ।
सोऽपि प्रदेशश्चलतीति तस्मात्
प्रकल्पिता तुङ्गगतिर्मतिज्ञैः ॥ १४९ ॥
उच्चाद्भषट्कान्तरितश्च नीचं
मध्यः स्वनीचोच्चसमो यदा स्यात् ।
कक्षास्थमध्योपरि कर्णसूत्र-
पातात् स्फुटो मध्यसमस्तदानीम् ॥ १५० ॥
उच्चस्थितो व्योमचरः सुदूरे
नीचस्थितः स्यान्निकटे धरित्र्याः ।
अतोऽणुबिम्बः पृथुलश्च भाति
भानोस्तथा सन्नसुदूरवर्त्ती । इति ॥ १५१ ॥

छायालोकाद्यन्त्रवेधादयनात्तद्द्वयं रवेः ।
सप्ताब्ध्यं४७शान्तरं दृष्टं तत्सिद्धां२४शाल्पकोपमः ॥ १५२ ॥
चन्द्रग्रहस्य गणितं सवासनमुदाहृतम् ।
लम्बनस्योपपत्तिश्च तस्याल्पबहुतोच्यते ॥ १५३ ॥
चक्रार्द्धान्तरितौ तुल्यभागलिप्ताविलिप्तिकौ ।
स्यातां यदर्कशशिनौ शराल्पत्वे तदा विधौ ॥ १५४ ॥
भूच्छाया लगतीत्यत्र समकक्षास्थितिस्तयोः ।
लम्बनावनती न स्तो रजनीरमणग्रहे ॥ १५५ ॥
सूर्य्यग्रहे तु सूर्य्येन्द्वोर्भिन्नकक्षानिवासतः ।
देशभेदाद्ग्रासभेदो लम्बनावनती तथा ॥ १५६ ॥
दृङ्मण्डलदलं दृश्यं खार्द्धोनं गोलपृष्ठगैः ।
ग्रहस्य यत्ततो दृष्टिमण्डले सम्भवेन्नतिः ॥ १५७ ॥
क्षितिजोपगते सूर्य्ये दर्शान्ते भूमिगर्भतः ।
रविबिम्बार्द्धगे सूत्रे विम्बमध्यं लगेद्विधोः ॥ १५८ ॥
भूपृष्ठाद्भानुविम्बार्द्धचुम्बिसूत्राद्विधुर्यतः ।
अधो विलम्बते तस्मात् क्षितिजेऽस्मिन् परा नतिः ॥ १५९ ॥
गर्भदिक्सूत्रयोरैक्यात् खमध्ये न भवेदसौ ।
खार्द्धक्षितिजयोरन्तः सा स्यात् सूत्रान्तरोन्मिता ॥ १६० ॥
खार्द्धे यदापवृत्तं स्यात्तदा तद्दृष्टिविम्बयोः ।
ऐक्यान्नावनतिः किन्तु लम्बनं परमं कुजे ॥ १६१ ॥
यदा दृक्क्षेपवृत्तस्थः खेचरोऽवनतिस्तदा ।
परमालम्बनाभावस्ततो दृक्क्रान्तिवृत्तयोः ॥ १६२ ॥
नत्यन्तजान्तरकलाधिक्याल्लम्बनसंक्षयः ।
क्रान्तिदृग्वृत्तसंयोगात् खार्द्धगस्य न तद्युगम् ॥ १६३ ॥

त्रिभोनलग्नजाद्यस्मात् क्रान्तिवृत्ताग्रतः शरः ।
प्राप्नोति नभसो मध्यं मध्याह्ने तु शराग्रतः ॥ १६४ ॥
याम्योदग्लम्बितश्चन्द्रो दर्शान्तेऽर्कसमो न यत् ।
लम्बनेऽवनतौ तस्माद्दृग्ग्राख्ये लग्नस्त्रिभोनितः ॥ १६५ ॥
तस्य खार्द्धे नतज्या या सा प्राक्पश्चिमसंस्थितेः ।
वक्रत्वात् संभवेत्तन्वी तत्सिद्धावुदयज्यका ॥ १६६ ॥
उन्नता यद्वित्रिभतनुक्रान्तिर्ह्रस्वं यथा यथा ।
वक्रं तथा तथा लग्नक्रान्तिज्या महती भवेत् ॥ १६७ ॥
यदा वित्रिभलग्नस्य क्रान्तिः सौम्याक्षतुल्यताम् ।
प्रयाति विषुवत्क्रान्तिरुदेति च यदा तदा ॥ १६८ ॥
समता संभवेन्मध्यलग्नवित्रिभलग्नयोः ।
नान्यदा नतयोः स्यातां येन तज्ज्ञैस्तदन्तरा ॥ १६९ ॥
शरवद्भाति दृक्क्षेपो दृग्ज्या सा वित्रिभाङ्गजा ।
विक्षेपाग्रस्थितस्येन्दोर्भवेदवनतिः स्फुटा ॥ १७० ॥
तत्शरेणाक्षसंस्कारे कृते तस्मात् शराग्रतः ।
क्रान्तिसंस्कारसंसिद्धो दृक्क्षेपः स्यात् परिस्फुटः ॥ १७१ ॥
पर्वान्तो यः समुदितः स्फुटो लम्बनसंस्कृतः ।
अर्केन्द्वोः क्रान्तिवृत्तोदग्याम्यस्थित्यै स केवलम् ॥ १७२ ॥
त्रिभोनलग्नजक्रान्तिगतिर्वक्री यथा यथा ।
शरानुसरतो ग्रासकालभेदस्तथा तथा ॥ १७३ ॥
उक्ता ग्राहकमार्गस्य छेदके यादृशी स्थितिः ।
तत्क्रमाच्चाश्रिते तस्मिन् ग्रासकालो भवेत् स्फुटः ॥ १७४ ॥
विषुवोदयकाले चेत् पर्वलम्बनसंस्कृतम् ।
तदा मध्यग्रहस्तुल्योऽन्यथा न्यूनोऽधिको भवेत् ॥ १७५ ॥

एवं तदुदये स्पर्शमोक्षकालस्य तुल्यता ।
उदयज्योद्भवः कालभेदः स्याद्दिक्शरक्रमात् ॥ १७६ ॥
गर्भात् पृष्ठाद्भुवः सूत्रे क्षितिजस्थं विधुं प्रति ।
प्रसारिते समे स्यातां ततश्चन्द्रे समुन्नते ॥ १७७ ॥
क्रमात् पृष्ठोन्नतं सूत्रमल्पं स्याद्गर्भसूत्रतः ।
सन्निकर्षाद्विधोस्तस्मान्मानाधिक्यं नरोद्भवम् ॥ १७८ ॥
भिन्नकक्षास्थितिवशाद्रवीन्द्वोः शङ्कुसम्भवा ।
तमसोऽधिकता ग्रासकालयोर्वृद्धिदा भवेत् ॥ १७९ ॥
ग्राह्यग्राहकयोरेककक्षावासाद्विधुग्रहे ।
न कालग्रासभेदः स्यान्मानाधिक्येऽपि शङ्कुजे ॥ १८० ॥
विमण्डलगतिर्वक्रा पूर्णिमान्तेऽपमण्डलात् ।
यावत् स्यात्तन्मितिश्चन्द्रगत्यर्कांशमिता यतः ॥ १८१ ॥
स्पर्शाद्याः शशिनस्तस्मात् शरार्कांशोत्थकालतः ।
प्राक्पश्चाद्भावमायान्ति मध्यग्रासस्य भूरिताम् ॥ १८२ ॥
ग्राहकान्यदिशि स्पष्टो ग्राह्यस्यैव यतः शरः ।
ततश्चन्द्रग्रहे ग्रासबाणयोर्दिग्भिदा मता ॥ १८३ ॥
ग्राहकस्यैव चन्द्रस्य स्फुटेषुर्यत् स्वदिग्गतः ।
तद्ग्रासबाणयोः सिद्धं दिक्साम्यं सूर्य्यपर्व्वणि ॥ १८४ ॥
चन्द्रस्यैव यतः सिद्धं वलनं ग्रहणद्वये ।
तस्माद्ग्राह्यस्य चन्द्रस्य स्पर्शे तत् स्यात् स्वदिग्गतम् ॥ १८५ ॥
व्यस्तदिङ्मोक्षकाले स्याद्ग्राहकस्य रविग्रहे ।
मोक्षकाले निजाशास्थं स्पर्शे तद्विपरीतगम् ॥ १८६ ॥
उदयेऽस्तमये मध्ये व्यक्ते प्रायिकदिङ्मुखम् ।
विम्बं स्यादन्यदेशेऽस्मादक्षजं वलनं भवेत् ॥ १८७ ॥

ध्रुवाभिमुखविभ्रान्तेस्तदुन्नत्यनुसारतः।
प्राक्चिह्नं विम्बगं खार्द्धे यत्तत् पूर्व्वकपालके ॥ १८८ ॥
भवेदुदङ्मुखं प्रत्यक्कपाले दक्षिणामुखम्।
तद्भेदादायनं दृश्यं वलनञ्च पृथग्विधम् ॥ १८९ ॥
शि—त्रिज्यावर्गादयनवलनज्याकृतिं प्रोज्झ्य मूलं
यष्टिर्यष्ट्या द्युचरविशिखस्ताडितस्त्रिज्ययाप्तः।
यद्वा राशित्रययुतखगद्युज्यकाप्तस्त्रिमौर्व्या
भक्तः स्पष्टो भवति नियतं क्रान्तिसंस्कारयोग्यः। इति ॥१९०॥
इति यद्भास्करः प्राह सूक्ष्मबाणस्य तानवम्।
युक्तियुक्तं न तद्यस्माद्विहितायनदृक्क्रियः ॥ १९१ ॥
ध्रुवसूत्रसमः खेटो भवेद्ग्रहयोगयोः।
तद्दृक्कर्म्मभवा लिप्ता धनर्णाख्या भुजा मताः ॥ १९२ ॥
कदम्बाभिमुखो बाणः कोटी तद्वर्गयुक्पदम्।
ध्रुवोन्मुखस्फुटेषुः स्यात् कर्णत्वान्मध्यतो महान् ॥ १९३ ॥
मासषट्कमिता रात्रिर्मेरौ या तत्र खेचराः।
चन्द्राद्या उदयं चास्तं यान्त्युदक्क्रान्तिभागकैः ॥ १९४ ॥
सूर्य्याग्रपश्चात्ते राशिद्वयान्तर्वर्त्तिनो यदि।
तदोदयास्तमययोर्विचारः कर्त्तुमिष्यते ॥ १९५ ॥
कालांशा ये निगदिता ग्रहाणामुदयास्तजाः।
तत्समं दृश्यतामत्र सौम्यक्रान्त्यन्तरं रवेः ॥ १९६ ॥
उदग्देशान्तरर्द्धिः स्याद्यथा व्यक्षात्तथापमः।
याम्ये नतः प्रायशोऽस्मात् सौम्यशृङ्गोन्नतिर्विधोः ॥ १९७ ॥
रवीन्दुमार्गयोर्भूरिविप्रकर्षेऽपि तद्दृशोः।
सङ्गतिः स्यान्महापाते क्रान्तिसाम्यात् पुरोदितात् ॥ १९८ ॥

यदेकमृजु मेदिन्या गोलगर्भाद्विनिःसृतम् ।
सूत्रं चन्द्रादिशन्यन्तग्रहाणामपवृत्तभित् ॥ १९९ ॥
उपकारो मया दृष्टो भगणाज्जगतो महान् ।
यत् सूर्य्यात् सर्व्वं ऋतवो विवृद्धिः स्थिरजग्मुषाम् ॥ २०० ॥
भवत्यपरिमेयाश्च तमोहत्यादयो गुणाः ।
तथैव रजनीभर्त्तुराह्लादाद्या अनेकशः ॥ २०१ ॥
चन्द्रार्कालोकनाल्लोके दृश्यतादृश्यतेक्षितुः ।
जनैरुन्नीयते कार्य्यात् कारणावगतिर्यतः ॥ २०२ ॥
विविधग्रहभुक्तीनां साक्षात्कारात् शरीरिणाम् ।
शुभाशुभानि कर्म्माणि ज्ञायन्ते प्राकृतान्यपि ॥ २०३ ॥
तथा तद्विम्बमानानां कक्षाणां योजनानि च ।
तत्तद्विक्षेपतो भूमेः स्थिरत्वं चानुमानतः ॥ २०४ ॥
भचक्रालोकतो लोकस्त्वष्टुर्लोकोत्तराकृतिः ।
प्रतीयतेऽन्धतमसं ततोऽवतमसीभवेत् ॥ २०५ ॥
पथिकानां मतिमतां प्रशमं याति दिग्भ्रमः ।
इत्यादयो बहुविधा उपकारा भवन्त्यतः ॥ २०६ ॥
तपो वर्षास्ततः शीतं कालस्येति गुणास्त्रयः ।
तत्तद्द्वैविध्यतो लोके षड् भवन्त्यृतवः खलु ॥ २०७ ॥
प्रायशो भारते वर्षे तेषां संपूर्णभुक्तयः ।
भवन्ति भूमिभेदेभ्य उत्कटाः केऽप्यनुत्कटाः ॥ २०८ ॥
तपस्य प्राग्दलं सौख्याद्वसन्तो ह्यपरं दलम् ।
ग्रीष्मः स्यादथ वर्षाणां ते प्रावृट्शरदौ मते ॥ २०९ ॥
हेमन्तः शिशिरः शीतप्राक्पश्चिमदले इति ।
सूर्य्यक्रान्तिवशात्ते स्युर्देशभेदात् पृथग्विधाः ॥ २१० ॥

तिरश्चीनाः करा यत्र पतन्त्यर्कस्य भूतले ।
नाप्नोति तत्तथा तापं तत्र शीतं बलोत्तरम् ॥ २११ ॥
पतन्त्यृजुतया यत्र तत्र तापातिरेकतः ।
तत्रत्यानां तपर्त्तुः स्याद्रविसम्मुखवृत्तिजात् ॥ २१२ ॥
तीक्ष्णैः सूर्य्यांशुभिः सिन्धोर्लघुतोयं समुत्थितम् ।
पतत्याकर्षणाद्भूमौ तत्तपान्ते घनागमः ॥ २१३ ॥
निरक्षदेशतोऽंशानामक्षाणां यावदष्टकम् ।
हेमन्तशिशिरौ न स्तो ग्रीष्मवर्षातिरेकतः ॥ २१४ ॥
प्रावृडन्ते शरत्कालस्तपादौ स्याद्वसन्तकः ।
एतयोरन्तरे किञ्चित् शीतं देशे जलाधिके ॥ २१५ ॥
पौषमाघद्वयं शीतं द्वितीयेऽक्षलवाष्टके ।
दशस्वन्येषु मासेषु वसन्तादिचतुष्टयम् ॥ २१६ ॥
तृतीयेऽंशाष्टके शीतं स्यान्मार्गादिचतुष्टयम् ।
चैत्राद्येषु वसन्ताद्याश्चत्वारोऽत्रैव षट् समाः ॥ २१७ ॥
चतुर्विंशतिरंशानामियं स्यादुष्णमण्डलम् ।
अतः षोडशकं प्रोक्तं सममण्डलनामकम् ॥ २१८ ॥
चतुर्थेऽंशाष्टके व्यक्ताङ्गार्धमूर्जादि शीतलम् ।
माधवाद्युष्णमत्रैव वसन्तादिचतुष्टयम् ॥ २१९ ॥
इषाद्यं शीतलं प्रोक्तं पञ्चमेऽंशाष्टकेऽष्टकम् ।
वसन्तादिचतुष्कं स्यात्तत्र ज्यैष्ठचतुष्टये ॥ २२० ॥
इतः केन्द्रान्तमष्टांशाः पञ्चाशच्छीतमण्डलम् ।
निरक्षादष्टके षष्ठे भागानां भाद्रतो दश ॥ २२१ ॥
मासाः शीताः शुचिद्वन्द्वे वसन्ताद्यृतवोऽल्पकाः ।
इत्युक्तं षड्ऋतुस्थानमष्टाम्भोधि४८लवावधि ॥ २२२ ॥

आसुमेरु ततो द्व्यब्धि४२भागस्थं केवलं हिमम् ।
एवं दैवेऽसुरांशे तु तुलाद्याः स्युरजादिवत् ॥ २२३ ॥
अत्र राधादयो मासाः संस्कृतस्यायनांशकैः ।
भानोर्मेषप्रवेशादेः स्वीकार्या ऋतुभुक्तये ॥ २२४ ॥
वसन्तकालेऽवनिभृद्वनीनां वातैश्छदेर्वीत इलातलेऽलम् ।
वंशद्रुमान्योऽन्यविघट्टनोत्थवह्निर्विसर्पन् वनमप्यवानम् ॥ २२५ ॥
दन्दह्यतेऽस्मादहलोऽतिधूमो व्योमोदरं व्याप्य विशेषकूरम् ।
उद्गत्य भौमान्मरुतो लघुत्वात्तिष्ठत्यवाप्य स्वसमं तमभ्रं ॥ २२६ ॥
चण्डांशुसन्तप्तधरोष्मणाब्धेरुत्थाय वाष्पाणि घनानि घर्मैः ।
पृक्तानि मेघाः प्रभवन्ति चेत्थं ज्योतिर्मरुद्धूमकसन्निपातात् ॥२२७॥
वस्त्रैरिवार्भैर्द्युमणिः करास्तैर्वितण्डशुण्डासदृशैः पयोधेः ।
उद्धृत्य वारीणि घनेषु तेषु संव्यापयेत्ते त्वसिता घनत्वात् ॥ २२८ ॥
भारातिरेकाद्गुरवोऽम्बुधारा वर्षन्ति ते भूरि भुवाभिकृष्टाः ।
क्रोशाङ्कितः क्रोशदलावधिस्था भूपृष्ठतो न त्वतिदूरसंस्थाः ॥२२९॥
दैवेन दिक्कालसखेन धातृवाञ्छानियम्येन जनोत्करस्य ।
स्याद्वृष्टिरत्र ध्वनिविद्युदाद्यं ज्ञेयं श्रुतिभ्यो मिहिरादिजैश्च ॥२३०॥

सूर्योष्मणातिलघवः परमाणवोऽपा-
मूर्ध्वं व्रजन्ति गुरवो लवणस्य ते न ।
तेनाभिवृष्टसलिलं मधुरं महाब्धेः
सिद्धं पुनः कुतुकतो गणितं ब्रुवेऽल्पम् ॥ २३१ ॥

घनः समाङ्कत्रितयस्य घातस्तदीयमूलानयनाय सूत्रम् ।
यथाङ्कपङ्क्तेश्चरमे निधाय बिन्दुं ततो वामगते चतुर्थे ॥ २३२ ॥
तत्तच्चतुर्थे क्रमतश्च दत्त्वा सबिन्दुशिष्टाङ्कित एव यस्य ।
यातुं घनो युज्यत एतमङ्कं लब्धं न्यसेत्तद्घनवर्जितायाः ॥२३३॥

पङ्क्तेः स्थिरात्त्रिविधाङ्कहानि-
जातद्वितीयादिकलब्धसिद्धैः ।
तस्यास्तले न्यस्य पृथक्स्थिताया
लब्धाङ्कवर्गं त्रिशतघ्नमेवम् ॥ २३४ ॥
वामाद्द्वितीयादिमविन्दुकाङ्क-
स्याधोऽग्रशून्यस्य यथा स्थितिः स्यात् ।
तेनैव तस्या हरणे प्रवृत्ते
नवाधिकं चेत्पततीह लब्धम् ॥ २३५ ॥
नवैव कृत्वा तदनेन हारं
हृत्वा पृथक् पङ्क्तितले निधाय ।
कृतिं द्वितीयादिफलस्य पूर्व्व-
लब्धैर्हतां खाग्नि३०गुणां ततोऽधः ॥ २३६ ॥
घनं द्वितीयादिफलस्य चैवं
त्रिधाङ्कयोगं विजहातु पङ्क्तेः ।
साल्पा यदि त्र्यङ्कयुतैर्द्वितीया-
द्येकैकहीनं क्रमशोऽत्र लब्धम् ॥ २३७ ॥
कृत्वा विदध्यात्त्रिविधाङ्कयोगं
स्थिरं विशुद्धान्तमथाङ्कपङ्क्तेः ।
तेनोज्झितायाः पुनरन्यलब्धा-
न्येवं फलाङ्का घनमूलसंज्ञाः ॥ २३८ ॥
पतन्ति पङ्क्त्यूर्द्ध्वगविन्दुतुल्या-
स्तेषां घनः पूर्व्ववदङ्कपङ्क्तिः ।
सा चेत्सहस्राल्पतया स्थिता स्यात्
सकृद्भवेत्तद्घनमूलमेकम् ॥ २३९ ॥

भास्करपाद्यां घनीकरणसूत्रं वृत्तत्रयम्।

समत्रिघातश्च घनः प्रदिष्टः
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्र्यन्त्या हतश्चादिघनश्च सर्वे ॥ २४० ॥
स्थानान्तरत्वेन युता घनः स्या-
त्प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यम्।
एवं मुहुर्वर्गघनप्रसिद्धा-
वाद्यङ्कतो वा विधिरेष कार्य्यः ॥ २४१ ॥
खण्डाभ्यां वा हतो राशिस्त्रिघ्न' खण्डघनैक्ययुक्।
वर्गमूलघनः स्वघ्नो वर्गराशिघनो भवेत् ॥ २४२ ॥

घनमूलीकरणसूत्रं वृत्तद्वयम्।

आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्याद्घनतो विशोध्य।
घनं पृथक्स्थं पदमस्य कृत्या
त्रिघ्न्या तदाद्यं विभजेत् फलन्तु ॥ २४३ ॥
पङ्क्त्या न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्याद्घनमूलमेवं
पङ्क्तिर्भवेदेवमतः पुनश्च। इति ॥ २४४ ॥
मूलावशेषात्कथयामि सिद्धिं षष्ट्यंशकानां पदशेषभाजाम्।
पदं घनीकृत्य पदोत्तराङ्कघनाद्विजह्याद्य इहावशेषः ॥ २४५ ॥
स चान्त्यहारो यदि मूलसंख्या विंशद्बहुस्तत्र पदावशेषः।
षष्ट्याहतोऽन्त्येन हरेण भक्तः फलं कलास्तत्पदमल्पकं चेत् ॥२४६॥

व्योमानलेभ्य३०स्तदिहान्त्यहारा-
न्मूलावशेषं विरहय्य शेषः ।
गुण्योऽन्त्यहारात्तु सरूपमूल-
भक्तात् फलं स्याद्गुणकाभिधानम् ॥ २४७ ॥

तल्लुप्तगुण्योऽन्त्यहरेण भक्तः फलोज्झितोऽन्त्यस्फुटहार उक्तः ।
मूलावशेषोवियदङ्ग६०निघ्नोलिप्तामयः स्यात् स्फुटहारभक्तः॥२४८॥

पुरोदितं वर्गपदं मयात्र बहुप्रयोगाद्घनमूलमुक्तम् ।
दिग्दर्शिता साधनवासना या गोलज्ञगम्यामुदिताखिला यत् ॥२४९॥

शिरोमणौ—ईषदीषदिह मध्यगमादौ
ग्रन्थगौरवभयेन मयोक्ता ।
वासना मतिमता सकलोह्या
गोलबोध इदमेव फलं हि । इति ॥ २५० ॥

प्राणेन्द्रियरोधशोधिततमःक्रोधस्मरादिद्विषः
पञ्चक्लेशमुचो न यत् क्षणमपि द्रष्टुं क्षमा योगिनः ।
तद्रूपः स्वं परमं पदं स्वचरणप्रेमाध्वपान्थैर्जनैः
सुप्रापं विदधाति नः स भगवानव्याद्भवव्यापदः ॥ २५१ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत
श्रीचन्द्रशेखरकृतौ गणितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
सद्वासनोऽतिनख२१संख्य इतः प्रकाशः ॥ २५२ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे गोलाधिकारे
वासनाशेषरहस्यवर्णनो नामैकविंशतितमः प्रकाशः ।

इति गोलाधिकारः ।

कालाधिकारः ।

द्वाविंशः प्रकाशः ।

संवत्सरादिवर्णनम् ।

कालात्मानमकालदण्डनिलयं कालाम्बुजन्मद्युतिं
कालीकेलिकलाकराञ्चितपदं कालाचलालङ्कृतिम् ।
क्रुध्यत्कालियकालिकुञ्चनकृतं काकोदरीकाकुभिः
कृष्णं कृष्णकृपं करोम्यभिवदन् कालाधिकारक्रमम् ॥ १ ॥

कालस्तु द्विविधो नित्यो जन्यश्चेति प्रकीर्त्तितः ।
नित्यः श्रीपरमेशोऽत्र कालकालापराह्वयः ॥ २ ॥
विश्वेषां कलनात्कालो जन्यः स तु तथेश्वरः ।
तत्स्मृतिः सर्व्वकार्य्येषु कर्त्तव्या मङ्गलार्थिभिः ॥ ३ ॥
कौर्म्मे—अनादिरेष भगवान् कालोऽनन्तोऽजरः परः ।
सर्व्वगत्वात् स्वतन्त्रत्वात् सर्व्वात्मत्वान्महेश्वरः ॥ ४ ॥
परं ब्रह्म च भूतानि वासुदेवोऽपि शङ्करः ।
कालेनैव च सृज्यन्ते स एव ग्रसते पुनः । इति ॥ ५ ॥
स्मृतिश्च — सर्व्वेषु कालेषु समस्तदेशेष्वशेषकार्य्येषु तथेश्वरेश्वरः ।
सर्व्वैः स्वरूपैर्भगवाननादिर्ममास्तु माङ्गल्यविवृद्धये हरिः ॥ ६ ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् । इति ॥ ७ ॥
निर्गुणत्वात्परेशस्य तत्स्मृतिर्घटते कथम् ।
इति चेदुच्यते तस्य वाञ्छितेच्छया शरीरिता ॥ ८ ॥

तथाहि वाशिष्ठरामायणे ।

नित्यो जन्यश्च कालौ द्वौ तयोराद्यः परेश्वरः ।
सोऽवाङ्मनसगम्योऽपि देही भक्तानुकम्पया ॥ ९ ॥
खड्गपाशधरः श्रीमान् कुण्डली कवचान्वितः ।
ऋतुषट्कमयोदारवक्त्रषट्कसमन्वितः ॥ १० ॥
मासद्वादशकोद्दामभुजद्वादशकोत्कटः ।
स्वाकारसमया वह्नरावृतः किङ्करसेनया । इति ॥ ११ ॥
यद्यप्येतत्कालरूपं तथाप्यस्य रमापतेः ।
धृतनानातनोर्भक्त्यै कार्य्या स्वेष्टाकृतिस्मृतिः ॥ १२ ॥
नित्याज्जन्यस्य कालस्य समुत्पत्तिरभूदिति ।
श्रुतिप्रामाण्यमासाद्य प्राह स्वायम्भुवो मनुः ॥ १३ ॥

तथाहि ।

कालः कालविभक्तिश्च नक्षत्राणि ग्रहांस्तथा ।
सृष्टिं ससर्ज्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः । इति ॥ १४ ॥
कालात्मा दिनकृत् प्रोक्तो होरास्कन्धे यतस्ततः ।
सिद्धान्तगदिता सृष्टिर्न विरोधमिहार्हति ॥ १५ ॥
युगादिप्रलयान्तेषु जन्यकालेषु वत्सरः ।
प्रधानभूतोऽवयवो स्वाङ्गैर्युक्तोऽयनादिभिः ॥ १६ ॥
सम्यग्वसन्ति यत्रर्त्तुमासपक्षदिनादयः ।
प्राज्ञैः कालविशेषोऽसौ संवत्सर इतीरितः ॥ १७ ॥
अयते येन पूषर्त्तुत्रयेणोदग्दिशं तथा ।
दक्षिणाशां तदेवोक्तमयनं सौरमानजम् ॥ १८ ॥
इयर्त्त्यशोकपुष्पादिलिङ्गं साधारणेतरम् ।
यः स कालविशेषोऽत्र वसन्ताद्यृतुरुच्यते ॥ १९ ॥

मास्येते परिमीयेते येन चन्द्रर्द्धिसङ्क्षयौ ।
सूर्य्यराशिगतिर्यत्र मास्यतेऽङ्गाश्च यत्र हि ॥ २० ॥
मास्यते त्रिंशतः संख्या तथाङ्गां भश्चमोच्यताम् ।
मासः स उच्यते चान्द्रः सौरः सावन ऋक्षजः ॥ २१ ॥
पच्येते परिगृह्येते देवतापितृकार्य्ययोः ।
यौ तौ पक्षौ शुक्लकृष्णौ चन्द्रवृद्धिक्षयोद्भवौ ॥ २२ ॥
तनोति यो वर्द्धमानां क्षीयमाणां कलां विधोः ।
एकां कालविशेषोऽयं तिथिरित्युच्यते बुधैः ॥ २३ ॥
इत्थं याममुहूर्त्तादिकालाङ्गानामनेकशः ।
व्युत्पत्तिर्न मया प्रोक्ता ग्रन्थविस्तरसाध्वसात् ॥ २४ ॥
नवधा कालनामानि चान्द्रमार्क्षं च सावनम् ।
वार्हस्पत्यं ततः सौरं मानवं पैत्रमेव च ॥ २५ ॥
दैवं ब्राह्ममिति प्रोक्तान्यत्र पञ्चभिरादिमैः ।
व्यवहारो मनुष्याणां मन्वादीनां स्वनामतः ॥ २६ ॥
भूगर्भनिःसृतात् सूत्रात् सूर्य्यमण्डलमध्यगात् ।
प्राचीं यद्याति शीतांशुश्चान्द्रमानं तदुच्यते २७ ॥
व्यर्केन्दुभगणो मासस्तदर्द्धं पक्ष इष्यते ।
तिथिस्तत्शररूपां१५शस्तदर्द्धं करणं मतम् ॥ २८ ॥
व्रतोपवासपर्व्वादिकृत्याकृत्यपितृक्रियाः ।
चान्द्रमानेन गृह्यन्ते मासवृद्धिक्षयादयः ॥ २९ ॥
पर्व्वान्ते कृत्तिकादीनां योगाद्वै कार्त्तिकादयः ।
मासाः प्रागभिर्मतास्तद्वदृक्षस्थबृहस्पतेः ॥ ३० ॥
उदयस्तद्भनाम्नाब्दाः सूर्य्यसिद्धान्तसम्मताः ।
तल्लक्षणान्यतिव्यासेनात्र प्रोक्तानि विस्तरात् ॥ ३१ ॥

कृत्तिकाशब्दवाच्यं यत्कृत्तिकारोहिणीद्वयम् ।
तत्पर्व्वान्तान्वयान्मासो निरुक्तः कार्त्तिको यदि ॥ ३२ ॥
तदूर्ज्जमार्गपर्व्वान्तभरणीरोहिणीयुतौ ।
अब्दे त्विषोर्ज्जतापत्तिर्भवेत् कार्त्तिकमार्गयोः ॥ ३३ ॥
तथापि पूर्व्वचलितव्यवहारवशादिमे
कृत्तिकामृगशीर्षादिनामभिः प्रायिका मताः ॥ ३४ ॥
एकः पश्चाद्भमो भानां नाक्षत्रं दिनमुच्यते ।
घटिकादिकमायुश्च तन्मानेनैव सिध्यति ॥ ३५ ॥
नाक्षत्रमानसंसिद्ध-
मायुः कल्पार्कवासरैः१५५५२००००००००।
गुणितं तद्भमा१५८२२३७८२८०००वाप्तं
सौराब्दादि स्फुटं भवेत् ॥ ३६ ॥
यद्यपि स्याद्ग्रहाणां स्वस्वोदययुगान्तरम् ।
तत्तत्सावनघस्राख्यमुक्तपूर्व्वं तथापि हि ॥ ३७ ॥
मध्यार्कगतियुक्चक्रकलिकासंख्यकासुभिः२१६५९।८ ।
सम्मितं सावनं मध्यग्रहानयनकर्म्मणि ॥ ३८ ॥
स्फुटसूर्य्योदयद्वन्द्वविवरं सावनं दिनम् ।
प्रसिद्धं तेन यज्ञादिसूतकाद्यब्दपादयः ॥ ३९ ॥
ज्ञेया जैवेन मानेन वत्सराः प्रभवादयः ।
लुप्तवर्षाधिवर्षाब्दस्वराद्याः संहितोक्तिभिः ॥ ४० ॥
एकांशप्राग्गतिर्भानोः सौरं दिनमितीर्य्यते ।
त्रिंशता तद्दिनैर्मासो वर्षं द्वादशभिश्च तैः ॥ ४१ ॥
सौरमानेन गृह्यन्ते संक्रमर्त्त्वयनादयः ।
देवासुरद्युरजनीयुगमन्वन्तरक्षयाः ॥ ४२ ॥

विवाहव्रतचूड़ादिवेश्मारम्भादयः क्रियाः ।
मासाब्दनियमाः पर्व्वाण्यपि देशविशेषतः ॥ ४३ ॥
सौर—तुलादिषड़शो८६त्यंशैः षड़शीतिमुखं दिनम् ।
तच्चतुष्टयमेव स्याद्विस्वभावेषु राशिषु । इति ॥ ४४ ॥
धनुषः सप्तविंशोऽंशस्त्रयोविंशोऽण्डजस्य च ।
द्वन्द्वस्यैकोनविंशश्च स्त्रियाः पञ्चदशः स्मृतः ॥ ४५ ॥
तत्तन्मासेषु सूर्य्यस्य षड़शीतिमुखान्वयात् ।
षड़शीत्याख्यया प्रोक्ता द्व्यात्मकर्क्षेषु संक्रमाः ॥ ४६ ॥
ओजपादादिचरयोः संक्रमौ विषुवाभिधौ ।
युग्मादिचरयोर्याम्यसौम्यायनलयोदितौ ॥ ४७ ॥
चरद्व्यात्मकयोर्मध्ये स्थिरराशिचतुष्टयम् ।
भानोर्विष्णुपदीसंज्ञास्तत्प्रवेशाः प्रकीर्त्तिताः ॥ ४८ ॥
पूर्व्वोक्तक्रमसंसिद्धा रविसंक्रान्तिसम्भवाः ।
पुण्यनाड्यस्त्रयस्त्रिंशत् स्वमध्यस्थार्कसंक्रमाः ॥ ४९ ॥
आद्या दशसु संक्रान्तिष्वयने दक्षिणे तु ताः ।
अन्तस्थसंक्रमाः सौम्यायने त्वादिस्थसंक्रमाः ॥ ५० ॥
अतिपुण्यतमाः प्रोक्ताः सक्रमासन्ननाड़िकाः ।
चलनासन्नता यत्र दिवास्नानादिकं तदा ॥ ५१ ॥
तन्निशार्द्धादधश्चोर्द्ध्वं सञ्चारे प्राक्परं ततः ।
आसन्नद्युदलं पुण्यं निशीथे चेत्तदा तिथिः ॥ ५२ ॥
संक्रान्तिकालनिष्ठाया यद्दिने महती स्थितिः ।
तत्र कार्य्याः क्रिया एष विचारो ह्ययनादृते ॥ ५३ ॥
रात्रौ याम्यायने पूर्व्वदिनस्यान्त्यदलं मतम् ।
सौम्यायने परदिनस्यादिमं पुण्यदं दलम् ॥ ५४ ॥

अहःसंक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् ।
आर्त्तैस्तथापि संक्रान्तेरासत्तिर्बहु मन्यते ॥ ५५ ॥
उक्तौ विधिरयं कालो निषेधे त्वामिषादिनः ।
पूर्व्वास्त्रिंशत् परास्त्रिंशद्ग्राह्याः पर्व्वोत्थनाड़िकाः ॥ ५६ ॥
मासान्ताद्यनिरंशाख्यौ मासस्यान्त्यादिमौ लवौ ।
यात्रोद्वाहादिकार्य्येषु त्याज्यौ कल्याणमिच्छुभिः ॥ ५७ ॥
बिम्बान्तर्वर्त्तिनः पुंसः संक्रान्तिसमयो नृभिः ।
त्रुटेः सहस्रभागत्वादवगन्तुं न शक्यते ॥ ५८ ॥
सौरे—भचक्रनाभौ विषुवद्वितयं समसूत्रगम् ।
अयनद्वितयं चैव चतस्रः परमास्तु ताः । इति ॥ ५९ ॥
सौम्यायनान्मासयुगैः शिशिराद्यृतवस्त्रयः ।
तथैव याम्यायनतः प्रावृड़ाद्यास्त्रयो मताः ॥ ६० ॥
अथ पञ्चविधाब्दानां रविमध्यमसावनैः ।
दिनैर्मानानि कथ्यन्ते मध्यभुक्त्यनुसारतः ॥ ६१ ॥
द्वाविंनाड्यधिकाब्धिशररामा३५४।२२श्चान्द्राब्दवासराः ।
सैकनाड्यङ्कबाणाग्निसंख्या३५९।१ नाक्षत्रवर्षजाः ॥ ६२ ॥
सावनाब्दस्य ते षष्टिसमन्वितशतत्रयम्३६० ।
सपञ्चदण्डरूपाङ्गवह्नयो३६१।५ जैववर्षजाः ॥ ६३ ॥
सौराब्दवासराः पञ्च-
षष्ट्युत्तरशतत्रयम्३६५ ।
तिथिभिः१५ क्ष्माश्विभि२१श्चैतैः२१
सिद्धै२४र्दण्डादिभिर्युतम् ॥ ६४ ॥
ऋक्षेशभगणं केचिदार्क्षं मासं प्रचक्षते ।
अष्टदण्डोननागाश्विगुणास्तद्वर्षवासराः३२७।५२ ॥ ६५ ॥

मनूनां राज्यकालोऽत्र मानवं मानमुच्यते ।
न पृथग्दिनमासादिनियमस्तत्र सम्मतः ॥ ६६ ॥
चान्द्रो मासः पितृदिनं यत्तैः खाङ्गगुणैः३६० समा ।
सावनैस्तत्प्रमाणं तद्रूपाग्निरसदिग्दिनैः१०६३१ ॥ ६७ ॥
दैवं मानं यद्वैतदासुरं परिकीर्त्तितम् ।
सौराब्दस्तदहोरात्रो दिनरात्रिविपर्य्ययात् ॥ ६८ ॥
सषष्टित्रिशताहोभि३६०स्तदब्दः स तु सावनैः ।
सम्मितः साङ्कदस्राग्निगोशक्राग्निकुभि१३१४९३।९दिनैः ॥ ६९ ॥
सौराब्दैरर्बुदगुणैः कृतदिक्चन्द्रवह्निभिः३११०४००००००००।
सम्मितं ब्रह्मणो वर्षं पुरोक्तास्तद्दिनादयः ॥ ७० ॥
मनूनां यत् पृथङ्मानं हरिवंशेऽस्ति तद्रवेः ।
गत्याप्यशक्यमानेतुं लिखाम्यार्षोक्तिगौरवात् ॥ ७१ ॥
यथा हरिवंशे—दिव्यमब्दं दशगुणमहोरात्रं मनोः स्मृतम् ।
अहोरात्रं दशगुणं मानवः पक्ष उच्यते ॥ ७२ ॥
पक्षो दशगुणो मासो मासैर्द्वादशभिर्गुणैः ।
ऋतुर्मनूनां संप्रोक्तः प्राज्ञैस्तत्त्वार्थदर्शिभिः । इति ॥ ७३ ॥
कालव्याप्तिर्बहुविधा श्रौतस्मार्त्तेषु कर्म्मसु ।
तत्शुद्धिश्च विवाहादौ नोक्ता स्मृत्युक्तिभावतः ॥ ७४ ॥
चन्द्रगत्यनुसारेण जलोल्लासान्महाम्बुधेः ।
गङ्गाद्यब्वृद्धिनियमः क्वाचित्कत्वादलेखि नो ॥ ७५ ॥
भास्वत्सम्मुखभाग्दले द्युतिभृतोऽन्यत्रात्मनश्छायया
व्याप्तस्यैन्दवगोलकस्य सतत-क्ष्मासम्मुखैकार्द्धतः ।
सूर्य्याशां त्यजतोऽयतो धवलतां वृद्धिक्षयावीक्ष्यते
लोकस्तत्पितरः क्व सम्मुखदले मासार्कपक्षाद्भ्रमम् ॥ ७६ ॥

नव्याभ्रभ्रमरप्रभाकरसुतापाथःप्रफुल्लोत्पल-
प्रालेयांशुकलङ्ककज्जलमहानीलाश्मनीलोज्ज्वलः ।
शम्पाचम्पकनीपकुङ्कुमतमीचामीकराभाम्बरः
कृष्णः संसृतिशर्वरीश्वजनितां मुष्णातु तृष्णां मम ॥ ७७ ॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
द्वाविंशकः प्रथितकाल इतः प्रकाशः ॥ ७८ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे कालाधिकारे
संवत्सरादिवर्णनो नाम द्वाविंशतितमः प्रकाशः ।

त्रयोविंशः प्रकाशः ।

पुरुषोत्तमस्तववर्णनम् ।

या वाग्वागब्रह्मशर्व्वेड़ितगुणविततेः श्रीपतेर्वर्णनाढ्या
सा स्यादिष्वाशुभघ्नी सततमपि युता वद्यवद्गद्यपद्यैः ।
या तद्रिक्ता सुपृक्तापि च सुभगपदैस्त्यज्यते सद्भिरेषा
तस्मात्कृष्णाचलेशामलगुणजलधेर्वर्णनीयोऽत्र बिन्दुः ॥ १ ॥

यत्र द्वेधं पवित्रं विलसति सितरुङ्मित्रनेत्रस्य गात्रं
गोत्रा यत्रातिमात्रास्तदवयवसृतां दीपवत्यो विचित्राः ।
स्वस्थानस्थाः पदस्थापितनिजजनता देवताः सन्ति नित्या
मर्त्याः स्मार्त्ताः स्मरार्त्ता हरिचरणरतास्सोत्कलः स्तात्कलिघ्नः ॥२॥

स्तव्या भव्या अभव्या अपि वचनचयैर्नव्यनव्यैश्च दिव्यै-
र्वास्तव्या यत् पृथिव्यामवनतवदनैर्व्योम्नि निर्वर्ण्यमानाः ।
बाहुव्यूहाग्रविभ्राजितवनजगदाकम्बुचक्रा इवोच्चै-
रोद्धुः प्रौढप्रभावो जयति परिवृढः सर्व्वदेशस्य सोऽयम् ॥ ३ ॥
नानोद्यानोद्यतानोकहबहलदलच्छायशान्तातपार्त्ति-
नित्यप्रत्यग्रसौधावलिदलितकलानाथभृत् शैलकान्तिः ।
अश्रान्तभ्रान्तवातप्रमथितपथिकश्रान्तिरच्छेमशान्तिं
कुर्य्यात्पर्य्यन्तगर्ज्जज्जलधिरधिरुचिः कम्बुभाः कापि पूर्नः ॥ ४ ॥
यत्रामर्त्त्याः परत्राकृतसुकृतजनत्रासिनोऽप्येत्य मर्त्त्यान्
वित्रस्ता वेत्रहस्ता ननु विनुतिकृतः प्रेक्ष्य सख्येच्छवः स्युः ।
देवा देवाधिदेवाननलिनदृशः सन्ति नानात्मभाजः
कुर्य्यात् पर्य्याप्तवीर्य्या शमनिशमसिता हार्य्यधूर्य्या पुरी नः ॥ ५ ॥
अन्तर्वेदी त्रिवेदीनिगदितमहिमाधित्यका नित्यकान्ता-
स्तुङ्गाः शृङ्गाणि यस्यामरनिकरगृहाः पावनी यद्वनीश्रीः ।
प्राकारो यत्प्रपातः प्रमथपतिनुतोपत्यका पूर्यदीया
स श्रीशाम्भोदभारी वितरतु जगतां मेचकं मेचकाद्रिः ॥ ६ ॥
तुङ्गप्रासादशृङ्गप्रतिलवपवनान्दोलिता वैजयन्ती
वाञ्छाकल्पद्रुतीर्थेश्वरशिरसि चरत्पल्लवश्री जयन्ती ।
याम्यस्याम्यातिताम्यज्जनवृजिनचमूमूर्जितां तर्ज्जयन्ती
पायान्मायाभवाध्वश्रममिव शमिनां वीजनैर्म्मार्ज्जयन्ती ॥ ७ ॥
शौण्डानां दण्डपाणेरपि चरणजुषां दण्डदः केतुदण्ड-
खण्डालस्योर्द्ध्वगत्या अपि किमु विदलच्चण्डमार्त्तण्डविम्बः ।
चञ्चच्चञ्चत्पताकाशयविधुतिमिषाद्बाहुराहूतलोकः
प्रासादस्येव दूरादपनयतु भयं पञ्चलः किङ्कराणाम् ॥ ८ ॥

चक्रं तच्चक्रवक्रक्रकचकटुतनु भ्रान्त्यविश्रान्ति दन्ति
क्रान्तिप्रान्तातिशान्ताजितमखिलमहः संहरेदंहसां नः ।
सङ्घ सङ्घातपातादवितुमविकलं हन्त पातित्यभाजो
भ्राजत्प्रासादराजोपरिपतितदृशः श्रीमतूर्य्यांशरूपम् ॥ ९ ॥
पर्य्यस्तोत्कीर्णनानाभरणचयतनुस्वातनुः शातदायी
सोऽन्तःसन्तापशान्त्यै विलसतु कलशः सत्सुधाधारधामा ।
यः पञ्चाक्षान्तलग्नाभिधविबुधशिरोगर्भकाकारचक्रा-
क्रान्तश्चूडेव निःश्रेयसपथपथिकानर्थहृद्भद्रकुम्भः ॥ १० ॥
सप्ताष्टार्कप्रकाश्यामलकततिरतिद्योतिता द्योतयन्ती
प्रासादस्थूलमूर्त्तिर्भवतु भगवतः सर्व्वतो वल्लभावम् ।
यात्राप्रीत्यङ्गगुच्छस्थपरिगुणचतुःषष्टिमुख्यन्तनिष्ठै-
र्दृष्टा भ्रष्टं शिरोवेष्टनमपि तनुते साममानिष्टनष्ट्यै ॥ ११ ॥
स्पष्टास्वष्टासु काष्ठास्वनुघटितपतत्केतुकण्ठीरवेन्द्रैः
पश्चाद्दिश्याघनाशप्रभवपरिभवोत्कुण्ठनाकुण्ठवीर्य्यैः ।
दृष्टिप्रेष्ठप्रकृष्टप्रतिकृतिरतुलः सुष्ठु नोऽधिष्ठिताङ्गो
वैकुण्ठाभासकण्ठो विघटयतु हठात्कष्टदादृष्टसृष्टिम् ॥ १२ ॥
जम्बूद्वीपाख्यभूपाखिलभुवनजयस्तम्भसम्भारभारी
गर्भस्थानन्तविश्वम्भरशरणतया वाङ्मयातीतमानः ।
साङ्गोपाङ्गोऽतितुङ्गोऽनुगुणपृथुलतः प्रेक्षकानन्दकन्दः
प्रासादेशोऽनिशं नः स्पृशतु विशदृशः स्वाशयं श्रीशमूर्त्तिः ॥ १३ ॥
प्राकारद्वन्द्वमध्यप्रततसमदृशत्कुट्टिमाट्टापकृष्ट-
प्रासादावेष्टितोऽधस्तृतमसृणलसन्मुद्गपाषाणपट्टः ।
नानाकारावतारैर्हरिणनरवरैः कुञ्जरै रञ्जितोऽन्तः-
पुञ्जं कुञ्जाधिराजालय उपचयिनं व्यञ्जयेच्छर्म्मणां नः ॥ १४ ॥

ग्रीवं सोर्ध्वभागं शिखरमृजुतरं मञ्जरीं मञ्जुलाभां
भित्तिं ध्वस्ताघभीतिं त्रितनुतनुगृहान् वक्षशालां विशालाम् ।
पीठं शिष्टाभिजुष्टं गृहमतिविततं श्रीजगन्मोहनाख्यं
भोगार्थं मण्डपञ्चाद्भुतमवनिधवस्याश्रये प्रश्रयेण ॥ १५ ॥
प्रेङ्खन् शङ्खस्य नाभौ सततमतिकशाबाहुदण्डैः प्रचण्डैः
शाखाभिश्चण्डरोचिस्तनुजनिजजनान् वारयन् किं विदूरात् ।
कल्पान्तेऽप्यन्तहीनः सकलकलुषहृत् सिन्धुराजोऽधिरोधो-
न्यग्रोधः क्रोधकामाद्यरिपरिभवकृद्भूतवर्गस्य भूयात् ॥ १६ ॥
भद्राभूमाधवश्रीमुखलसद्दरिभिः शोभितः श्रीवपुष्मा-
नस्मानुष्णांशुजोष्मागमशमनघनः पातु देवाधिदेवः ।
जन्तुर्मन्तून्विहन्तुं प्रभवति शतशोऽङ्काय यन्नाम गृह्णन्
पश्यन् भ्रश्यत्यवश्यं विषयजलनिधौ नैव यं दैवभृत्यः ॥ १७ ॥
सार्धं येनेन्दुपद्माद्यखिलमुपमितिद्रव्यमासीत्कृतार्थं
विद्वद्भिर्वर्ण्यमानं यदनुमितिकृतः कृत्रिमं विश्वमाहुः ।
शब्दब्रह्म प्रमाणं यदवयवजनैर्योऽसकृन्नारदाद्यैः
साक्षाल्लक्ष्योऽपि साक्षी भवति नवनवः श्रीधवः सोऽवतान्नः॥ १८ ॥
द्रव्यैर्जातूपमानं न भवति कृतिनां प्राकृतैर्जातदोषं
सर्वान्तर्यामिभावाद्द्युतिमति कृतिभिर्यस्य लोकोत्तरस्य ।
व्यक्ताव्यक्तेषु सत्त्वेष्वपरिमितनिजव्याप्तिमुद्रात्तुकामः
स्तम्भाद्यो दिव्यसिंहोऽभवदिह च महादारुदेहः स नोऽव्यात्॥ १९ ॥
पारावारप्रतीरप्रथितवटमहापादपस्पर्शनाशा-
प्रोद्यत्प्रासादपीठार्पितविपुलवपुः पाण्डुपद्मोपमाक्षः ।
पूर्णप्रेमप्रदानप्रवण उपनिषत्प्रार्थ्यमानानुनम्रः
पापौघान्मां पुनीयात्पतितपतिमयं पूतनाप्राणपायी ॥ २० ॥

अथ श्रीजगन्नाथस्य द्वाभ्यां समुद्रसाम्यम् ।

लक्ष्मीभृन्नागसङ्घामृतघननिरशनिश्वासितक्ष्माभृदीश-
स्थानं स्वर्गापगायाः प्रभुरखिलनृणां पापसन्तापहन्ता ।
श्यामश्रीर्मीनकूर्माद्यमिततनुधरः शङ्खचक्राब्जवाहः
कल्पान्तग्रस्तलोकः कलयतु कमलं तीर्थराट् क्लान्तिशान्त्यै ॥२१॥
यत्रास्ते भानुबिम्बोद्दितसितकिरणप्रोज्ज्वलं नेत्रयुग्मं
नासावाह्लदराङ्घ्रि स्फुरति च विविधद्वीपशोभानुकारि ।
वारीव श्यामलश्रीर्मकरसुरुचिरे कुण्डले बाड़वाग्नि-
ज्वालेवोद्यत्किरीटं तरणिवदधरः सोऽस्तु शान्त्यै कृपाब्धिः ॥२२॥

अथैकेन ब्रह्माण्डसाम्यम् ।

विभ्रद्दस्रत्वपेशी नयनयुगमिषादभ्रशोभामदभ्रां
शुभ्रश्रीर्वक्त्रदम्भादधरपुटरुचिव्याजतः सान्ध्यवेलाम् ।
तिर्य्यग्विस्तीर्णवृत्तातुलभुजवलयच्छद्मनश्चक्रवालं
शैलं मध्यस्थलात्काञ्चनमुपचिनुताद्विश्वभर्त्ता शुभं नः ॥ २३ ॥

एकेन शिवसाम्यम् ।

भूतेशो भूतिभूमिर्भवजभयभरोच्छेदभेदिप्रभावो
भूयाद्भोगीन्द्रभोगाभरणवपुरभोभावदो भूतभूतिः ।
भूभृद्भूमीन्द्रमौलिर्भृतवरकमलो गौरभा भेशभङ्ग-
प्रभ्राजज्ज्वालभित्तिर्वृषभरणचणः सत्यदम्भाभिसन्धिः ॥ २४ ॥

एकेन गौरीसाम्यम् ।

सर्व्वाराध्या सितक्ष्माधरपरमयशोभूतिविख्यातिहेतु-
र्माता लोकस्य दृप्यन्मधुवधमुदितादित्यगीतप्रशस्तिः ।
पाताखण्डादिदैत्याभिभवनखररुक् चन्द्रकान्तोत्तमाङ्ग-
श्रीरस्मान् सर्व्वदोमेश्वर उदितरतिः केलिकान्ताङ्गसंभृत् ॥ २५ ॥

चान्द्रेवीसाम्यम् ।

श्रीमद्गौराम्बराडम्बररुचिरपयोराशिशित्यङ्गलक्ष्मी-
र्लक्ष्मीशेनाहृताङ्गस्फुटतमसुमनःसङ्गतिर्वाङ्नताङ्घ्रिः ।
ब्रह्मानन्दैकभूमिर्भ्रमशमनपटुः स्वाश्रितानामविद्यां
भिद्यादस्थूलदेहाह्वितसकलजगद्धीरमेयस्थितिर्नः ॥ २६ ॥

गणेशसाम्यम् ।

हस्तोद्यत्पुष्करश्रीः श्रुतिशिखरधुतोन्मत्तचित्तालिलेखो-
ऽलङ्कर्त्ता चाममध्यस्त्रिपुरहरतनूदक्षपक्षस्य रक्ष्यात् ।
सद्योऽविद्यान्धकारात्परशुधरपुरस्कार्य्यदुर्वार्य्यवीर्य्यो
देवः श्रीपार्व्वतीशाश्विविधिविततयशाः स्वर्गवर्गाग्रपूज्यः ॥ २७ ॥

सूर्य्यसाम्यम् ।

छायाकान्तः कृतान्तार्च्चितचरणयुगः पाणिराजत्सरोजः
स्वाग्रोद्यद्वैनतेयो रजनिचरसुखोच्छ्रायविच्छेददक्षः ।
स्वच्छानन्ताङ्कलीलः क्षपिततमतमाः सर्व्वतेजोऽभिभावी
कालिन्द्यानन्दकन्दः प्रमुदितकमलः पातु पङ्काद्धरिर्नः ॥ २८ ॥

विशेषणैर्नवग्रहसाम्यम् ।

पद्मानन्दैकसद्मामृतनिधिरवनीनन्दनश्चन्द्रवंशो-
त्तंसः स्वर्गेशवर्गेड़ितचरणयुगः सत्कवित्वाश्रयश्च ।
पक्षीभूतोरुपक्षी जननयनचयागोचरो नीचकेतु-
ज्यौतिष्मानच्युतोऽस्मानवतु भवभयादाशुविश्वग्रहात्मा ॥ २९ ॥
वन्दे वन्दारुवृन्दारकनिकरशिखारत्ननक्षत्रराजी-
रज्यत्पादारविन्दस्फुटनखरविधुध्वस्तचेतस्तमस्कम् ।
कोटिक्रीड़ाण्डभाण्डप्रकटगुणघटैः सेवितं स्वावतारैः
श्रीमद्गोविन्दमिन्दीवररुचिरतनुमिन्दिरानन्दकन्दम् ॥ ३० ॥

अथ दशावतारस्तुतिः ।

मीनोऽलीनो महीनोदर उषितऋषिव्रातगोत्रातरीस्थं
पातुं सत्यव्रतं वातरदिह सुमहाहार्य्यसन्दोहदेहः ।
वेदोद्धाराय योऽद्धा व्यधितवधमदश्चौरवृत्रारिशत्रो-
स्त्राणं तापत्रयान्नस्त्रिपुरहर पुरस्कारपात्रं तनोतु ॥ ३१ ॥
कूर्म्मोऽशर्म्मापनिर्म्मोचयतु रयभरभ्रान्तमन्थस्थिराभ्र-
भूरिग्रावाग्रसङ्घट्टनघटितमहापृष्ठकण्डूतिसौख्यः ।
धत्तक्षीराब्धिलीनोच्छलितचलहृदां मीलनं स्वाश्रितेभ्यो-
ऽनर्थेभ्यः प्रोज्झितास्थेन च पवनसमुत्थानमर्थापयन्नः ॥ ३२ ॥
कोलः कोलं कुलीनं दधदधिजलधीवाथ उद्धृत्य दन्त-
प्रान्तेऽग्राणीं दुरन्ते प्रथमदितिसुते हृद्दुर्द्धर्षयुद्धैः ।
देयादायासहीनो द्रुहिणहरिहयाद्यादितेयार्हणीयः
श्रेयोदाम्नायगेयक्रतुनिचयमयामेयकायः श्रियं नः ॥ ३३ ॥
भद्रं सद्यो नृसिंहो भवतु भवहरोऽङ्काय संहर्तुमर्हो
गर्जैर्विक्रीडदब्दैः प्रलयजलधरध्वानधारासमृद्धिम् ।
प्रध्वान्तस्तोयभक्ताघतिरमरपराध्यक्षवक्षःकवाट-
क्षोभप्रक्षय्यमाणक्षतजभृतनखो लक्ष्यलक्ष्मीकवक्षाः ॥ ३४ ॥
खर्व्वीकुर्व्वीत दर्व्वीकरभुवनगीर्व्वाणवर्गालयोर्व्वी-
गर्व्वानिर्व्वाकुपर्व्वार्य्यवनिधवमहासम्पदं लुम्पमानः ।
व्यापद्व्याप्तस्य घस्तितयरयभरादर्थनाव्याजखर्व्वः
सर्व्वं शर्व्वादिसेव्यः स्रवदमरधुनीनीरपन्नीरजो यः ॥ ३५ ॥
षष्ठः क्ष्मापेष्ठगोष्ठीकुठमणलुठनाकुण्ठतेजःकुठारः
श्रीवैकुण्ठावतारः कठिनरणधुरादृष्टषष्ठीशपृष्ठः ।

तिष्ठन् कण्ठीरवाभोऽर्जुनसुभटघटाघोरमातङ्गयूथे
श्रेष्ठः कष्टानि निष्ठेवयतु भृगुभुवां नीलकण्ठाङ्घ्रिनिष्ठः ॥ ३६ ॥
रामः श्यामाब्जधामा शमयतु स ममाशर्म्म घर्म्मांशुवंशो-
त्तंसः संसारहिंसावहमहिममहाम्भोधिरम्भोजनेत्रः ।
शौण्डश्चण्डीशकाण्डासनवलदलने दण्डकारण्यचारी
हारी वारीशतारी सुरपरविसरप्राणहारीषुधारी ॥ ३७ ॥
ऊर्ज्जेन्दुज्योतिरूर्ज्जस्वलविमलहराहार्य्यकृग्जैत्रगात्रः
सद्यः प्रोद्यद्दिनेशभ्रमदमदभराघूर्णितास्तीर्णनेत्रः ।
प्रत्यग्राम्भोदवृन्दप्रतिभटपटभृद्भूरिभास्वद्विभूषो
भूयाद्भूगोलभारी भवभयभरभिद्भानुभूभेदनो नः ॥ ३८ ॥
अध्यात्मध्यानबद्धादरविधृतधृतिध्वस्तशुद्धाध्वराध्व-
श्रद्धः क्रोधादिरोधाद्विधिविहितवधासाधुतासिद्धबोधः ।
दध्याद्बुद्धाभिधानो मगधधरणिभृल्लब्धजन्माधिदेवो
बाधाब्धुद्धारधुर्य्यां धियमधनधनं धर्म्मधारां धरन्नः ॥ ३९ ॥
निर्द्धूलीधूमधाराधरनिकरनभोमध्यविद्योतमान-
द्योतप्राग्भारभास्वद्भ्रमकरकरयुङ्मण्डलाग्रप्रचण्डः ।
स्वाधाराधीरघोरोद्धुरतुरगखुरक्षोदितक्षोणिरेणु-
च्छन्नच्छायेश ईशो दिशतु दशमको म्लेच्छविच्छेदकृच्छम् ॥ ४० ॥
मत्स्याद्याकल्किरूपं दशविधतनुभ[illegible]क्तिमद्२४संख्यात्ममूर्त्ति-
र्द्वात्रिंशद्वाचधर्त्ता जगदुपकृतये कृष्णनानावतारः ।
भागांशाद्यैर्विभेदैः परिचरितपदद्वन्द्व इन्द्राश्मकान्तिः
कृष्णस्तृष्णानृताब्धेः सृजतु नृजनिजाद्दुष्कृतान्निष्कृतिं मे ॥ ४१ ॥
या लीला गोकुलान्तर्म्मधुपुरि रचिता याः कृता द्वारवत्यां
चित्यां नित्यावतारैः प्रतियुगमुचिताः सूचिताः प्राङ्मुनीन्द्रैः ।

लास्ता विस्तारयन् यो वसति क्षितिगिरौ वेदवेद्योऽवतारी
नित्ये धाम्नि स्वनाम्नि स्फुरतु मुररिपुः सोऽयमन्तः सदा नः॥४२॥
योऽसौ सर्व्वत्र पूर्णोऽप्यसितगिरिदरीकेशरी योऽप्यरूपः
पद्मप्रद्युम्नरूपोऽप्यणुरतनुतनूसंभृताशेषलोकः।
निस्त्रैगुण्योऽप्यगण्यामलगुणनिलयो वाङ्मनोऽतीतधामा
मादृक्चर्म्माक्षिलक्ष्यः स्फुरतु मनसि नश्चित्तसिन्धुर्मुकुन्दः ॥ ४३ ॥
माधुर्य्यैश्वर्य्यपूर्णः क्षितिधरपरमव्योमगोलोकनाथः
श्रीभूलीलादिसेव्योदरकमलगदाचक्रभृद्वेणुपाणिः।
भुक्तेर्मुक्तेश्च भक्तेर्वितरणनिपुणश्चिद्घनानन्दमूर्त्तिः
सर्व्वव्यापी परात्मा स भवतु भगवान् ब्रह्मभूतिर्गतिर्नः ॥ ४४ ॥
राजन् प्रासादराजे वृजिनवनरुजाकुञ्जरः कुञ्जपुञ्जे
मञ्जौ सञ्जातघातव्रजयुवतिजनान् रञ्जितान् व्यञ्जयन् यः।
गर्ज्जत्पर्ज्जन्यराजिप्रतिभटलवणाम्भोधिकूलस्थनील-
क्ष्माभृद्भूसार्व्वभौमः स भवतु भविनां भूतये देवराजः ॥ ४५ ॥
कंसाकर्षक्रियाकल्कनकवसनकः कुञ्जकेलीकलापी
केशोद्यत्केकिपिच्छः कृतकलिकलुषक्लेशकृत्तिः कृतज्ञः।
कल्पाक्रान्तत्रिलोकीकवलनकलितक्रूरकालाग्निरुद्रः
कृष्णः कल्याणकारी भवतु कविकुलोत्कीर्त्तितानेककीर्त्तिः ॥४६॥
संख्येऽसंख्येयदुःक्षेपणकुणपभुजां वक्षसि क्षिप्तबाणः
पक्षे सख्येऽतिदक्षेऽसुरवरतनुजे ख्यातसौख्योऽम्बुजाक्षः।
अक्षेऽधिक्षेपलक्ष्ये कुरुकुलनृपतेर्धर्म्मराजे कृपालू
रक्षेदक्षेमविक्षेपक उदधितटक्षेत्रराट् क्ष्मापतिर्नः ॥ ४७ ॥
कारागारानुकारानुमितभवदवच्छेदनोद्यत्कुठारः
कालव्यालास्यमीलज्जगदवदगदः श्रीलनीलाद्रिसिंहः।

माराकारावकारानवरतरतनुर्भानुभूद्दण्डखण्डी
सर्व्वागीर्व्वाणगर्व्वाचलपविरवतु प्राक्तनः पूरुषो नः ॥ ४८ ॥
धीराधीरादिसत्त्वक्षणचणरमणीवर्गसङ्गीतरागः
क्षाराम्भोराशितीरावनिधरशिखरप्रस्तरागारसारः ।
स्वारान्नीराजिताङ्घ्रिर्बृहदतुलभुजः कुञ्जरापत्तिभेत्ता
भाराहारावतारो वितरतु नितरां श्रीधरः श्रीभरं नः ॥ ४९ ॥
ह्लादिन्याह्लादसीमार्व्वुदमदनरुचिः सन्धिनीसन्धितात्मा
संवित्संवातधामा निगमगणशिरस्तुत्यसत्यप्रभावः ।
शेषाशेषाङ्गसद्मा सुरतरुतलभाक्कल्पितप्रेमरूपः
श्रीकृष्णः प्रेमभक्तिं वितरतु हृदि नः सच्चिदानन्दरूपः ॥ ५० ॥
राधासाधारणश्रीकमनसुमनसं केकिपिच्छावतंसं
चन्द्रावल्यादिरागाच्छिदुरसुरनदीसंग्रहागाधसिन्धुम् ।
वंशीसंशीलितास्यं कनकमणिमयाकल्पमाकल्पयन्तं
विद्युद्विद्योतिवस्त्रं नवजलदरुचिं श्रीजगन्नाथमीड़े ॥ ५१ ॥
यस्य श्रीविग्रहोद्यद्युतिरिति परमब्रह्म वेदान्तवेद्यं
कोटीब्रह्माण्डभारी परमशिवभवः श्रीमहाविष्णुरंशः ।
यस्य भ्रूक्षेपमात्रात्सृजति हरिहरब्रह्मशक्रादिदेवान्
मायापायादपायादयमुदितदयः पुण्डरीकेश्वरोऽस्मान् ॥ ५२ ॥
कृष्णाकृष्णाम्बुधिष्ण्याम्बुजचरणरण क्षीणगीर्व्वाणशत्रो
कृष्णाकृष्णादितृष्णाहरणरणरणश्रीतिरस्कारकारिन् ।
उष्णानुष्णांशुविस्मापननयनयुगाकार तारुण्यभारिन्नस्मान्
भीष्मादिकोष्मापह विहितमहापातकान् पाहि पातात् ॥ ५३ ॥
श्रीराधाकान्त कान्ताननलिनहरे रामकृष्णावतारिन्
गोविन्दानन्दकन्दाद्भुतगुणवितते श्रीपते नीपमालिन् ।

कंसारेऽसारसंसारहर हरनुतापारकारुण्यसिन्धो
दुःखाम्भोरुद्धृतिं मे तनु दनुजरिपोऽनुग्रहप्रग्रहेण ॥ ५४ ॥
पार्थानर्थप्रमाथप्रथितपृथुयशो मन्मथप्रार्थ्यकान्ते
श्रीमन्नित्यस्खलत्स्वागमपथपथिकप्रार्थितार्थामरद्रो ।
शक्रप्रत्यर्थिपाथःपतिमथनमहामन्थ पृथ्वीधरान्तः
स्थानं नाथामि तीर्थाधिपतटवटयोः श्रीजगन्नाथ दुःस्थः ॥ ५५ ॥

दासीपादरजांसि निर्जरशिरोधार्य्याणि सूर्य्यात्मज-
स्फूर्ज्जद्दुर्ज्जयदूतदर्पदमनो यत्र स्थितिः पापिनाम् ।
तत्र स्तादसमोर्द्धवैभववति क्षेत्रोत्तमे जातु मे
नैव श्रीपुरुषोत्तमे शिवतमे स्यात्तु विरागोदयः ॥ ५६ ॥

इत्युज्ज्वलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽतिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
कृष्णस्तुतिस्त्र्यधिकविंश इतः प्रकाशः ॥ ५७ ॥

इति श्रीचन्द्रशेखरसिंहकृतौ सिद्धान्तदर्पणे कालाधिकारे
श्रीपुरुषोत्तमस्तववर्णनो नाम त्रयोविंशतितम. प्रकाशः ।

चतुर्विंशः प्रकाशः ।

उपसंहारवर्णनम् ।

उपक्रमः स्वेष्टतमस्य विष्णोः स्तवादिनादौ रचितस्तुतस्य ।
तत्पादनत्योपनतस्य पूर्त्तिमथोपसंहारममुष्य कुर्वे ॥ १ ॥
तस्यादितः कौतुकपञ्जिकाख्यं
वक्ष्यामि किञ्चिद्गणितं मया यत् ।

कैशोरभाजारचि पञ्जिकालिं
दृष्ट्वैव पित्रा लिखितां प्रयत्नात् ॥ २ ॥
पञ्चाङ्गपञ्जीं प्रविलोक्य चैका-
मन्यां ततः कल्पयितुं क्षमः स्यात् ।
जनो धनुर्ज्यापदकाद्यविज्ञो
यथा तथायं क्रियते प्रकारः ॥ ३ ॥
कुवासरा नागशराग्नि३५८तुल्या
नागेन्दु१८नाड्यो रसभू१६विनाड्यः ।
कृताङ्गरामै३६४स्तिथिभिः समाप्ताः
स्युर्मन्दकेन्द्रौजपदान्तगेऽर्के ॥ ४ ॥
पलैस्त्रिभि३र्विश्व१३मितैश्च दण्डै-
र्युक्तानि पूर्वोक्तमहीदिनानि३५८।१३।३
ऋक्षैश्चतुःपञ्चगुणैः३५४ समाप्तिं
यान्त्यत्र नेष्टं रविमन्दकेन्द्रम् ॥ ५ ॥
कुवासरास्ते३५८ सदलेन्द्र१४।३०नाडी-
युक्ताः खनागज्वलनैः सहार्द्धैः३८०॥० ।
योगैः समाप्तिं खलु यान्ति मन्द-
केन्द्रौजपादान्तगते खरांशौ ॥ ६ ॥
तिथ्यर्द्धके यत्र यदिष्टमेतत्संवत्सरान्ते करणं प्रमेयम् ।
नक्षत्रभोगाङ्घ्रिविवेचनेन नवर्क्षपादात्मकराशयः स्युः ॥ ७ ॥
पूर्णेष्वतो द्वादशसु क्षपेश-
मासेषु यद्यात्तिथिभाद्यमिष्टम् ।
तत्पूर्ववर्षे हि तिथिः कृतो४ना
भाद्या गुणो३नं भमथापि योगः ॥ ८ ॥

सार्द्धद्वयो२॥नः परिस्फुटतां तद्ग्राह्यर्क्षतिथ्यन्तत एव देयाः ।
पुरोदितास्ता निजनाडिकाद्या योगस्य मध्यादथ तत्तदाद्याः॥९॥*
तिथ्यादयः षष्टिघटीभ्य ऊना भवन्ति चेदिष्टतमास्तदैकः ।
ग्राह्ये दिने वार इहैव देयो द्वौ षष्टिदण्डाधिकतापि चेत्तौ ॥१०॥
तद्ग्राह्यतिथ्यां तिथयस्ततस्तौ योज्यास्ततस्तः किल तारकायाम् ।
योगे च सार्द्धद्वयमेवमिष्टतिथ्यादयो ग्राह्यत उद्भवन्ति ॥ ११ ॥
मासेऽत्र पक्षेऽत्र तिथिर्मदिष्टा कीदृश्यमुष्यां कथमृक्षयोगौ ।
इति स्थिते प्रश्नविधौ तिथिः सा पञ्चाङ्गमुख्या प्रतिभाति यस्मात्॥१२॥
तद्यत्र पक्षे भवतीष्टतिथ्या पूर्त्तिर्यदृक्षाद्यमिहाल्पमिति ।
तदिष्टमस्मात् क्वचिदेकयोगो ग्राह्ये क्वचिच्चैकवियोग इष्टः ॥१३॥

अष्टाग्नयो३८ नागरसा६८ गजाश्वा७८
नागर्त्तवो६८ नागगुणा३८ विनाड्यः ।
देयास्तिथाविष्टतमे क्रियादि-
मासेषु पञ्चस्वमुना क्रमेण ॥ १४ ॥
हेयास्तुलादिष्वथ योग इष्टे
प्रोक्तेषु मासेषु धनर्णवाम्यात् ।
सूक्ष्मा ग्रहाष्टादशभागकेऽर्क-
ऽन्वत्रानुपातान् नतु भे क्रियेयम् ॥ १५ ॥
अथोद्धृतौ भावितिथिक्षयर्द्धि-
कालः क्रमाद्भाःसु धनुर्मुखेषु ।
तिथी१५न्द्र१४विश्वा१३र्य्यम१२रुद्र११काष्ठा१०-
गो९दिङ्१०महेशा११र्य्यम१२विश्व१३शक्राः१४ ॥१६॥

---

* तिथिनाड्यः १८।१६ भनाड्यः ११।२ योगनाड्यः १४।२० ।

तत्तत्फलं स्वेष्टतिथाहृणाद्यं कार्य्यं क्षयद्युगैरथ भक्षयद्युगैः ।
खसूर्य्य१२०भागोज्झितयुग्भमिष्टं स्फुटं भवेत्तच्चरकर्म्म वक्ष्ये ॥१७॥
सप्तोनिते ग्राह्यदिने दिनार्द्धं यस्यास्तदेवेष्टदिनेऽब्दतः स्यात् ।
तदन्तरं यद्दिनसप्तकोत्थं तद्याम्यसौम्यायनयोः क्रमेण ॥ १८ ॥

तिथ्यादिषु क्षेप्यमृणं विधेय-
मित्थं स्फुटं स्थूलमतप्रसिद्धम् ।
तिथ्यादिकं सूक्ष्ममितोऽपि कल्प्यं
पूर्व्वोक्तरीत्या मृदुतुङ्गबोधात् ॥ १९ ॥
स्याद्ग्राह्यतिथ्यादि यदीह सूक्ष्मं
स्थूलीकृतिस्तस्य विधातुमिष्टा ।
व्यस्ते तु तुङ्गान्तरपाक्षिकाख्ये
कार्य्ये फले तत्र पुनः प्रयासात् ॥ २० ॥
नागर्त्तवो६८ बाणदिवाकराश्च१२५
गोऽर्थेन्दवः१५९ षट्कनृपाः१६६ शरेन्द्राः१४५ ।
भुजङ्गनन्दाश्च९८ कलम्बरामाः३५
क्रमोत्क्रमादाद्यतिथेर्विनाड्यः ॥ २१ ॥
कार्य्या धनर्णान्यथ बाहुलिप्ताः
पूर्व्वोक्ततुङ्गान्तरकेन्द्रजाताः ।
पश्चार्द्धजास्तत्त्वयमै२२५र्विभक्ता
लब्धाः स्वखण्डास्तदनु क्रमोत्थाः ॥ २२ ॥
बृहस्पतेर्मान्द्यफलस्य लिप्ता
यास्ताः शरघ्नाद्विहृता विनाड्यः ।
ज्ञेयाः पराः पक्षदले पुनस्ता
हृताः क्रमादादितिथेस्त्रिचन्द्रैः१३ ॥ २३ ॥

तत्त्वै:[२]२५ कलम्बाग्निभि[३]३५ रर्थवेदै[४]४५-
द्व्यर्थै[५]५२र्नगार्थै:[६]५७ खरसै[७]६०र्विलोमम् ।
तथाष्टमीतः[८]६०।[९]५७।[१०]५२।[११]४५।[१२]३५।[१३]२५।[१४]१३।[१५]० खरसै६०र्विभक्ता
वामं खतुङ्गान्तरवद्द्युतोनाः ॥ २४ ॥

ग्राह्या इति स्युस्तिथयो भमेवं
तिथ्यन्तपूर्णं तद्गणखनाद्याः ।
विश्वां१३शहीनास्तिथिभान्तयोर्यत्
कालान्तरं यातमनागतं स्यात् ॥ २५ ॥

तद्घ्नं तिथिद्वन्द्वधनर्णकाला-
न्तरेण षष्ट्याप्तमितैष्यदृष्ट्या ।
न्यूनाधिकं कार्य्यमथर्क्षकेषु
ग्राह्येषु शोध्याः क्रमतो विनाड्यः ॥ २६ ॥

षड्बाहवः२६ षड्युगमा४६स्त्रिबाणा५३
रसाब्धयो४६ऽङ्गाश्विमिता२६ मृगादेः ।
मासेषु कर्क्यादिषु योजनीया
यथास्थिताः कार्म्मुकयुग्मयोस्तु ॥ २७ ॥

योगेऽत्र तिथ्युक्तफलान्यगां७श-
हीनानि कुर्य्यादिभ इवानुपातम् ।
ग्राह्येभ्य इष्टानि पुरोक्तवत् स्युः
स्थूलानि सूक्ष्मीकरणन्तु तेषाम् ॥ २८ ॥

इष्टोक्ततुङ्गान्तरपाश्चिकाभ्यां स्यादङ्गकानां धनहानिवास्यात् ।
भानान्तु कर्क्यादिमृगादिमासधनर्णता स्यादपि वैपरीत्यात् ॥२९॥

ग्राब्देष्टमध्ये त्वधिमासपात-
चेद्ग्राह्यमेवोत्तरमासि सर्व्वम् ।
रूपाद्रिरामा३७१स्तिथयोऽर्कवर्षे
यथान्ति पूर्त्तिं सह षोड़शांशाः ॥ ३० ॥

शराङ्गरामाः२६५ कुदिनानि दण्डाः
पञ्चेन्दवः१५ पक्षगुणा३२ विनाड्यः ।
निर्यान्ति भानोर्भगणे ततो यद्-
वारे यदृक्षं प्रविशेत्स तत्र ॥ ३१ ॥

पुनस्तदृक्षाभिगमे च वार एकः प्रदेयो घटिकाः पुरोक्ताः१५।३२ ।
ताः षष्टिदण्डाभ्यधिका यदि स्युर्वारावुभौ संक्रमणे तदिष्टे ॥३२॥

संक्रान्तितो यत्र दिने स्फुटार्को
यथा तथाब्दान्तरतद्दिने सः ।
लिप्ताभिरर्थेन्दुभि१५रष्टचन्द्र१८-
विलिप्तिकाभी रहितः स्फुटः स्यात् ॥ ३२ ॥

यद्राशिचारस्तिथि१५दण्डतोऽर्व्वाग्द्विराम३२सङ्ख्यैः पलकैर्युतेभ्यः ।
तन्मास्यभीष्टे दिन एकहीने प्राग्वर्षजात्स्पष्ट इनः पुरेव ॥ ३४ ॥

किन्त्वत्र याः प्रोज्झ्यतया निरुक्ता
लिप्तादय१५।१८स्ताः स्फुटसूर्य्यगत्या ।
हता विभक्ताः खरसैः६० स्फुटाः स्यु-
स्तदूनितः सूक्ष्म इनोऽब्दतः स्यात् ॥ ३५ ॥

ग्राह्या हरकौज्झित एष्यघस्रसूर्य्यैः स्फुटा भुक्तिरतोऽवशेषः ।
अत्येति दर्शं रविसक्रमश्चेत्तदाधिमासः सुधियावगम्यः ॥ ३६ ॥

भभुक्तनाड्योऽष्टशती८०० विनिघ्नाः साद्यन्तनक्षत्रघटीविभक्ताः ।
गतर्क्षसंख्याष्टशतीगुणाढ्या भवन्ति विस्पष्टसुधांशुलिप्ताः ॥ ३७ ॥

सहस्रनिघ्नाभ्रगजाष्टपक्षाः२८८००० साद्यन्तनक्षत्रपलैर्विभक्ताः ।
फलं विधोर्भुक्तिरनेकवर्षयातैष्यतिथ्यादि विदन्ति विज्ञाः ॥ ३८ ॥
अथेन्दुसूर्य्यग्रहसम्भवाय चान्द्रार्कमानावगतेरहानि ।
आनीय वारैः परिशोधितानि स्वाभीष्टपर्व्वानुगतानि तेभ्यः ॥३९॥

पातं स्वगत्या३।१०।४८ परिकल्प्य पाता-
त्षड्भार्द्धतो वाग्निकु१३भागमध्ये ।
पश्चात्तजेऽर्के स्थित एव चन्द्र-
ग्रहो भवेत्तत्क्रम उक्तपूर्व्वः ॥ ४० ॥

दर्शान्तकाले क्रमतस्तु पूर्व्वपश्चान्नतत्र्यंशविहीनयुक्ते ।
तात्कालिकर्क्षोदितगिषोस्त्रिभोनतनूनतज्याभ्ररसां६०शकस्य ॥ ४१ ॥
दिग्भेदसाम्योत्थवियोगयोगसिद्धस्फुटेषौ रद३२लिप्तिकोने ।
स्यात्सम्भवस्तिग्मरुचिग्रहस्य ग्रासादि सर्व्वं गदितं पुरस्तात् ॥ ४२ ॥
पर्व्वान्तमर्कक्रमणाह्निनाद्यं यावत्प्रमाणं भवतीष्टवर्षे ।
ग्राह्याब्दसंक्रान्तित एव तावत्कालोत्थभागैः स्फुटता रवीन्द्वोः ॥४३॥

शरेन्दुभि१५र्बाणनृपैः१६५ खनाग-
चन्द्रैः१८० शराङ्केन्दुभि१९५रभ्रदेवैः३३० ।
शराब्धिरामैः३४५ खरसाग्नयाशै३६०-
रेतावतीभिस्तिथिभिः कदाचित् ॥ ४४ ॥

ग्रहात्पुनः प्रग्रहणान्तरं स्यात्ततस्ततस्ताभिरिति क्रमेण ।
पातार्कशीतांश्वधिमासविद्भिर्ज्ञेया ग्रहाद्या दशवत्सरान्तम् ॥ ४५ ॥
ताराग्रहाणां समतैकवर्षे न स्याद्यतस्तद्दृक्पञ्जिकानाम् ।
कार्य्यौ बुधैः सङ्ग्रह एवमन्यकार्य्याणि सिद्धान्त्यपि साधु ताभ्यः॥४६॥
सौरेण मानेन रदा३२ब्दतः प्राग्यथा कुजः सोऽपि तथेष्टवर्षे ।
चक्रे खनागेन्दु१८०कलाभिराद्य एकादिराश्यन्तरितस्तु सूर्य्यात्॥४७॥

युतः कलाभिर्दशताडिताभिः
कुबाहुभि२१०र्भै२७० रसवीतिहोत्रैः३६० ।
गजाब्धिभि४८०र्वह्निरसैः६३० कुनागै८१०-
स्ताभिः पुनः कार्मुकपञ्चकस्थे ॥ ४८ ॥
तस्मिन् क्रमात्पञ्चदशा१५ष्ट८पञ्च५-
मातङ्ग८तिथ्यं१५शसमन्विताभिः ।
युग्मादिपञ्चर्क्षगते तदंश१५।८।५।८।१५-
हीनाभिरेवं स्फुटतामुपैति ॥ ४९ ॥

विघ्ना१३ब्दतः प्राक् शशिजो यथाभूत्तथेष्टवर्षेऽत्र कियान् विशेषः ।
गत्यन्तरेण स्फुटसौम्यमध्यभान्वोर्वसु८घ्नाग्नि३हृतेन चैषः ॥ ५० ॥
युतोऽन्वितः सूर्यगतेः५९।८ स्वभुक्तिर्न्यूनाधिकत्वे स तु वक्रगश्चेत् ।
तदात्मभास्वद्गतियोगनाग८घाताग्नि३भागेन युतः स्फुटः स्यात्॥५१॥

बृहस्पतिर्द्वादशवर्षतः प्राग्-
यथा तथा स्वार्ककलान्तरस्य ।
खार्कांश१२०युग्भिः खकुट्टक२१०कलाभि-
स्ताभिः पुनः कर्कटपञ्चकस्थे ॥ ५२ ॥
तस्मिन् सुधान्धो३३घन१७रुद्र११मेघ१७-
देवां३३शहीनाभिरिहैव नक्रात् ।
भपञ्चकस्थे तु तदंश३३।१७।११।१७।३३युग्भिः
समन्वितः सन् स्फुटतां प्रयाति ॥ ५३ ॥

वर्षाष्टकात्प्राग्भृगुजो यथैवमिष्टाब्दके सौरदिने च तत्र ।
स्फुटस्वभुक्त्यर्य्यममध्यभुक्त्यन्तरेण बाणघ्नभुजो२हृतेन ॥ ५४ ॥
ऊनो युतो भानुगतेः स्वभुक्तौ न्यूनाधिकायां क्रमतोऽनृजुश्चेत् ॥
युत्या शर५घ्नाक्षि२हृतस्वभास्वद्गत्योस्तदोनः स्फुटतां स गच्छेत् ॥ ५५ ॥

शनिः खरामा३०ब्दपुरो यथासीत्
किञ्चाल्पसूर्य्यान्तरलिप्तिकानाम् ।
खेनां१२०शयुग्भिः शरवाजिराम३७५-
लिप्ताभिराभिः पुनरत्र मेषात् ॥ ५६ ॥
पञ्चर्क्षसंस्थे नख२०दिक्१०स्वरा७शा१०-
नखां२०शसंयोगवतीभिरस्मिन् ।
तुलादिपञ्चर्क्षगते तदंश२०।१०।७।१०।२०-
हीनाभिराढ्यः स्फुटभावमेति ॥ ५७ ॥

अत्रारजीवार्कभुवां यदुक्तं सूर्य्यात् खलिप्तान्तरमेतदेव ।
न राशिषट्कादधिकं कदाचित्ततः परं चन्द्रदले धनं स्यात् ॥ ५८ ॥
अहर्गणः खाग्निकृतेन्दु१४३भागयुक्तो नवेन्द्वा१९प्त हृतः फलांशैः ।
ऊनो युतो ग्राह्यदिनस्य राहुरेष्ये गतेऽभीष्टदिने स्फुटः स्यात् ॥ ५९ ॥
दिनोच्चयः खाभ्रकृताब्धि४४०भागयुक्तो नवा९८मस्व फलैर्लवाद्यैः ।
युतोनितो ग्राह्यदिनेन्दुमन्द एष्ये गतेऽभीष्टदिने स्फुटः स्यात् ॥६०॥

किंवा नवाश्वै७९दिननाथवर्षै-
र्भौमश्चतुःषष्टि६४कलाधिकः स्यात् ।
बुधोऽङ्गवेदै४६र्विधुदिक्१०१कलोनो
गुरुस्त्रिनागैः८३ कृतसप्त७४हीनः ॥ ६१ ॥
शुक्रस्त्रिसिद्धै२४३स्त्रिचतु४३ष्कलाढ्यः
शनिर्नवार्थै५९र्नगशायकाढ्यः५७ ।
राहुस्त्रिनन्दै९३र्नख२०लिप्तिकोनः
शीघ्रौ ज्ञशुक्रावितरेऽत्र मध्याः ॥ ६२ ॥

तिथ्यादिषूक्ताः प्रतिसौरमासं या या हृतिः स्वर्णविनाडिकास्ताः ।
ग्राह्येऽष्टघस्रार्कयुगान्तरार्द्धयुक्तेष्टघस्राप्यममासतः स्युः ॥ ६३ ॥

ताराग्रहेष्वंशभिदेन्दुभान्वोः कलाप्रभेदस्तिथियोगभेषु ।
पलप्रभेदोऽत्र बुधैर्न गण्यः कृतिर्मदीया यदसावपूर्व्वा ॥ ६४ ॥
स्नानादियोगांश्चिरकालतोऽस्या भविष्यतो ज्ञातुमलं नरः स्यात् ।
कृपाप्यतः कौतुकपञ्जिकेयं महोपकाराय सतां सदास्ताम् ॥ ६५ ॥

इति कौतुकपञ्जिका समाप्ता ।

अथानुक्रमः ।

सलक्षणोदाहरणं वितत्य सिद्धान्तमध्येऽत्र कुतूहलाय ।
उद्देशतो भूय उदीर्य्यतेऽसौ यतोऽतिवेगाद्विषयग्रहः स्यात् ॥ ६६ ॥
प्रोक्तं प्रकाशे प्रथमे प्रमाणं त्रुट्यादिकालस्य लयान्तिमस्य ।
सिद्धान्तसल्लक्षणसृष्टिकालसद्धाङ्कचक्राणि च सप्रशंसम् ॥ ६७ ॥
संख्याद्वितीये भगणोत्करस्य कल्पाब्दमासद्युमितिर्निरुक्ता ।
नभश्चराणां दिनभुक्तिलिप्तास्तत्साधनं पर्य्ययपक्षक्लृप्तिः ॥ ६८ ॥
उक्तास्तृतीये कुदिनौघ इष्टो दिनाब्दमासाधिपमध्यखेटाः ।
जैवास्तथाब्दा द्विविधा ग्रहादिध्रुवाद्युपपातमृदूच्चहाराः ॥ ६९ ॥
तुर्य्ये महीवेष्टनदेशनाड़ीवारप्रवृत्तीष्टधनर्णलिप्ताः ।
भुजान्तराख्या उदयान्तराख्याश्चरोद्भवाः सत्पदकं ध्रुवादेः ॥ ७० ॥
इत्थं चतुर्भिर्गदितः प्रकाशैर्मध्याधिकारः सुरवर्त्मगानाम् ।
अथ प्रकाशद्वितयेन तेषामुद्दिश्यते विस्फुटताधिकारः ॥ ७१ ॥

इति मध्यमाधिकारः ।

पश्चात्पुरः खेटगतिः प्रमाणं तदुच्चपातोत्थपृथग्गतित्वम् ।
ज्या पञ्चमे दोःफलभुक्तिखण्डाः परिध्युपात्तास्तिथिभादिसर्व्वः ॥ ७२ ॥
षष्ठेऽर्कचन्द्रर्क्षजसूक्ष्मपञ्जीतिथ्यादिसन्धिः प्रतिमण्डलाद्याः ।
चलांशकाः क्रान्तिमहीद्युजीवाश्चराणि लग्ना विविधाश्च देशाः ॥ ७३ ॥

इति स्फुटाधिकारः ।

दिग्भूमिशुद्धिर्भुजकोटिकर्णलम्बाक्षकाग्राः सममण्डलाद्याः ।
दिग्देशकालस्फुटसूर्य्यबोधो भा सप्तमे कोणभवः करण्याः ॥ ७४ ॥
अथाष्टमे सूर्य्यविधुद्युमाभामानश्रुतीषु स्थितिमर्द्धकालैः ।
चन्द्रग्रहोन्नतिर्वलने सयुक्ती चान्द्रं दिनं ग्रासजवर्णभेदाः ॥ ७५ ॥
युक्तिर्नतेर्वित्रिभलग्नशङ्कोर्द्विधोदितं लम्बनमिन्दुभान्वोः ।
नतिस्तमोमानभिदा नरोत्था ग्रहः खरांशोर्नवमे किलेति ॥ ७६ ॥
कालोन्नतेर्मानभिदाथ दृक्त्रयं सरण्या सवशात् समच्चः ।
खेखस्थले छेदकनामधेयो ग्रहस्य सिद्धो दशमप्रकाशे ॥ ७७ ॥
एकादशे खेचरतुल्यतादौ दृक्कर्म्मयुग्मस्फुटदिक्कलम्बैः ।
द्युचद्युतिर्बिम्बमितेर्भिदोक्ता युद्धप्रभेदा नलकादिसिद्धिः ॥ ७८ ॥
भानां द्युतिर्द्वादशके खगेन्द्रैर्ध्रुवाः शराश्चाकृतयो भसंख्याः ।
तद्बिम्बमानानि च योगताराः सप्तर्ष्यगस्त्यप्रमुखाः प्रदिष्टाः ॥ ७९ ॥
त्रयोदशे प्राक्परदिग्ग्रहर्क्षसमुद्गमास्तद्गमने निरुक्ते ।
वेत्रांशकालांशकचक्रभागैर्भास्वन्निशेशास्फुजितां प्रकाशाः ॥ ८० ॥
चतुर्दशे सूक्ष्मरवीन्दुमध्यकालांशतश्चन्द्रसमुद्गमास्तौ ।
चन्द्रक्षयर्द्धोः परिलेख इन्दोः शृङ्गोन्नतिः सा बुधशुक्रयोश्च ॥ ८१ ॥
पातो महान् पञ्चदशे निरुक्तो द्विरूप इत्थं नवभिः प्रकाशैः ।
त्रिप्रश्ननामाधिकृतिः समाप्ता पूर्व्वं नभःसङ्गणिताख्यमर्द्धम् ॥ ८२ ॥

इति त्रिप्रश्नाधिकारः ।

इति पूर्व्वार्द्धोद्देशः ।

अथोदिताः षोडशकेऽनुयोगाः स्थिरा चला वा क्षितिरित्यनेकैः ।
मतैः स्वसन्देहमुदस्तुमन्यकार्य्याण्यवैतुं सह वासनाभिः ॥ ८३ ॥
प्रत्युक्तयः सप्तदशे निरुक्ता बौद्धादिनानामतखण्डनोत्थाः ।
भ्रान्तिर्विधोः सग्रहभास्वतश्च खान्तर्भुवः स्थानमवादियुक्त्या ॥ ८४ ॥

अष्टादशे दृष्टिरथ स्वरूपाख्यर्कादिकानां गिरितुङ्गतोक्तिः ।
संस्थानमानानि भुवः सहाब्धेः सयुक्तिकच्छेदफलव्रजोक्तिः ॥ ८५ ॥
एकोनविंशे ग्रहभाभ्रकक्षा युक्तिः प्रमाणं श्रुतिमण्डलानाम् ।
वर्षेशमासेशदिनेशहोराधिपक्रमो दृष्टिकरप्रसाराः ॥ ८६ ॥
विंशे द्विधा गोलकयन्त्रक्लृप्तिर्गोलार्द्धचक्रप्रभृतिप्रभेदैः ।
कालस्य राश्यादिमितेश्च सिद्धिः स्वयंवहत्वौपयिकप्रकारः ॥ ८७ ॥
गोलेऽनुभूतिर्गदितैकविंशे देवादिमानस्य तनोः स्फुटादेः ।
विकल्पचक्राण्यृतवोऽब्धिसिद्धाः स्ववासनाभिर्घनमूलकर्म्म ॥ ८८ ॥

इति गोलाधिकारः ।

षड्भिः प्रकाशैरिति संगृहीतो गोलाधिकारस्त्रिभिरुच्यतेऽथ ।
कालः सहार्थाः किल वत्सराद्या द्वाविंशके मानभिदार्कचाराः ॥८९॥
प्रोक्ता त्रयोविंशतमे स्तवालिः कालात्मनः कालनगेन्द्रभर्त्तुः ।
सवेश्मनः सावरणस्य पारावारादिसाम्येन च दोषहत्यै ॥ ९० ॥
अन्त्ये चतुर्व्विंश इह स्फुटोऽभूदनुक्रमः कौतुकपञ्जिकादिः ।
कालाधिकारोऽयमगात् परार्द्धं गोलादिशब्दं गणितं यदाहुः ॥९१॥

इति कालाधिकारः । इत्युत्तरार्द्धोद्देशः ।

केचित्पठिष्यन्त्युपसंहृतिं तदुद्देशतो भूरिपदार्थजातम् ।
मयोदितं राजकुमारकादेर्वेदाङ्गपाठोत्थफलाय सौख्यात् ॥ ९२ ॥
दिग्देशकालावगतिः प्रकाशात् स्यात्सप्तमादेव तथापि धीराः ।
न लोकसिद्धस्थलबोधहीना ग्रहादि संदर्शयितुं यदीशाः ॥ ९३ ॥

प्रधाननगरेष्वतो धरणिमध्यरेखा पुरः
परान्तरविनाड़िकाः पलकलाश्च वच्मि क्रमात् ।
यतो विविधदेशजां वदितुमेकदेशस्थितः
प्रभुर्भवति पञ्जिकां चतुरिमाश्रयः साधकः ॥ ९४ ॥

भूमध्यरेखानुभवप्रसिद्धा अक्षांशलिप्ताः किल जूनदुर्गे(१) ।
तदुत्तरे मोरपुरे(२)ऽथ भञ्जापुरे(३) ततो रामगड़े(४) ततश्च ॥ ८५ ॥
सौम्ये जलाबादपुरे(५) क्रमेण
कृताङ्कसूर्य्याः१२९४ कुनगाग्निचन्द्राः१३७१ ।
नागेक्षणेन्द्रा१४२८ द्विकृताङ्कचन्द्राः१६४२
शिलोच्चयाङ्गाम्बरबाहवश्च२०६७ ॥ ८६ ॥
आर्केन्द्रमेतत्समसूत्रनिष्ठभूमौ न देशान्तरसंस्कृतिः स्यात् ।
प्राग्भूविभागे खलु गुर्ज्जराष्ट्रे(६) देशान्तरं बाण५मिता विनाड्यः॥८७॥
तत्राक्षलिप्ताः शरदृक्त्रिचन्द्रा१३२५
उनापुरे(७)ऽक्षाः७ शरबाणसूर्य्याः१२५५ ।
श्रीनर्म्मदातोयधिसङ्गमे(८)ऽक्षि-
पक्षाः२२ खशून्यज्वलनौषधीशाः१३०० ॥ ९८ ॥
बोम्बायिपुर्य्यां(९) त्रिभुजा२३ नगाग्नी-
शा११३७थोदयाख्यानपुरे(१०) खरामाः३० ।
खाद्र्यब्धिचन्द्रा१४७० अथ षट्करामा२६
लाहोरके(११) पूर्णखनन्दचन्द्राः१९०० ॥ ९९ ॥
काश्मीरजश्रीनगरे(१२) त्रिवेदा४३
रामाशुगव्योमविलोचनानि२०५३ ।
जम्ब्वां(१३) त्रिवेदा४३ द्विशराङ्कचन्द्रा१९५२
वस्वब्धयः४८ खाक्षिनृपा१६२० जयादौ ॥ १०० ॥
पुर्य्यु(१४)ज्जयिन्यां(१५) खशराः५० खनन्द-
विश्वे१३९०ऽथ विन्ध्याचलमध्यदेशे(१६) ।
द्व्यर्थाः५२ खबाणाग्निभुवः१३५० कुरूणां
क्षेत्रे(१७) रसार्थाः५६ खनवाद्रिचन्द्राः१७९० ॥ १०१ ॥

श्रीरङ्गके(१८) द्व्यङ्गमिता६२ द्विवेदा-
द्र्यो७४२ऽर्थषट्का६५ नगरामशैलाः७३७ ।
कर्णाटके(१९)ऽथो गजसाह्वये(२०)ऽङ्ग-
षट्का६६ नगक्ष्माद्रिभुवः१७१७ प्रदिष्टाः ॥ १०२ ॥

कुमारिकानामनि चान्तरीपे(२१)
गजर्त्तवो६८ नागभुजाब्धि४२८संख्याः ।
भूपालके(२२) नन्दरसाः६९ खखेन्द्रा१४००
व्रजे(२३) खशैलाः७० खरसाङ्कचन्द्राः१६६० ॥ १०३ ॥

आग्रापुरे(२४) वेदनगाः७४ कुराम-
भूपाश्च१६२१ काञ्च्यां(२५) त्रिगजाः८३ खषट्षट्६६० ।
श्रीवेङ्कटे(२६) खाष्ट८० नभोऽष्टशैला७८०
रामेश्वरे(२७)ऽगाष्ट८७ रसार्थबाणाः५५६ ॥ १०४ ॥

तञ्जाविड़े(२८)ऽद्र्यष्ट८७ खषट्कषट्का६६०
बुन्देलके(२९)ऽगाष्ट८७ खखार्थचन्द्राः१५०० ।
श्रीनर्म्मदासौम्यतटे जबल-
पुरे(३०) तथा भारतवर्षमध्ये ॥ १०५ ॥

त्र्यङ्काः९३ शराङ्काग्निभुवो१३९५ऽथ चेन्न-
पुर्य्यां(३१) नगाङ्काः९७ कृतनागशैलाः७८४ ।
कृष्णाब्धिसङ्गे(३२) द्विदिशः१०२ खबाण-
नन्दा९५० अथो रायपुरे(३३) नवाशाः१०९ ॥ १०६ ॥

गोऽङ्गारुणा१२६९ राजमहेन्द्रपुर्य्यां(३४)
रुद्रेन्दवो१११ द्विद्विदिशः१०२२ प्रयागे(३५) ।
चन्द्रेश्वराः१११ खाग्निशरेन्दव१५२०ऽथा-
योध्यापुरे(३६) रत्नपुरे(३७)ऽर्थरुद्राः११६ ॥ १०७ ॥

शराभ्रभूपा१६०५श्चकलाः षडङ्ग-
विश्वे१३६६ऽथ गोदावरिसिन्धुसङ्गे(३८) ।
घनेन्दवो११७ऽङ्काभ्रदिशो१००६ऽथ काश्यां(३९)
सिद्धेन्दवो१२४ऽद्रीन्दुशरेन्दु१५१७संख्याः ॥ १०८ ॥

अथोदिता रायगड़े(४०)ऽद्रिसूर्य्या१२७
नागाभ्रविश्वे१३०८ऽथ विशाखपुर्य्याम्(४१) ।
नगारुणा१२७ द्व्यङ्कदिशः१०६२ समस्त-
पुरे(४२) खविश्वे१३० त्रिगजाश्विचन्द्राः१२८३ ॥ १०९ ॥

श्रीकाकुले(४३) रामगुणौषधीशाः१३३
समुद्रनन्दाम्बरशीतभासः१०९४ ।
नेपालमध्ये(४४) कृतरामरूपा१३४-
श्चाष्टाष्टभूपा१६८८श्च महेन्द्रशैले(४५) ॥ ११० ॥

गोविश्वके१३९ खेन्द्रभुवो११४० गयायां(४६)
गुणाब्धिचन्द्रा१४३ वसुवारणेन्द्राः१४८८ ।
बरम्पुरे(४७) त्र्यब्धिभुवो१४३ऽब्धिबाण-
रुद्राश्च११५४ गञ्जाम(४८) इषुश्रुतिक्ष्माः१४५ ॥ १११ ॥

वेदाङ्गरुद्रा११६४ अथ माधवस्य
क्षेत्रे(४९) रसेन्द्रा१४६ द्विभुजाश्विचन्द्राः१२२२ ।
नीलाचले(५०) द्वितिथयो१५२ऽष्टनाग-
रुद्रा११८८स्तथैकाम्रवने(५१) त्रिनाद्यः१५२ ॥ ११२ ॥

इन्द्रार्कलिप्ताः१२१४ कटके(५२) तु सार्द्ध-
द्विबाणचन्द्रा१५२॥० वसुदृग्द्विचन्द्राः१२२८ ।
महानदीसागरसङ्गमे(५३) भू-
रसेन्दवो१६१ विश्वभुजेन्दवश्च१२१३ ॥ ११३ ॥

बालेश्वरे(५४) रूपनृपा१६१ द्विनन्द-
पक्षेन्दव१२९२श्चैव जलेश्वरे(५५) तु ।
शराङ्गरूपाणि१६५ च विश्वविश्वे१३१३
स्युर्मेदिनीपु(५६)र्य्यगषड्धरण्यः१६७ ॥ ११४ ॥
खार्थाग्निचन्द्रा१३५० अथ वर्द्धमाने(५७)
द्व्यगेन्दवः१७२ खाङ्कगुणेन्दवश्च१३९० ।
गङ्गाब्धिसङ्गे(५८)ऽर्थघनाः१७५ शराक्षि-
विश्वे१३२५ नवद्वीपपुरे(५९)ऽद्र्यगक्ष्माः१७७ ॥ ११५ ॥
कृताम्बरेन्द्राश्च१४०४ कलीकातायां(६०)
कुभृद्घना१७७ वेदशराग्निचन्द्राः१३५४ ।
वङ्गस्थरङ्गाख्यपुरे(६१)ऽङ्कनाग-
चन्द्रा१८६ रसाम्भोधिशरेन्दुसंख्याः१५४६ ॥ ११६ ॥
ढक्कापुरे(६२) नन्दनवेन्दवश्च१९९
शरेक्षणाम्भःपतिराश्विनाथाः१४२५ ।
श्रीहट्टके(६३) विश्वभुजाः२१३ शराङ्क-
वेदेन्दवो१४९५ लोहितनामनद्याम्(६४) ॥ ११७ ॥
द्व्यब्धीक्षणा२४२न्यब्धिशराङ्गचन्द्रा१६५४ इतीरिता भारतपूर्व्वभागे।
कथ्यन्त एतत्परभागदेशा भूमध्यरेखान्तिकतः क्रमेण ॥ ११८ ॥
रणे(६५) भुजौ२ खाम्बुधिवेदचन्द्राः१४४०
कच्छे(६६)ऽद्रयः७ सर्पगजाग्निचन्द्राः१३८८ ।
सिन्धौ(६७) क्षितीन्द्राः१४ खरसार्थचन्द्राः१५६०
श्रीद्वारकाकाबुलयोः(६८।६९) शरक्ष्माः१५ ॥ ११९ ॥
गजामरक्ष्माः१३३८ स्वररसखाश्च२०६७
स्थानाफगान्यां(७०) नवभूमयः१९ स्युः ।

शराद्रिनागक्षितधी१८७५ऽयं सिन्धु-
नद्यब्धिसङ्गे(७१)ऽब्धिभुजा२४ घनेन्द्राः१४१७ ॥ १२० ॥
अथाद्रिरामाः३७ पुरि देह्लजङ्ग्यां(७२)
भुजङ्गमातङ्गनभोभुजाश्च२०८८ ।
प्राग्भारतस्याप्यथ वर्म्मदेश-
मध्ये(७३)ऽद्रितत्त्वानि२५७ गुणाभ्ररुद्राः११०३ ॥ १२१ ॥
ऐरावतीसागरसङ्गमोऽस्य याम्येऽष्टवेदाङ्क९४८मिताश्चलिप्ते ।
पारस्यके(७४) भारतपश्चिमस्थे
नगार्थचन्द्रा१५७ नखनन्दचन्द्राः१९२० ॥ १२२ ॥
आरब्यमध्ये(७५)ऽद्रिगुणेक्षणानि२३७
दिग्वार्धिका१४१०श्चाथ तुरुष्कभूमौ(७६) ।
नगाग्निरामाः३३७ खनवेन्दुपक्षा२१९०
याम्यस्थलङ्कापुरि(७७) खाभ्रचन्द्राः१०० ॥ १२३ ॥
प्राच्या विघ्नोऽष्टगजाब्धि४८८लिप्ता वर्षोत्तरे हिन्दुकुशाद्रिमध्ये(७८)।
नृपाः१६ शरार्काक्षिमिता२१२५ हिमाद्रेः
परेऽष्टरामाः३८ कृतदिग्दृशो२१०४ऽपि(७९) ॥ १२४ ॥
पूर्व्वे(८०)ऽग्निसिद्धा२४३ नगनागभूपा१६८७
मध्ये(८१) शशीन्द्रा१४१स्त्रिगुणाद्रिचन्द्राः१७३३ ।
शृङ्गस्य गौर्य्यादिकशङ्करस्या(८२)-
ष्टाब्ध्यग्निगोचन्द्र१९३४८करोच्छ्रयस्य ॥ १२५ ॥
खार्थेन्दवः१५० खाभ्रघना१७०० नगेश-
सौम्ये ह्रदे मानसनामधेये(८३) ।
षट्खेन्दवः१०६ खाम्बुधिनागचन्द्राः१८४०
घमाङ्गषड्जिष्णु१४६६७करोन्नतेस्तु ॥ १२६ ॥

कैलासशैलस्य(८४) दिगिन्दवो१०ऽर्थ-
शैलाष्टचन्द्रा१८७५श्च तदुत्तरस्थे ।
देशे पुरस्तिब्बतनाम्नि(८५)राम-
गोऽङ्गाः१९३ खबाणाङ्कभुवो१९५०ऽथ चीने(८६) ॥१२७॥
त्रिनन्दरामाः३९३ खरसाष्टचन्द्रा१८६०-
स्तद्राजधान्यां(८७) गुणनन्दवेदाः४९३ ।
शून्याभ्रसिद्धा२४०० अथ रुष्यमध्ये(८८)
त्र्यङ्काब्धयः४९३ पूर्णनवाङ्करामाः३९९० ॥ १२८ ॥
इत्याशियानाममहीमहांशस्थानानि पश्चादियुरोपनाम्नः ।
भागस्य मध्ये(८९) परदिग्विघव्यः
सप्ताभ्रबाणाः५०७ खष्टतिभि२१८०लिप्ताः ॥ १२९ ॥
तत्पश्चिमे द्वीपमुदग्वदन्तरींलण्डनामास्ति तदन्तरस्थे ।
पुरोत्तमे लण्डननाम्न्य(९०)गाभ्र-
शैलाः७०७ खनन्दाभ्रगुणाः३०९० प्रदिष्टाः ॥ १३० ॥
तद्याम्यगे खण्ड इहाफ्रिकाख्ये(९१)
सप्ताभ्रबाणांश्च५०७ निरक्षमस्तः ।
त्रयः कुभागा उदिता हि जम्बूद्वीपस्य याम्यांशतया प्रसिद्धाः ॥१३१॥
आमेरिकाख्यो द्विविधोत्तरास्य सौम्यांश(९२)उक्तापरदिग्विघव्यः ।
तन्मध्य एवाद्रिखसप्तचन्द्राः१७०७
खखाभ्ररामा३००० अथ दक्षिणस्याः ॥ १३२ ॥
मध्ये(९३)ऽद्रिनागार्चिभुवो१२८७ऽक्षलिप्ताः
सौम्याः खदन्तेन्दव१३२० आसुरांशे ।
अस्त्रेलियान्त(९४)स्त्रिभुजाङ्गसंख्याः६२३
प्राच्याः खखार्थक्षितयश्च१५०० सौम्याः ॥ १३३ ॥

अथार्कसूक्ष्म[illegible]ानुभूत्यै
ससंनिकृष्टेषु पुरेषु भूयः ।
लिखामि ताः सप्तगुणौघधीशा१३७
बीडे(९५) खबाणेक्षणशीतभासः१२५० ॥ १३४ ॥
मञ्जूषिकायां(९६) खकृतेन्दवो१४०ऽर्थ-
विश्वेन्दवो११३५ऽथाणुगुले(९७) कृतेन्द्राः१४४ ।
सप्ताब्धिसूर्य्या१२४७ नवदुर्गके(९८)ऽर्थ-
शक्रा१४५ नगाश्वेक्षणरूपसंख्याः१२७७ ॥ १३५ ॥
खण्डादिसत्पत्तनके(९९)ऽङ्गशक्रा१४६
नृपाक्षिचन्द्रा१२१६ अथ तालचेरे(१००) ।
ऋतुजिष्णवो१४६ऽष्टेष्वरुणाश्च१२५८ पारि-
द्वीपे(१०१)ऽद्रिशक्रा१४७ विधुनागरुद्राः११८१ ॥ १३६ ॥
पुरे रणाद्ये(१०२)ऽद्रिकृतेन्दवो१४७ऽर्थ-
शून्याक्षिचन्द्रा१२०५ बृहदम्बिकायाम्(१०३) ।
शैलाब्धिचन्द्राः१४७ कृतनेत्रसूर्य्या१२२४
ढेङ्कादिनाले(१०४) खशरेन्दवः१५० स्युः ॥ १३७ ॥
वसुत्रिसूर्य्याः१२३८ शरतुवस्तु१५५
कोणार्के(१०५) एवाग्निनवेश्वराश्च११९३ ।
सुनिस्थिता याजपुरे(१०६)ऽष्टबाण-
चन्द्रा१५८ महीबाणभुजाधरित्र्यः१२५१ ॥ १३८ ॥
मयूरभञ्जे(१०७)ऽष्टशरेन्दवो१५८ऽर्क-
रामेन्दवो१३१२ नीलगिरौ(१०८) खभूपाः१६० ।
नगाष्टसूर्य्या१२८७ इति सत्सुखार्थ-
मष्टाधिकस्थानशतं१०८ मयोक्तम् ॥ १३९ ॥

अन्वेषितस्थलयुगान्तरमार्गमान-
मानेतुमक्षकलिकाविवरं विनिघ्नम् ।
भूवेष्टनेन महता५०२६ हृतमृक्षचक्र-
लिप्ताचयेन२१६०० फलमात्महतं पृथक्स्थम् ॥ १४० ॥
प्राक्प्रत्यगन्तरहृतक्षितिवृत्त५०२६मभ्र-
खाङ्गाग्नि३६००हृद्धिपदमध्यजयाहतं तत् ।
लम्बज्यया त्रिगुण३४३८हृत् स्वहतं द्विवर्ग-
योगात् पदं हि पदयो ऋजुमध्यमार्गः ॥ १४१ ॥

ज्योतिस्तत्त्वविदो वदन्ति परमक्रान्तेंश्चिरानेहसा
यत्किञ्चित्तनुतो ऋते परमविक्षेपस्य खेटावलेः ।
याम्योदगध्रुवपश्चिमभ्रमपथस्यावानुभूत्यागम-
प्रामाण्येन विना व्यलेखि न मया तत्तत्कलानिर्णयः ॥१४२॥
मूर्द्धोर्द्ध्वाम्बरसूत्रगो दिनमणिः स्याद्यद्दिनार्द्धे तदा
सद्योर्द्धस्थितरन्ध्रगक्षितिपतत्तद्भानुनिष्ठाज्जलात् ।
उद्गच्छत्किरणस्य रन्ध्रसमतां दृष्ट्वा तदा खार्कजा
क्रान्तिः स्यात्तयोदितैवमखिलं देशेषु वेध्यं बुधैः ॥ १४३ ॥
दृष्ट्वा दृष्टिविरुद्धमन्यगणितं नाशाय धर्मस्य वा
भ्रान्तिं तथ्यतया भुवः प्रवदतां वाग्भ[illegible]भङ्गाय वा ।
विद्वत्संसदि मत्प्रलापजपरीहासप्रका[illegible] वा
येनाहं हृदि तिष्ठता मुखरितः कस्मैचिदस्मै नमः ॥ १[illegible]
आसीत्पार्शीन्द्रकाशीश्वरमिहिरतनूजन्मराजाधिराज-
स्वाराट्प्रत्यर्थिपृथ्वीधवदहनपृषत्कसमात्रोत्थगात्रः ।
प्राप्तश्रीमर्द्दराजभ्रमरवरपदः सत्तमात्सार्वभौमा-
द्धीमान् वैरागिनामा स्फुटतममहिमाखण्डलः खण्डमुख्याः ॥१४५॥

तस्मात्कृष्णात्सत्त्वादजनि शुभजनिर्गङ्गभक्त्यावगाही
भीमानुस्वारकोशार्जितपरविजयः श्रीलनीलाद्रिसिंहः ।
तत्सूनुः शुभ्रभानुद्युमणिपरिभवोद्दामकीर्त्तिप्रतापः
प्राप प्राक् श्रीनृसिंहः पदमजितपदध्यानलीनस्त्रितापः ॥ १४६ ॥

यस्माधिश्रीवर्धिलाब्धप्रथमउदधिप्रोद्यदापूर्णचन्द्रा-
ज्ज्योतिःसन्धानसिन्धुस्तत उदयमगच्छद्बुधः श्यामबन्धुः ।
स्वान्तोद्यद्दीनबन्धुप्रपदनखमहःसंहृतांहस्तमिस्रः
श्रीमान् सिंहान्तनामोत्कलनिलयभरद्वाजगोत्राब्जमित्रः ॥ १४७ ॥

तज्जः श्रीमधुसूदनाभिधमहापात्राद्गुरोर्दीक्षितो
विद्यासु प्रततस्वरायसुपदादानन्दमिश्राहृतः ।
सोऽहं [illegible]गिरीशमाधवपदावासः स्वधर्म्माधमः
सिद्धान्तदर्पणं चकार यदिदं स्यात्कृष्णपादार्पितम् ॥ १४८ ॥

याताङ्गाग्निनवाब्धि४९३६वत्सरकलौ जन्माभवन्मामकं
वेदोपभुज२४वर्षकेण च मया ग्रन्थोऽयमाविष्कृतः ।
सन्तः सन्ततमत्र सन्तु गणिते सन्तोषवन्तो गुणं
गृह्णन्तः परिहृत्य दोषगणनां नास्ते* न यत्सर्व्ववित् ॥ १४९ ॥

सिद्धान्तानुदिता अपीह गदिता ये ये विशेषा मया
ते हेया नवकल्पना इति मतिर्माभूत्प्रभूणां क्वचित् ।
दृक्सिद्ध्यै किल लल्लभास्करशतानन्दार्य्यभट्टादिभिः
स्वग्रन्थेषु यदीरिता बहुमता ईदृग्विशेषा नवाः ॥ १५० ॥

सिद्धान्ताश्रयणं विनापि गगनाभोगो नभोगोडुभिः
सार्द्धं वासमया यदीयहृदयेऽन्त्यत्तदाविष्कृते ।

---

* ना पुरुषः ।

सिद्धान्तप्रमुखे प्रकाशनवकस्पष्टाधिकारद्वयी
युक्तं दर्पणकेऽत्र गोलगणितस्यात्युत्तरार्धं गतम् ॥ १५१ ॥

अपिच ।

इति श्रीसिद्धान्तप्रथमपदयुग्दर्पण इति
प्रसिद्धः संशुद्धो वचनमथनैक्याधिगमनात् ।
प्रकाशैर्द्विःसूर्यै२४र्विषुभि५रधिकारैरुपचितः
समाप्तोऽयं ग्रन्थः स्फुरतु चिरमन्तः क्षितितलम् ॥ १५२ ॥

सृष्ट्यादिप्रलयान्तकालकलनात् प्रेतेशितुः शासना-
ल्लोलद्र्यचयाधिकासितरुचः काले सुखादानतः ।
नीलस्याचलनायकस्य शिरसोऽलङ्कारभावात् स्वतः
सम्प्रोक्तः किल कालकाल इति यः कृष्णाय तस्मै नमः ॥१५३॥

आम्नादेशश्रुतिस्मृत्युदितबहुविधाचारवारं प्रजाभिः
काले कालेऽनुतिष्ठन् गगनगणितं साधयत्यात्मजाभिः ।
विश्वं यः पाति मादृक्पतितततिसमुद्धारणोद्बद्धबाहुः
सोऽयं देवः क्षितिक्ष्माभृति जयतितमामिन्द्रनीलोज्ज्वलश्रीः ॥१५४॥

इत्युत्कलोज्ज्वलनृपालकुलप्रसूत-
श्रीचन्द्रशेखरकृतौ गणितेऽक्षिसिद्धे ।
सिद्धान्तदर्पण उपाहितबालबोधे
सानुक्रमो व्यरचि सिद्ध२४मितः प्रकाशः ॥ १५५ ॥

इति कालाधिकारः पञ्चमः ।

